

श्रीयुत रायधनपतिसिंह बहादुरस्यागमसङ्ग्रहे षोडशो भागः

जम्बूद्वीपप्रज्ञप्तिनामधेयं

पञ्चमोपाङ्गम् प्रारभ्यते

वाराणस्यां

जैनप्रभाकर यन्त्रालये

ओम्नमः सिद्धं ॥ श्रीश्रुतदेव्यैनमः श्रीहीरविजयसूरिगुरुभ्योनमः जयति जिनः सिद्धार्थः सिद्धार्थनरेन्द्रनन्दनोविजयी।अनुपहतज्ञानवचाःसुरेन्द्रशतसेव्यमानाङ्घ्रिः १ सर्वानुयोगसिद्धान् वृद्धान् प्रणिदध्महे महिमशब्दान्।प्रवचनकाञ्चननिकषान् सूरीन् श्रीगन्धहस्तिमुखान् २यज्जातवृत्तिमलयजराजिजिनागमरहस्यरसनिवहः। संशयताप मपोहति जयति स सत्योऽत्र मलयगिरिः ३ श्रीमद्गुरो र्विजयदानसहस्रभानोः सिद्धान्तधामधरणात्समवाप्तदीप्तिः। यो दुःषमं रज निजात मपास्तपारं प्राणाशय द्वरतभूमिगतं तमिस्रम् ४ दीपःसरत्नमय एष परानपेक्षं प्रोद्दीपयन् विशदयन् स्वपदं स्वभाभिः। गौरि र्गुणैरिह निदर्शित पूर्वसूरिः श्रीसूरिहीरविजयो विजय्यवोऽस्तुऽयत्प्रभावाद्भ्रमनोपि ममवाणीरसा भवेत्। ते श्रीसकलचन्द्राख्या जीयासु र्वाचकोत्तमाः६ जम्बूद्वीपादिप्रज्ञप्ते र्दृष्टशास्त्रानुसारतः। प्रमेयरत्नमञ्जूषा नाम्ना वृत्ति र्विधीयते ॥७॥ इह ताव द्विकटभवाटवीपर्यटनसमापतितशारीराद्यनेकदुःखार्दितो देही अकाम निर्जरायोगतः सञ्जातकर्मलाघव स्तज्ज्विहासया सकलकर्मक्षयलक्षणं परमपद माकाङ्क्षति, तच्च परमपुरुषार्थत्वेन सम्यग् ज्ञानादिरत्नत्रयगोचरपरमपुरुषकारोपार्जनीयम् सचे ष्टसाधनताजातीयज्ञानजन्यः, तच्चाप्तोपदेशमूलकं, आप्तश्च परमः केवलालोकावलोकितलोकालोकनिःकारणपरोपकारैकप्रवृत्त्यनुभूयमानतीर्थकृन्नामाऽकर्मा पुरुषएव, तदुपदेशश्च गणधरस्थविरादिभि रङ्गोपाङ्गादिशास्त्रेषु प्रपञ्चितः,, तत्राङ्गा निद्वादश, उपाङ्गान्यपि अङ्गैकदेशप्रपञ्चरुपाणि प्रायः प्रत्यङ्ग मेकैकभावा त्तावन्त्येव तत्राङ्गानि आचाराङ्गादीनि प्रतीतानि तेषा मुपाङ्गानि क्रमेणामूनि, आचाराङ्गस्यौ पपातिकं १ सूत्रकृदङ्गस्य राजप्रश्नीयं २ स्थानाङ्गस्य जीवाभिगमः ३ समवायाङ्गस्यप्रज्ञापना ४ भगवत्याः सूर्यप्रज्ञप्तिः ५ ज्ञाताधर्मकथाङ्गस्य जम्बूद्वीपप्रज्ञप्तिः ६ उपासकदशाङ्गस्य चन्द्रप्रज्ञप्तिः ७ अन्तकृद्दशाङ्गादीनां दृष्टिवादपर्यन्तानां पञ्चानामप्यङ्गानां निरयावलिका श्रुतस्कन्धगतकल्पिकादिपञ्चवर्गाः पञ्चोपाङ्गानि, तथाहि,अन्तकृद्दशाङ्गस्य कल्पिका ८ अनुत्तरोपपातिकदशाङ्गस्य कल्पवतंसिका ९ प्रश्नव्याकरणस्य पुष्पिता १० विपाकश्रुतस्य पुष्पचूलिका ११ दृष्टिवादस्य दृष्टिदशा १२ इति। अत्रचोपाङ्गक्रमे सामाचार्यादौ कश्चिद्भेदोप्यस्ति अङ्गानां च मध्ये द्वेआद्येअङ्गे श्रीशीलाङ्काचार्यैर्विवृते स्तः, शेषाणि नवाङ्गानि श्रीअभयदेवसूरिपादै र्विवृतानि सन्ति, दृष्टिवादस्तु श्रीवीरनिर्वाणात् वर्षसहस्रैर्व्यवच्छिन्न इति, न तद्विवरणप्रयोजनम् उपाङ्गानां च मध्ये प्रथम मुपाङ्गं श्रीअभयदेवसूरिभि र्विवृतं, राजप्रश्नीयादीनिषट् श्रीमलयगिरिपादै र्विवृतानि, पञ्चोपाङ्गमयी निरयावलिका च श्रीचन्द्रसूरिभि र्विवृता,,तत्र प्र

स्तुतोपाङ्गस्यवृत्तिः श्रीमलयगिरिकृताऽपि सम्प्रति कालदोषेण व्यवच्छिन्ना, इदंच गम्भीरार्थमयाऽतिगहनं तेनानुयोगरहितं मुद्रितराजकीयकमनीयकोशगृहमिव न तदर्थार्थिनां हस्तार्पितसिद्धिकं सञ्जायत इति, कल्पितार्थकल्पनकल्पद्रुमायमाणयुगप्रधानसमानसम्प्रतिविजयमानगच्छनायकपरमगुरुश्रीहीरविजयसूरीश्वरनिदेशेन कोशाध्यक्षाज्ञया प्रेष्येणेवोन्मुद्रण मिव मया तदनुयोगः प्रारभ्यते,, सच चतुर्द्धा, धर्मकथानुयोग उत्तराध्ययनादिकः गणितानुयोगः सूर्यप्रज्ञप्त्यादिकः द्रव्यानुयोगः पूर्वाणिसंमत्यादिकश्च चरणकरणानुयोगश्च आचाराङ्गादिकः प्रस्तुतशास्त्रस्य क्षेत्रप्ररूपणात्मकत्वात् तस्याश्च गणितसाध्यत्वाद् गणितानुयोगेऽन्तर्भावः ॥ नन्वेवं चरणकरणात्मकाचारादिशास्त्राणा मिव नास्य मुक्त्यङ्गता, साक्षात् मोक्षमार्गभूतरत्नत्रयानुपदेशकत्वात्, इति चेन्न, साक्षादुपदेशकत्वाभावे ऽपितदुपकारितया शेषाणा मपि त्रयाणा मनुयोगानांमुक्त्यङ्गत्वाविरोधात्,, यथाचोक्तं, चरणपडिवत्तिहेऊ धम्म कहा कालिदिट्ठमा दीया । दवि पदंसण सोही दंसण मुदुस्स चरणंतु ॥ १ ॥ अत्रव्याख्या अत्रवृत्तावतिदेशोक्त सम्मत्युक्त ग्रन्थयो र्दुर्ग्रहपद व्याख्याने आपरिसमाप्ति अत्रश्याख्याइति सङ्केतोबोध्यः,, चरणप्रतिपत्तिहेतु र्धर्मकथाऽनुयोगः. काले गणितानुयोगे दीक्षादीनिव्रतानि, कोर्थः, शुद्धे गणितसिद्धे प्रशस्ते कालेगृहीतानि प्रशस्तफलानि स्युः, कालश्च, ज्योतिश्चाराधीनः, सच, जम्बूद्वीपादिक्षेत्राधीनव्यवस्थस्तेनायं कालापरपर्यायो गणितानुयोग इति, द्रव्ये द्रव्यानुयोगे शुद्धेदर्शनशुद्धि र्भवति, कोर्थः, धर्मास्तिकायादिद्रव्याणां द्रव्यानुयोगतः सिद्धौ सत्यां तदास्तिक्ये प्रतिपन्ने दर्शनशुद्धस्य चरणानुयोगोभवतीति । इह यद्यपि श्रीमलयगिरिपादानां क्व परकृताक्षेपपरिहारप्रभविष्णुवचनरचनाचातुर्यम्,, क्वच तत्तन्निबन्धबन्धुरतानैपुण्यं, क्व कुशाग्रसमः प्रतिभाविभवश्च, क्वचनै तत्पूर्वपक्षोत्तरपक्षरचनास्वकुशलत्वं, क्वच तादृक् सम्प्रदायराहित्यं, क्वच कठोरग्रन्थग्रथनकर्मठयकर्मवत्वं, क्वच मुशलाग्रमतित्वमिति महति हेति संहतिविभेदेपि प्रवृत्तिरपि राभसिकी प्रवृत्ति रहो महती धृष्टतावृत्तिः, कटरिकठिनःकुण्ठजनहठग्रह इत्युपहासपात्रतामात्रफलतयाचन्द्रार्कर्षक्षमृगेन्द्रानुयायिनः शृगालस्येव ममानौचिती सञ्चति,, तथापि लोहशालाविकीर्णानां लोहसारकणानां चुम्बकाश्मेप्रयोगेणेव महतापप्रयत्नेनप्राय स्तत्तत्प्राचीनजीवाभिगमादिवृत्तिषु दृष्टानामेव व्याख्यालवाना मेकत्र मीलन मनुविचिन्त्य अन्वाख्यानरूप मेवेदं व्याख्यानम् विधीयतइति, नानौचितीलेशोपीति सर्वंसुस्थमितिशास्त्रप्रस्तावना ॥ तस्यचानुयोगस्यफलादिद्वारप्ररूपणतः प्रवृत्तिर्भवति,, यतउक्तं,, तस्स फलजोगमंगल समुदायत्था

तहेवदारा । इंत ध्रुयनिरुत्तिक्कम पवुयणाइंचवत्ता इंति ॥ १ ॥ तत्र प्रेक्षावतां प्रवृत्तये तस्यानुयोगस्य फल मवश्यं वाच्यम्, अन्यथा ऽस्य निष्फलत्वमा कलय्य व्याख्यातारः श्रोतारश्च कण्टकशाखामर्दनइव नात्र प्रवर्त्तेरन्निति ॥ तच्चद्विधा, कर्त्तुः श्रोतुश्च । एकैकमपिद्विधा अनन्तरं परम्परंच तत्र कर्त्तुरनन्तरं द्वीपसमुद्रादिसंस्थानपरिज्ञाने ऽतिपरिकर्मितमतित्वेनस्पष्टतया यथासंभवंसंस्मरणात्, स्वात्मनः सुखेनैव विचयाभिधानधर्मध्यानसमवाप्ति र्मन्दमेधसा मनुग्रहश्च, श्रोतुः पूनर्जम्बूद्वीपवर्त्तिपदार्थ परिज्ञानं परं परन्तु द्वयोरपि मुक्त्यवाप्तिः, यदाह, सर्वज्ञोक्तोपदेशेन यःसत्वानामनुग्रहम् ॥ करोतिदुःखतप्ता नांसप्राप्नोत्यचिराच्छिवम् १ तथा-सम्यग्भावपरिज्ञाना द्विरक्ताभवतोजनाः क्रियासक्ताह्यविघ्नेन गच्छन्तिपरमाङ्गतिम् २१ तथा-योगः सम्बधोवाच्य स्तेनहि ज्ञातेन फलव्यभिचार मनाशङ्कमानाः प्रेक्षावंतः प्रवर्त्तन्तइति, सद्विधा उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च तत्राद्यस्तर्कानुसारिणः प्रति अनु योगउपायोऽर्थावगमादिद्वोपेयं सच्च फलाभिधानादेवाभिहितः, अन्यश्च केवलश्रद्धानुसारिणः प्रतिसचैवमर्थतोभगवतावर्द्धमानस्वामिना जम्बूद्वीपप्रज्ञप्तिरु क्ता, सूत्रतोगणधरैर्द्वादशाङ्ग्या मुपनिबद्धा, ततोपिमंदमेधसामनुग्रहाय सातिशयश्रुतधारिभिः षष्ठादङ्गादाकृय पृथगध्ययनत्वेनव्यवस्थापिता, अमुमेवच सम्बन्ध मनुविचिन्त्यसूत्रकृदुपोद्घातमाधास्यति, अथवा शास्तुःप्रामाण्येशास्त्रप्रामाण्यमिति आद्यसबन्धस्यैवप्रामाण्यग्रहार्थमपरसम्बन्धनिरूपणं, नहिवि दितपरमतत्वाः सत्वानुग्रहैकप्रवृत्तिमन्तो भगवन्तोजातूपेयानुपयोगिभाषन्ते भगवत्ताभंगादिति,अथवा योगोवसर स्ततः प्रस्तुतोपाङ्गस्यदाने कोवसरइत्यु च्यते । उपाङ्गस्याङ्गार्थानुवादकतयाङ्गस्यसामीप्येनवर्त्तनाद्यएवतदीयाङ्गस्याऽवसरःसएवास्यापीति तत्राऽवसरसूचिका इमा गाथाः । तिवरिसपरियाय स्सउ आयारपकप्पनःममञ्झयणं चउवरिसस्सयसम्मं सूअगडंनामअंगंति १ दसकप्पव्ववहारा संवछरपणगदिरिकयस्सेव ठाणंसमंवाउवियं अंगेतेअट्ठवा सस्स २ दसवासस्सविवाहो एगारसवासगस्सयइमेऊ खुड्डियविमाणमाई अज्झयणापंचनायव्वा ३ बारसवासस्सतहा अरुणोवायाइपंच अज्झयणा तेरस वासस्सतहा उट्ठाणसुयाइयाचउरो ४ चउद्दसवासस्संतहा आसीविसभावणंजिणाविंति पन्नरसवासगस्सय दिट्ठीविसभावणंतहय ५ सोलसवासाईसुय एगुत्तरबुड्ढिएनुजहसंखं चारणभावणमहसुविण भावणातेअगनिसग्गा ६ एगूणवासगस्सउ दिट्ठीवाउदुवालसंअंगं संपुन्नवीसवरिसो अणुवाईसवुसुत्त सोति ७ अत्रपञ्चवस्तुकसूत्रेद्दशवर्षपर्यायस्यसाधोः वत्य ङ्गप्रदानेऽवसरस्य प्रतिपादनात् षष्ठांगतयाज्ञाताधर्मकथाङ्गस्यप्रदानेनतदनन्तरमवसरः कार

णविशेषेगुर्वाज्ञावशादर्वागपि ततस्तदुपागङ्त्वादस्यतदनन्तरमवसरइति सम्भाव्यते योगविधानसामान्याच्चार्थोमपि अङ्गयोगोद्वहनानन्तरमेवोपाङ्गयोगो
द्वहनस्यविधिप्राप्तत्वादिति तथेद मुपाङ्गमपिप्रायःसकलजंबूद्वीपवर्त्तिपदार्थानुशासनाच्छास्त्रं तस्यचसम्यग्ज्ञानद्वारापरमपदप्रापकत्वेन श्रेयोभूतता
अतोमाभूदत्रविघ्नइति तदपोहायमंगलमुपदर्शनीयं, यतः बहुविग्घायंसेयाइंतेणकयमंगलोवयारेहि घेत्तव्वोसोमुमहानिहि व्वजहवामहाविज्जत्ति तच्चत्रि
विधं आदिमध्यावसानभेदात् तत्रादिमङ्गलंणमो अरिहंताणमित्यविघ्नतयाशास्त्रस्यपरिसमाप्त्यर्थम् मध्यमङ्गलंजयाणंएक्कमेक्केचक्कवट्टिविजएभगवन्तोतित्यग
रासमुप्पज्जंतित्ति ॥ तस्यैवस्थैर्याय अस्यच द्वितीयाधिकारादिसूत्रस्य त्रिभुवनोत्सवभूतजिनजन्मकल्याणकसूचकत्वेनपरममङ्गलत्वम्, अन्त्यमङ्गलंतुसमणे
भगवंमहावीरेमिहिलाएणायरीएइत्यादिनिगमनसूत्रेश्रीमन्महावीरनामग्रहणमिति तस्यैवशिष्यप्रशिष्यादिपरंपरयोअव्यवच्छेदार्थं । नन्विदंसम्यग्ज्ञानरूप
त्वेननिर्जरार्थत्वात् अथवाजोजंपसत्थमत्थं पुच्छइतस्सत्थसंपत्ता इतिनिमित्तशास्त्रेद्वीपसमुद्राभिधानग्रहणस्यपरममङ्गलत्वेननिवेदनादस्यद्वीपप्ररूपणात्म
कत्वात् स्वयमेवस्ववर्णात्मनामङ्गलंकिंमङ्गलान्तरोपन्यासेन अनवस्थाप्रसंगात्,मैवम् मङ्गलतयाहिपरिगृहीतशास्त्रं मंगलमितिव्यवह्रियते फलदंचभवति
साधुवत् अन्यथोपहासनमस्कारादेरपिमङ्गलत्वंस्यात्,नहिलोकेपिस्वरूपसतांदधिपूर्वादीनांद्रव्यमङ्गलत्वं किंतु मंगलाभिप्रायेणप्रयुक्तानामन्यथा तद्विष
यकदर्शनस्पर्शनादीनांनिर्मूलकतापातात्, इहास्यशास्त्रस्यफलादिनिरूपितं तदनुयोगस्यद्रष्टव्यं तयोः कथंचिद्भेदादिति ३ अथेदानींसमुदायार्थश्चिन्त्यते
तत्रसमुदायःसामान्यतःशास्त्रेसंग्रहणीयपिण्डस्तद्रूपोर्थोवक्तव्यःकिमुक्तंभवति अवयवविभागनिरपेक्षतयाशास्त्रगतप्रमेयंप्रकटनीयं तच्चवर्द्धमानादिवत्यथा
र्थेनामतोभवति तत्रैव समुदायार्थपरिसमाप्तेः । ननुपलाशादिवदयथार्थनामतोडित्यादिवदर्थं शून्यनामतश्च प्रस्तुतेचजंबूद्वीपप्रज्ञप्तिरितिनाम्नः कःशब्दार्थ
इत्युच्यते जम्ब्वासुदर्शनापरनाम्न्यानादृतदेवावासभूतयोपलक्षितोद्वीपोजम्बूद्वीपस्तस्य प्रकर्षेणनिःशेषकुतीर्थिकसार्था गम्ययथावस्थितस्वरूपनिरूपणल
क्षणेनज्ञप्तिर्ज्ञापनंयस्यांग्रन्थपद्धतौज्ञप्तिर्ज्ञानंवायस्याः सकाशात् साजम्बूद्वीपप्रज्ञप्तिः अथवाजम्बूद्वीपंप्रतिपूरयन्तिस्वस्थित्येतिजम्बूद्वीपप्राः जगतीवर्ष
वर्षधराद्यास्तेषांज्ञप्तिर्यस्याःसकाशात् साजम्बूद्वीपप्रज्ञप्तिरितिसान्वर्थशास्त्रनामप्रतिपादनेनजम्बूद्वीपप्रज्ञप्त्याः पिण्डार्थोदर्शितःअतएवाभिधेयशून्यतामा
कलयंतसन्तोऽत्रप्रवृत्तौमामन्दायन्तामित्यभिधेयसूचापिकृतैवनामनिक्षेपचिन्तानुधिरयजनायाकरिष्यत् इतिसमुदायार्थः ४ तथै वानुयोगद्वाराणिवाच्यानि

तथाहि प्रस्तुताध्ययनस्य महापुरुषैव चत्वारि अनुयोगद्वाराणि भवन्ति, उपक्रमो निक्षेपो ऽनुगमोनयश्च तत्रा नुयोजनमनुयोगः सूत्रस्यार्थेन सह सम्बन्धनं अथवा-ऽनुरूपोऽनुकूलो वा योगो व्यापारः सूत्रस्याप्रतिपादनरूपो ऽनुयोगः, आहच-अणुजोजणा मणुनुगो सुअस्सनियएण जमभिहेएण वावारोवा जोगो जो अणुरूवा णुकूलो वत्ति ।यद्वा अर्थापेक्षया अणोर्लघोः पश्चाज्जाततयावाऽनुशब्दवाच्यस्य यत्राभिधेये योगो व्यापार स्तत् सम्बन्धोवा ऽनुयोगो ऽनुयोगोवेति, आहच-अहवा जमत्थमुघोवयत्थभा वेहिं सुअस्सणुतस्स अभिधेये वावारो जोगो तेणं च सम्बन्धोति१ तस्यद्वाराणी द्वाराणि प्रवेशमुखानि अस्याध्ययनपुरस्यार्थाधिगमोपाया इत्यर्थः, पुरदृष्टान्तश्चात्र-यथोह्यकृतद्वारकं पुरमपुरमेव कृतैकद्वारमपि दुरधिगमकार्यांति पत्तयेच स्यात् चतुर्मूलद्वारं तु पूर्तिद्वारानुगतं सुखाधिगमं कार्यानतिपत्तयेच, एवं जम्बूद्वीपप्रज्ञप्त्यध्ययनपुर मप्यर्थाधिगमोपायद्वार शून्यमशक्याधि गममभवति, एकद्वारानुगतमपिच दुरधिगमं सप्रभेदंचतुर्द्वारानुगतं तुसुखाधिगमं कार्यानतिपत्तयेचस्या दतः फलेग्रहिद्वारोपन्यासइति ॥ तानिच-द्वि त्रिद्विभेदानि क्रमेणभवन्तीति, तद्भेदाः ६ निरुक्तिरुक्तउपक्रमणमुपक्रम इति भावसाधनः व्याचिख्यासितशास्त्रस्य समीपानयनेन निक्षेपावसरप्रा पणं उपक्रम्यतेवाऽनेन गुरुवाग्योगेनेत्युपक्रमः इतिकरणसाधनः उपक्रम्यतेऽस्मिन्नितिवा शिष्यश्रवणभावेसतीत्युपक्रमः इत्यधिकरणसाधनः उप क्रम्यते ऽस्मादितिवा विनेयविनयादित्युपक्रमः इत्यपादान साधनइति एवंनिक्षेपणं निक्षेप्यते ऽनेनास्मिन्नस्मादितिवा उपक्रमानीतव्याचिख्यासित शास्त्रस्यनामादिभिर्न्यसनमित्यर्थः निक्षेपोन्यासः स्थापनेतिपर्यायाः एव मनुगमनमनुगम्यतेऽनेनास्मिन्नस्मादितिवा ऽनुगमः निक्षिप्तसूत्रस्या नुकू लः परिच्छेदो ऽर्थैकवचनमिति यावत्, एवंनयनंनीयतेऽनेनास्मिन्नस्मादितिवा नयः अनन्तधर्मात्मकस्यवस्तुन एकांशपरिच्छेद एकेनैवधर्मेण पुरस्कृतेन वस्त्वंगीकारइत्यर्थः ७ उपक्रमादिद्वारानामित्यन्यासे किंप्रयोजन मित्युच्यते-नह्यनुपक्रान्त समीपीभूतं निक्षिप्यते नचा निक्षिप्तंनामादिभिरर्थतो नुगम्यते नचार्थतोऽननुगतं नयैर्विचार्यते इतीदमेवक्रमप्रयोजनं उक्तंच-दारक्कमो यमेवनु निरके व्वइजेणनासमीवस्थं अणुगम्मइ नाणत्थं नाणुव गमोनयमयविहूणोत्ति ८ तदेवं फलादीन्युक्तानि सांप्रतमनुयोगद्वारभेदभणनपुरस्सर मिदमेवा ध्ययनमनुविचिन्त्यते, तत्रोपक्रमो द्विधा ऽलौकिकः शास्त्रीयश्च, तत्राद्यः षोढा नामस्थापनाद्रव्यक्षेत्रकालभावभेदात् तत्रनामस्थापनेसुगमते द्रव्योपक्रमोद्विधा आगमतो नो आगमतश्च आगमतउपक्रम

शब्दार्थस्य ज्ञाता, तत्रचानुपयुक्तोऽनुपयोगोद्रव्यमितिवचनात् नोआगमतस्त्रिविधोज्ञ शरीरभव्यशरीरतद्व्यतिरिक्तभेदात्, तत्र यदुपक्रमशब्दार्थज्ञस्य शरीरं जीवविप्रमुक्तं सिद्धशिलातलादिगतंतद्भूतभावत्वात् ज्ञशरीरद्रव्योपक्रमो यस्तु बालकेनेदानी मुपक्रमशब्दार्थ मवबुध्यते अथवा-अवश्यमाय त्यां भोत्स्यते स भाविभावनिबन्धनत्वात् भव्यशरीरद्रव्योपक्रमः ज्ञशरीरभव्यशरीरव्यतिरिक्तस्त्रिविधः सचित्ताचित्तमिश्रभेदात् तत्र सचित्तद्रव्योपक्र मोद्विपदचतुः पदाऽपादोपाधिभेदभिन्नस्त्रिविधः पुनरेकैकोद्विविधः परिकर्मणिवस्तुविनाशेच तत्रा-वस्थितैर्द्रव्यस्यगुण विशेषापादनं परिकर्म त स्मिन् परिकर्मणि सचित्तद्विपदद्रव्योपक्रमो यथा-मनुष्याणां वर्धकिकन्धनकृवद्ध्यादिकरणं सचित्तचतुःष्पदद्रव्योपक्रमो यथा-हस्त्यादीनांशिक्षाद्यापाद नं सचित्तापदद्रव्योपक्रमोयथा वृक्षादेर्वृक्षायुर्वेदोपदेशादृद्ध्यादिगुणकरणं वस्तुविनाशे पुनस्त्रिविधोपि सचित्तद्रव्योपक्रमस्तेषामेव मनुष्यादीनां ख ड्गादिभिर्विनाशकरणं अचित्तद्रव्योपक्रमो द्विविधः परिकर्मणिवस्तुविनाशेच तत्र-परिकर्मणि यथा-पट्टरागमणेः क्षारमृत्पुटपाकादीना नैर्मल्यापाद नंवस्तुविनाशेचतेषामेवविनाशनं, मिश्रद्रव्योपक्रमोपिद्विविधः परिकर्मणिवस्तुविनाशेच तत्रक्षेममाकाशङ्कटका दिभूषितपुरुषादिद्रव्यस्य गुणविशेषक रणं वस्तुविनाशेविवक्षितपर्यायोच्छेदः तथाक्षेत्रकालोपक्रमावपिद्विविधौ परिकर्मणिवस्तुविनाशेच तत्रक्षेममाकाशंतच्चामूर्त्तं नित्यंचेति नतस्य परि कर्मरूपो विनाशरूपोवा उपक्रमोघटतेततोमच्चाः क्रोशन्तीत्यादिन्याया दुपचारेणतदाश्रितस्ये क्षुक्षेत्रादे र्हलादिभिः परिकर्मगजबन्धनादिभिस्तु वि नाशइति एवं कालस्यापि पूर्वोक्तन्यायेन उपक्रमासम्भवेपि शंक्वादिच्छायादिभि र्यद्यथार्थपरिज्ञानं स परिकर्मणि कालोपक्रमः यच्च ग्रहनक्षत्रादिचा रैरनिष्टफलदायकतया परिणमनं स विनाशे कालोपक्रमः, तथाच-लौकिकीवागपि अमुकेन ग्रहेण नक्षत्रेणवा हत्यमित्थंगच्छताविनाशितः कालइ ति, भावोपक्रमोद्विधा आगमतोनो आगमतश्च, आगमतोउपक्रमशब्दार्थस्य ज्ञाता तत्रचोपयुक्तउपयोगा भावनिक्षेप इति वचनादिति, नोआगमतोद्वि धा प्रशस्तः अप्रशस्तश्च, तत्राद्यो जामातृपरीक्षकब्राह्मणी वेश्यामात्यानामिव संसाराभिवर्द्धिना ऽध्यवसायेन परभावोपक्रमणरूपः परश्रुतादिनिमित्त मा पार्थं भावावधारणरूपः अनेनेहाधिकारः अथा नुयोगाङ्गप्रतिपादनाधिकारे गुरुभावोपक्रमाभिधान मनर्थकमतदंगत्वा त्तदसम्यक् तस्या प्यनुयोगाङ्गत्वा द्वा व्यक्तारः गुरुचित्तायत्ता इंवरकाणं गाइंजेण सद्दाइंतेण जहसुप्पसन्नहोइतयंतंतहाकज्जं१ आह-यद्येव न्तर्हिगुरुभावोपक्रमएव दर्शनीयः नशेषाः, निः

प्रयोजकत्वादिति नगुरुचित्तप्रसादनार्थं तेषा मप्युपयोगित्वात्, तथाहि-बालग्लानादिसाधून् मध्यान्नपानादिना प्रतिजागर्ति वैयावृत्त्यनियुक्ते साधौद्रव्यो पक्रमात् गुर्वासन्नशयनाद्युपभोगि भूतलं प्रमार्जनादिना संस्करोति क्षेत्रोपक्रमान् भव्यस्य च्छायालग्नादिना दीक्षादिसमयं सम्यक् साधयति कालोपक्रमा च्च गुरुः प्रसीदति नामस्थापनोपक्रमौतुप्रस्तुतेऽनुपयोगिनाविति, अथवाऽपक्रमसाम्यात् येकेचन सम्भविन उपक्रमभेदा स्तेसर्वेपिदर्शनीयाः, यतोऽनुप योगिनिरासेनोपयोगिनि निःप्रतिपक्षाप्रतिपत्तिरुपजायते तथाचाप्रस्तुतार्थापाकरणं प्रस्तुतार्थव्याकरणंच नामादिन्यासव्याख्यायाः फल मुपवर्णयन्ति महाधियः, उक्तः लौकिकउपक्रमः । अथशास्त्रीयउच्यते, सोपिषोढैव, आनुपूर्वीनामप्रमाणवक्तव्यतार्थाधिकारसमवतारभेदात् एतद्व्यक्त्यर्थंतु अनुयोग द्वारसूत्रंविलोक्यं ग्रन्थविस्तरभियातुनेहतन्यते केवलं आनुपूर्व्यादिषुपञ्चसूपक्रमभेदेषुषट् समवतारभेदेविचार्यमाणेइदमध्ययनं समवताराय ततश्चानुपू र्व्यादिरुपक्रमः षड्विधोव्यभिहितोभवति, तथाहि-दशविधायामप्यानुपूर्व्यांस्वाध्ययनस्योत्कीर्त्तनगणनानुपूर्व्योः समवतारः,तत्रोत्कीर्त्तनं संशब्दनं ना मकथनमात्रं यथा द्वादशाङ्गोपाङ्गानां मध्ये औपपातिकं राजप्रश्नीयं जीवाभिगमाध्ययनं प्रज्ञापना सूर्यप्रज्ञप्ति र्जम्बूद्वीपप्रज्ञप्तिरित्यादि गणनापरिसंख्यानं एकंद्वेत्रीणीत्यादि सा चगणनानुपूर्वीत्रिधा पूर्वानुपूर्वीपश्चानुपूर्वीअनानुपूर्वीचेति तत्र पूर्वानुपूर्व्या इदंषष्ठं पश्चानुपूर्व्या सप्तमं अनानुपूर्व्या अनियतं नामच एकनामादि दशनामपर्यन्तं तत्रषड्नाम्न्यस्याध्ययनस्यावतार स्तत्रषण्णां भावा औदयिकादयो निरूप्यन्ते तत्रा स्यक्षायोपशमिकेभाव अवतारः सर्वश्रुतस्यक्षायोपश मिकभावरूपत्वात् प्रमाणंचतुर्द्धा द्रव्यक्षेत्रकालभावभेदात् तत्रेदमध्ययनं क्षायोपशमिकभावात्मकत्वाद्भावप्रमाणविषयंतदपिभावप्रमाणंत्रिधा गुणनयप्र माणसंख्याभेदात् तत्राद्यंजीवाजीवगुणप्रमाणभेदात्त्रिधा तत्रजीवोपयोगरूपत्वा ज्जंबूद्वीपप्रज्ञप्त्यध्ययनस्य जीवगुणप्रमाणे समवतारः तदपि ज्ञानदर्शनचा रित्रभेदात्त्रिधा, तत्र बोधात्मकत्वादस्य ज्ञानगुणप्रमाणे तदपि प्रत्यक्षानुमानोपमानागमभेदाच्चतुः प्रकारं तत्रास्य आप्तोपदेशरूपत्वादागमेसोपिलौकिक लोकोत्तरभेदाद्विविधस्तत्रपरमगुरुप्रणीतत्वेन लोकोत्तरेसोपिद्विधा आवश्यकआवश्यकव्यतिरिक्तश्च तत्रेदमावश्यकव्यतिरिक्ते आवश्यकव्यतिरिक्तोपिद्वि धा अङ्गप्रविष्टानङ्ग प्रविष्टभेदात् तत्रेदमनङ्गप्रविष्टेसोपिद्विधा कालिकोत्कालिकभेदात् तत्रेद ङ्कालिके सोपि सूत्रार्थोभयभेदा त्रिधा तत्रेदं सूत्रार्थरूपत्वा दुभयेसोपि आत्मानन्तरपरंपरागमभेदात्त्रिविधः तत्रयेदं यथाभूतंसूत्रतः आत्मानन्तरशिष्याणामनन्तरागमः तच्छिष्याणांतुपरंपरागमः अर्थतो अर्हता

मात्मागमः गणधराणा मनन्तरागमः ततः परंपरंपरागमइति त्रिप्रत्यागमेवस्था ध्ययनस्याधतार इति । मनुअङ्गप्रविष्टसूत्रंगणधरप्रणीतमिति भवतुतेषा मात्मागमः इदंतूपाङ्गत्वेनानङ्गप्रविष्टत्वात् स्थविरकृतं, यदाह-गणहरकयमङ्ग सुअंजंकयत्थेरेहिंबाहिरंतंतु निययअंगपविट्ठं अणि यमसुयबाहिरंतंतु १ ततः कथंगणधराणामात्मागमत्वेन भाव्यते उच्यते गणधरैर्द्वादशाङ्गीविरचने परमार्थतस्तदेकदेशरूपोपाङ्गानामपिविरचनमायातमिति तेषामपीदमुपाङ्गंसूत्रस आत्मागमइति नकश्चिद्विरोधः व्यवहारतस्तुस्थविरकृतत्वेनेदमुपाङ्गंस्थविराणामेव सूत्रत आत्मागमः सुसंथेराण आत्तागमोति इतिश्रीउत्तराध्ययनवृहद्वृत्ति वचनादिति अयमेव शास्त्रग्रामाणयसूचकोर्थः पूर्वेमुहूर्त्तक्रमरूपसम्बन्धावसरे निरूपितइति मधप्रमाणेतुमास्यसंप्रत्यवतारो मूढनयत्वात् आगमस्यउ क्तंच -मूढनइयंसुयंकालियंचेत्यादि संख्यामानस्थापनाद्रव्यक्षेत्र कालौपम्यपरिमाणभावभेदात् अष्टप्रकारा तत्रचास्यपरिमाण संख्यायामवतारः तत्रापि कालिकश्रुतपरिमाणसंख्यायांसमवतारः सापिद्विधा सूत्रतोऽर्थतश्च तत्रसूत्रतः परिमितपरिमाणं सम्प्रतिवक्तव्यतासाचत्रिधा स्वपरोभयसमयवक्तव्यता भेदात् तत्र स्वसमयवक्तव्यतायाम स्यावतारः तथार्थाधिकारोवक्तव्यताविशेषएव सचेह-जम्बूद्वीपवक्तव्यतालक्षणः समुदायार्थकथनादेवउक्तइति ॥ उ क्तश्चक्रमः अथनिक्षेपः सचत्रिधा ओघनामसूत्रालापकनिष्पन्नभेदात् तत्रौघोयत्सामान्यमध्ययनादिनामतन्निक्षेपो ऽनुयोगद्वारादिभ्योवसेयः तत्रेहभावा ध्ययनादिनाऽधिकारः नामनिष्पन्नेतुनिक्षेपेऽस्यजम्बूद्वीपप्रज्ञप्तिरितिनाम ततोजम्बूशब्दस्यद्वीपशब्दस्यप्रज्ञप्तिशब्दस्यचनिक्षेपोवाच्यः तत्रजम्बूशब्द स्यनामस्थापना द्रव्यभावभेदाच्चतुर्धा निक्षेपस्तत्रनामजम्बूर्यस्यजम्बूरितिनाम यथाजम्बूरन्तिमकेवलीजम्बा अभिधानंवा स्थापना जम्बूर्याजम्बूरितिस्था पनाक्रियते यथाचित्रलिखितजम्बूवृक्षादिः द्रव्यजम्बूद्विधा आगमतोनो आगमतश्च आगमतस्तदर्थज्ञातानुपयुक्तो नो आगमतोज्ञशरीरभव्यशरीरोभयव्य तिरिक्तभेदात्त्रिधा तत्राद्यौभेदौसुप्रतीतौतौ उभयव्यतिरिक्तद्रव्यजम्बूरपित्रिधा एकभविकबद्धायुष्काभिमुखनामगोत्रजंतुभेदात् तत्रैकभविकोनामयएकभ वानन्तरंजम्बूत्वेनोत्पत्स्यते बद्धायुष्करकृतेनजम्बूवायुर्बद्धं अभिमुखनामगोत्रस्कृतयस्यजंबूवानामगोत्रेकर्मणी अन्तर्मुहूर्त्तोनन्तरमुदयमायास्यत इत्ययंत्रिविधो पिभाविभावजम्बूकारणत्वाद्द्रव्यजम्बूरिति भावजम्बूरपित्रिधा आगमतोनो आगमतश्च तत्रागमतोज्ञानोपयुक्तः नो आगमतस्तु जम्बू द्रुमएव जम्बू द्रुमनामगोत्रकर्मणीवेद्यन्तिइति आह-यथा-अभिमुखजम्बभावस्यजीवस्यद्रव्यजम्बूत्वंभाविनिभृतवदुपचारइतिन्यायात् तथा-आसन्नपश्चात् कृतजम्बूभा

स्यापिभूतपूर्वकस्य दुपचारइति न्यायात् कथंतद्द्रव्यजम्बूत्वंनिर्दिष्टं उच्यते-इदमुपलक्षणं तेनतस्यापि द्रव्यनिक्षेपएवांतर्भावः भूतस्य भाविनोवेत्यादि द्रव्यलक्षणस्यसद्भावात् अत्रानिर्देशकारस्तु श्री उत्तराध्ययनदूसपत्रीयाध्ययननिर्युक्तौ श्रीभद्रबाहुस्वामीपादैः द्रूमनिक्षेपेऽविवक्षणंत तुल्यानायत्वाद स्यनिक्षेपस्येति प्रस्तुतेच नो आगमतोभावजम्बूधिकारः द्वीपोपि पूर्ववच्चतुर्द्धा तत्र नामद्वीपोयस्य द्वीपइतिनाम स्थापनाद्वीपोयाद्वीपस्य स्थापना यथा चित्रलिखितजम्बूद्वीपादि· द्रव्यद्वीपोद्विधा आगमतो नो आगमतश्च तत्रागमतस्तदर्थज्ञातानुपयुक्तः नो आगमतस्तुज्ञशरीरभव्यशरीरद्रव्यद्वीपौ सुबोधौ तद्व्यतिरिक्तद्रव्यद्वीपो द्विधा सन्दीनो ऽसन्दीनश्च तत्र ·योहि सन्दीयते जलप्लावनात् क्षयमाप्नोतिपक्षमासादावुदकेनप्लाव्यते ससंदीनोविपरीतस्त्वसं दीनः सिंहलद्वीपादिः भावद्वीपोपिद्विधा आगमतोनो आगमतश्च तत्रागमतस्तदर्थज्ञातोपयुक्तः नो आगमतस्तुसाधुः कथमित्याह यथाहि नदीसमुद्रब हुमध्यप्रदेशेसायांत्रिकाद्रव्यद्वीयमवाप्यश्रमन्ति तथा यातीतसंसारपारावारांतरचारखेदमेदस्विनोदेहिनः परमपरोपकारैकप्रवृत्तं साधुं समवाप्या श्व स्नन्ति अतो भावतः परमार्थतो द्वीपोभावद्वीप उच्यते सोपि संदीनासंदीनभेदाद्विधा-तत्रपरीषहोपसर्गाद्यैः क्षोभ्यः सन्दीनः तदितरस्त्वसन्दीनः अ थवा भावद्वीपः सम्यक्त्वं तच्च प्रतिपातित्वादौपशमिकं क्षायोपशमिकञ्च सन्दीनोभावद्वीपः क्षायिकं चासन्दीनइति ननु क्वचित् तत् पर्यायापन्नं वस्तु भावनिक्षेपेनिक्षिप्यते यथा ऽत्रैवजम्बूपर्यायमनुभवन् भावजम्बूत्वेन निक्षिप्तः, क्वचित्तदन्यपर्यायापन्नं वस्तुभावं निक्षिप्यते यथात्रैवभावद्वीप पर्यायमनु भवन् साधुः सम्यक्त्वंवेति परस्परमुदाहरणवैषम्यं कथं व्युत्क्रमदिति अत्रोच्यते वस्तुगत्यातत्पर्यायाधारतया भवनं भावइति कृत्वातत्पर्यायधार्यैवय स्तु भावनिक्षेपेनिक्षिप्यते यत्तु तद्व्यद्वस्तुभावनिक्षेपे निक्षिप्यते तत्तद्गतभावगतगुणारोपादौपचारिक मितिनदोषः विवक्षायाविचित्रत्वादिति प्रस्तु तेचद्विधामतालक्षणोद्देश आपोस्मादिति अन्वर्थवशाद्वीपत्वं तत्रच द्रव्यद्वीपे नात्राधिकार स्तत्रापि असन्दीने नेति अथवेत्यनामादिभेदाद् द्वीपश्च तुर्द्धानाम द्वीपोद्वीप इति नाम नामवतोरभेदोपचारात् स्थापनाद्वीपो द्वीपस्यस्थालवलयाद्याकारः द्रव्यद्वीपो द्वीपारम्भकद्रव्याणि पृथिव्यादीनि तदा त्मकत्वाद् द्वीपानां, यदाह-जम्बूदीवेणं भंते किंपुढविपरिणामे आउपरिणामे जीवपरिणामे पुग्गलपरिणामे गोअमा पुढविपरिणामेवि जीवपरिणा मेवि पुग्गलपरिणामे वि भाव द्वीपस्तु स्थालाद्याकृतिमत् स्थालात्मकं सर्वतः समुद्रजलवलयितं क्षेत्रखण्डं एतदनुसारेणतुचतुर्भिरपिद्वीपैरत्राधिकार

इत्यलमिबिस्तरेण प्रशस्तिरपिनामादिभिश्चतुर्दा तत्रप्रशस्तिरितिनाम यथा प्रशस्ति विद्यादेवी स्यादना प्रशस्तिः प्रशस्तिशब्दार्थस्तसाध्यादिः द्रव्य प्रशस्ति द्विधा आगमतो नो आगमतश्च तथा आगमतस्तदर्थज्ञातानुपयुक्तः नो आगमतस्तत्र शरीरभव्य शरीरोभयव्यतिरिक्तद्रव्यप्रशस्तिभेदात्त्रिधा तत्राद्यौ भेदौ सुबोधौ उभयव्यतिरिक्ता द्रव्यप्रशस्तिर्द्विधा लौकिकीलोकोत्तराच एकैकापि त्रिविधा सचित्ताचित्तमिश्रद्रव्यविषयभेदात् तत्राद्याद्यया प्रियासोर्दृपस्यमन्दुरासमानीतहयज्ञापनं द्वितीयातस्यैवरथ ज्ञापनं तृतीयातस्यैवपर्याणादि परिकृतहयज्ञापनं रथस्यवाश्वादियुक्तस्यज्ञापनं लोकोत्तरातुसचित्त विषया यथा प्रव्रजमाचार्यस्यनवप्रव्रजितं प्रतिशाल्यादिसचित्तज्ञापनं सैवद्वितीया शस्त्रपरिणत शाल्यादिज्ञापनं सैवतृतीयादुपक्वशाल्यादिज्ञापनं चेति, अथभाव प्रशस्तिरपिद्विधा आगमतो नो आगमतश्च तत्रागमत स्तदर्थज्ञातोपयुक्ता नो आगमतस्तु भाव प्रशस्तिर्द्विधा-प्रशस्ता प्रशस्तभाव प्रशस्ति भेदात्, तत्रा प्रशस्तभाव प्रशस्तभाव प्रशस्तिर्यथा ब्राह्मण्याः स्वसुताः प्रतिज्ञामातृभावनिवेदनं प्रशस्तभाव प्रशस्तिरियमेव, अर्थतोऽर्हतोगणधरान् प्रति सूत्रतश्च गणधराणां स्वशिष्यान् प्रति उक्तावोघमात्रनिष्पन्नौनिक्षेपौ सम्प्रतिसूत्रालापकनिष्पन्नः सचावसरप्राप्तोपिननिक्षिप्यते तस्यसूत्रपदाविज्ञा भावित्वात्, सूत्रंच सूत्रानुगमसतिसमयप्रारंभवति ततोऽवसरप्राप्तंसूत्रानुगमसमय इवक्षिप्यते निक्षेपसाम्यमात्रान्नात्रोपदर्शनं अथानुगमोव्याख्यान रूपः सचद्विधानिर्युक्त्यनुगमः सूत्रानुगमश्च तत्राद्यस्त्रिधा निक्षेपनिर्युक्त्युपोद्घातनिर्युक्ति सूत्रस्पर्शकनिर्युक्त्यनुगमभेदात् तत्रनिक्षेप निर्युक्त्यनुगमः जंबादिशब्दानां निक्षेपप्रतिपादनानुगमएवउपोद्घातनिर्युक्त्यनुगमकं उद्देसेनिद्देसेअ इत्यादिगाथाद्वयादवसेयः सूत्रस्पर्शिकनिर्युक्त्यनुगमस्तु संहितादौषड्विधे व्याख्यालक्षणे पदार्थपदविग्रह चालनाप्रत्यवस्थान लक्षणव्याख्यानभेदचतुष्टयस्वरूपः सचसूत्रानुगमेसंहितापदलक्षणव्याख्यानभेदद्वयलक्षणेसतिभवतीत्यतः सूत्रानुगमएवोच्यतेतत्रचाल्यगूंथंनमहार्थंत्रिंशद्दोषविरहितमष्टगुणोपेतंस्खलितादिदोषवर्जितंसूत्रमुच्चारणीयंतच्चेदंणमोअरिहंताणमित्यादि ॥ अस्यचव्याख्यासंहितादि । क्रमेणतत्रास्खलितसूत्रपाठःसंहितासूत्रेचास्खलितादिगुणोपेतेउच्चारितेकेचिदर्थाअवगताःप्राज्ञानांभवंत्यतः संहिताव्याख्याभेदोभवति अनधिगतार्थाधिगमायचपदादयोव्याख्याभेदाःप्रवर्त्ततइति तत्रपदानिनमःअर्हद्भ्यःइतिएवंपदकरणेसूत्रालापकनिष्पन्ननिक्षेपावसरप्राप्तनमस्कारस्यनामादिभिश्चतुर्दानिक्षेपःतत्रनामनमस्कारोदुस्यभिधानंस्थापनानमस्कारोनमस्कारकरणप्रवृत्तस्यसंकोचितकरचरणस्यकाष्ठपुत्रचित्रा

दिगतः साध्वादेराकारः द्रव्यनमस्कार, आगमतो नोआगमतश्च, तत्रागमतस्तदर्थज्ञातानुपयुक्तः नोआगमतोज्ञशरीरभव्यशरीरनमस्कारोप्रतीतौ ज्ञश

॥दंडए॥ णमो अरिहंताणं णमो सिद्धाणं णमो आयरियाणं णमोउवज्झायाणं णमोलोएसव्वसाहूणं

॥ नमोऽर्हद्भ्यः ॥ नमः सिद्धेभ्यः नम आचार्येभ्यः नमउपाध्यायेभ्यः नमो लोकेसर्वसाधुभ्यः १ ॥

श्री सीद्दाय नराधिपकुलांबरद्योतकैकतिग्मांशोः । सर्व सुरासुरभासुर स्वरसंवद्दिताद्रेश्च ॥ १ ॥ श्री महीरजिनेन्द्रोः पदपद्मं सम्प्रणम्य कुर्वेहं । स्तंबुकार्थेश्रीजंबूद्दीप प्रज्ञप्तिसूत्रस्य ॥ २ ॥ युग्मं । हवें अंगनोजे एकदेश तेउपांगकहीए । तेभणीबारअंगनाबारेउपांगच्छे । तिहांछट्ठो अंग श्री ज्ञाता धर्मकथां गसूत्र । तेहनोउपांग श्रीजंबूद्दीप प्रज्ञप्तिगणितानु योगप्रतिबद्ध तेहनोअर्थ प्राकृतपणें लोकभाषाइं । अल्पबुद्दि प्राणीना हितनें अर्थें संक्षेपमात्र थकी लिखिइंछे । हवें जंबूद्दीपप्रज्ञप्तिते स्यूंकहीए । जंबूसूदर्शनामे वृक्षकहीइं । अनादिकदेवतानुं स्थानक तेणे उप लक्षितते भणी जंबूद्दीपकहीइं । तेहनुंयथा स्थीत स्वरूपलक्षणें करी । प्रज्ञप्तिकहतां जणावबानुं कहवु । जेहसूत्रथी जंबूद्दीपप्रज्ञप्ति कहीए । हवें प्रथममङ्गली कनै अर्थे ग्रन्थकर्त्तागणधर पञ्चपरमेष्टीनै नमस्कारकरैछे । तिहैपाछै जंबूद्दीपप्रज्ञप्ति वषाणियेछे ॥ १ ॥ णं० माहारो नमस्कार हूनु अ० अरिहं तनेकाजिं तिहांनांमजिन ऋषभादिकनांम १ स्थापनाजिन प्रतिमा २ द्रव्यजिननाजीव ३ भाव ना जिन चोत्तीस अतिसयें बिराजमान पेंत्तीसवाणी गुणेंसहित आठमाहाप्रातिहार्य युक्त समोसरणें बिराजमान ४ इम सर्वत्रव्यारिनिक्षेपा जाणवा नम० नमस्कार हो तुसीद्व आठकर्म रहित तेहनेंकाजेंण० णमस्कारथानुं आचार्यनइं इई गुणें करीसहित ण० नमस्कारथानुं उ० उपाध्यायनें ११ अङ्ग १२ उपांग भणें भणावे ण० नमस्कारथानुं अढीद्वीपसमयक्षेत्रनइं बिषे बिहरतां पञ्चमाहाव्रतनापालणहार स० सर्वसाध नइं ॥

रीरभव्यशरीरव्यतिरिक्तोद्रव्यनमस्कारो निह्नवादीनां तेषांमिथ्यादृष्टित्वेना प्रधानत्वात्, सम्यग् दृष्टेरप्यनुपयुक्ततयानमस्कुर्वतो द्रव्यनमस्कारः राजा देर्द्रव्यार्थंवानमस्करणं तस्यैववा भयादिनादृमकादेर्नमस्करणं बलवत्तरपुरुषाक्रान्तस्य धनुरादेर्नम्रीभावोवा द्रव्यनमस्कारः भावनमस्कारोपि आगमतो नोआगमतश्च, तत्रागमतस्तदर्थज्ञातोपयुक्तो यदातुमनसोपयुक्तो वचनेन नमोर्हद्भ्यः इति ब्रुवाणः कायेनतुसंकोचितकरचरणोनमस्कारंकरोति तदानो आगमतोभावनमस्कारः, अनेनचात्राधिकारः अथ अर्हन्जिनः सोपिनामादिभेदै श्चतुर्द्धा तेच नामादयोभेदाः । नामजिणा जिणनामा ठवणजिणा पुण जिणंदपडिमाउ दव्वजिणा जिणजीवा भावजिणा समवसरत्था १ अनयागाथया अवगन्तव्याः । अत्रप्रकारान्तरेणापि निक्षेपः संभवतिपरं स विस्तरभयान्नो पदर्श्यते । एवमन्येष्वपि सूत्रालापकेष्वधिया यथा संभवंनिक्षेपः कार्यइति उक्तः सूत्रालापकनिष्पन्ननिक्षेपः॥ पदार्थःपुनरेवं ॥ नमइति निपातिकंपदं द्रव्य भावसंकोचार्थं, आहच-नेवाइयं पयं दव्वभावसंकोयणपयत्थो । नमस्करचरणमस्तकसुप्रणिधानरूपो नमस्कारोभवत्वित्यर्थः । केभ्य इत्याह-अर्हद्भ्यः अमरवरविनिर्मिताशोकाद्यष्टमहाप्रातिहार्यरूपां पूजा महंतीत्यर्हंत स्तेभ्यः, इहच-चतुर्थ्यर्थेषष्ठी प्राकृतशैली वशात्, अत्रद्रव्यसंकोचनंकरशिरः पादादि संकोचः भावसंकोचनंतु विशुद्धस्य मनसो ऽर्हदादिगुणेषु निवेशः, तत्रचभङ्गचतुष्कं द्रव्यसंकोचो नभावसंकोचो यथापालकादीनां १ भावसंकोचो न द्रव्य संकोचोयथाऽनुत्तरसुरादीनां २ द्रव्यसंकोचो भावसंकोचश्च यथाशांबस्य ३ न द्रव्यसंकोचो नभावसंकोच इति भङ्गः शून्यः ४ इहच-तृतीय भङ्गस्योपयो गः भावसंकोच प्रधानद्रव्य संकोचरूपत्वात्प्रस्तुतनमस्कारस्य,अनेनच मङ्गलांतरस्य फलव्यभिचारित्वेनानैकान्तिकत्वाद्दपहायतदन्यस्वरूपतयावश्यंभा वेनाऽभिलषितार्थसाधनसमर्थत्वादत्यन्तोपादेयं परमेष्ठिनमस्कारलक्षणं भावमङ्गलमुपात्तं स्वयंपितपःप्रभृतिष्वन्यभावमङ्गलेषुयदास्यापादानं तत् शास्त्रा दावस्यैव व्यवहारप्राप्तत्वमिति ज्ञापनार्थं, अत्रच बहुवचनं व्याप्त्यर्थं तेन सकलनिक्षेपगतजिनपरिग्रहः । अथपदविग्रहः । सचसमस्तपदेसति सम्भवती त्यत्रनोक्तः ।अथ चालना प्रत्यवस्थाने॥ नन्वर्हतां परममङ्गलत्वेननमस्काराभिधानतोप्यादौतदुपादानमुचितमिति, सत्यं स्वयंमंगलभूताअप्यर्हंतः परे षांनमनस्तवनादिनैवाभीष्टफलदाभवन्तीति ज्ञापनायार्हद्भ्योपि नमस्कारस्यादावुपन्यास इति, किंच अरिहन्ताणमित्यत्रजात्यपेक्षयैकवचनेनापि सर्वार्हं तांग्रहणेसिद्धे बहुवचनेन नामस्यापना द्रव्यभावार्हतां चतुर्णामपि तुल्यकक्षतया नमस्कार्यत्वस्य ज्ञापितत्वादेका ततः स्वमतप्राधान्यवादितया पर

स्परंविवदमानेषु नामनयादिषु प्रथमतः स्वोत्प्रेक्षितयुक्त्युपदर्शनपुरस्सरंनामनयः प्राह । तथाचप्रयोगः वस्तु स्वरूपंनाम तात्प्रत्ययहेतुत्वात् स्वधर्मवत्, इहयद्यस्य प्रत्ययहेतुस्तत्तस्यधर्मो यथाघटस्यस्वधर्मरूपापटादयो यद्यस्यधर्मोनभवति नतत्तस्य प्रत्ययहेतुः, यथाघटस्यधर्मोपटस्य-संपद्यतेघटाभिधानाद्घटेसंप्रत्ययः तस्मात्तत्तस्यधर्म इति। सिद्धश्चहेतुर्घटशब्दात् पटादिव्यावृत्त्या घटप्रतिपत्तेः प्रतीतत्वात्, किञ्चलक्ष्यलक्षण संव्यवहाराणामात्मलाभोनामायत्तएव तत्र लक्ष्यंजीवत्वादि लक्षणमुपयोगः संव्यवहारः प्रेषणाध्येषणादिरिति, तथायदिनाम्नोवस्तुधर्मत्वंनाभ्युपगम्यते तदासंशयादयोपि भवेयुः । यदुक्तं संसयविवज्जनं वाऽणञ्ञवसाउं हवाजहिच्छा एहोज्जात्थे पडिवत्ती तवत्थुधम्मोजयानाम १ अत्र व्याख्यालेशः केनचिद्घटशब्दे समुच्चारितेश्रोतुः किमयमाहेत्येवंसंशयः अथवा घटप्रतिपत्तिलक्षणोविपर्ययः अथवानजानेकिमप्यनेनोक्तमितिवस्त्वऽप्रतिपत्तिरूपोऽनध्यवसायः यदिवायदृच्छयार्थेप्रतिपत्तिः कदाचित् घटस्य कदाचित्पटस्येत्यादि ततोऽवश्यंवस्तुधर्मो नामाऽभ्युपगन्तव्यमित्यादि । तदेवंनामनयेनस्वमते व्यवस्थापिते स्थापनानयः प्राह । नाम्नोवस्तुसंज्ञामात्ररूपस्य वाच्यवाचकभाव सम्बन्धमात्रेणैवस्थितत्वाद्दूरस्थत्वमेवाऽतिदूरत्वं । स्थापनायास्तु वस्तुसंस्थानरूपायास्तादात्म्य सम्बन्धेनावस्थितत्वाद्भावप्रत्यासन्नत्वं,किंचदेशान्तरकालान्तरविप्रकृष्टत्वमपि वस्तु स्थाप्यप्रतिमादौ संनिदधाति । अन्यथा मंत्रागमेसंनिधापन्यादि मुद्राप्ररूपणानां नैष्फल्यप्रसंगः । यथाच स्थापनेंद्रःशचीकुलिशादिसाचिव्येननिर्विलम्बांतदेकतानानां भावधियं जनयति नतथानामेन्द्रस्तस्याऽनाकारत्वात् तस्मात् स्थापनैवाधानास्तु स्थापनानयेनैव मुक्तेद्रव्यनयः स्वाशयमाविर्भावयति कोहिनामस्थापनानयस्या कारग्रहो यस्मादनादिमदुत्प्रेक्षितपर्यायशृङ्खलाधारस्य मृदादिद्रव्यस्य पूर्वपर्यायमात्रतिरोभावे ऽग्रेतनपर्यायमात्राविर्भावलक्षणपरिणामव्यतिरेकेण नान्यत् किमप्याकारदर्शनं किंतूत्पादव्ययरहितं, उत्फण विफण कुण्डलिताकार समन्वितसर्प्य द्रव्यवन्निर्विकारं द्रव्यमेवास्ति नह्यत्रकिमप्यपूर्वमुत्पद्यते विपद्यमानं वाविनश्यति येनविकारः स्यात् । ननुकथमुत्पादादि रहितं द्रव्यं यावतासर्पादिके द्रव्ये उत्फणविफणादयः पर्यायाउत्पद्यमाना निवर्त्तमानाश्च साक्षादेव दृश्यन्ते इति चैत्र, आविर्भावतिरोभावमात्रपरिणामस्य कारणं द्रव्यं, यथासर्पे उत्फणाविफणावस्थयोरिति नह्यत्रापूर्वं किंचिदुत्पद्यते, किंतर्हिच्छन्नरूपतयाविद्यमान मेवाविर्भवति नाप्याविर्भूतंसद्विनश्यति किन्तुच्छन्नरूपतयातिरोभावमात्रमेवासादयति । एवंचसत्याविर्भावतिरोभावमात्रएव कार्योपचारात् कारणमस्यौपचारिकमे

व, तत्स दु गादादि रहितं द्रव्यमुच्यत इति । ननु यद्येकस्वभावं निर्विकारं द्रव्यं, तर्ह्यनन्तकालभाविनामनन्तानामप्याविर्भावतिरोभावानामेकहेतवे वकारणं किमितिन भवतीति, उच्यते-अचिन्त्यस्वभावंहि द्रव्यं तेनैकस्वभाव स्यापितस्य क्रमेणै वाविर्भावतिरोभावमात्रप्रवृत्तिः सर्प्पादिद्रव्येष्वेकस्वभा वेष्वप्युत्फणविफणादिपर्यायाणांक्रमवृत्तेः प्रत्यक्षसिद्धत्वादिति । ननुयद्येवमुत्फणविफणादिबहुरूपत्वात् पूर्वावस्थापरित्यागेनोत्तरावस्थाधिष्ठानाद नित्यता द्रव्यस्यकिमिति न भवति, उच्यते वेषांतरापन्नमटवद् बहुरूपमपि द्रव्यंनित्यमेव नहिनटोवेषांतराणि कुर्वाणोप्यनित्योभवति तस्यस्वयमविका रित्वादिति द्रव्यमेवप्रधानमिति । एवंद्रव्यनयेनस्वमतेव्यवस्थापितं भावनयः प्राह ॥ भावेभ्यः पर्यायापरनामभ्योऽर्थांतरभूतंकिमपिद्रव्यं नास्ति किन्तुभाव एव यदिदंदृश्यते त्रिभुवने वस्तुनिकुरंबमिति, यतः प्रतिक्षणंभवनमेवानुभूयते किमुक्तंभवति भावस्यैकस्यापत्तिः परस्यतुविपत्तिः । नचभावापत्तिविप त्ती हेत्वपेक्षे यश्चहेतुः सएवद्रव्यमितिवाच्यं, नहिभावोघटादिरुत्पद्यमानोभावांतरं मृत्पिण्डादिकमपेक्षते, किंतुनिरपेक्षमेवोत्पद्यते अपेक्षाहिविद्यमानस्यै वभवति, नचमृत्पिण्डादिकारणकालेघटादिकार्यमस्ति अविद्यमानस्यचापेक्षायांखरविषाणस्यापि तथाभावप्रसङ्गात्, यदितत्रोत्पत्तिलक्षणात् प्रागपिघ टादिरस्ति तर्हिकिंमृत्पिण्डाद्यपेक्षया तस्य रचतएवविद्यमानत्वात्, अथोत्पन्नः सन्घटादिः पश्चात् मृत्पिण्डादिकमपेक्षते हंत तदिदंमुंडितशिरसोदिन शुद्धिपर्यालोचनं यदिहिस्वतएव कथमपिनिष्पन्नोघटादिः किंतस्यपश्चात् मृत्पिण्डाद्यपेक्षयेति । तथाविनाशोपिनिर्हेतुकएवमुद्गरोपनिपातादि सव्यपेक्षा एवघटादयो विनाशमाविशन्तोदृश्यन्ते नहिनिर्हेतुका इति चेन्नैवं विनाशहेतोरयोगात्, तथाहि-मुद्गरादिनाविनाशकालेकिंघटादिरेव क्रियते आहोस्वि त्कपालादय उत तुच्छरूपो ऽभाव इति त्रयीगतिस्तत्र नतावद्घटादि स्तस्य स्वहेतुभूतकुलालादिसामग्रीत एवोत्पत्तेः नापिकपालादयस्तत् करणेघटा देस्तदवस्थत्वप्रसङ्गात्, नह्यन्यकरणे ऽन्यस्यनिवृत्तिर्युक्तिमती एकनिवृत्तौशेषभुवनत्रयस्यापिनिवृत्तिप्रसङ्गात् नापितुच्छरूपोऽभावः खरशृङ्गस्येव नीरू पत्वतस्यकर्त्तुमशक्यत्वात् करणे वा घटादेस्तदवस्था प्रसङ्गादन्यकरणे ऽन्यनिवृत्य ऽसम्भवादिति विनाशेमुद्गरादिकं सहकारिकारणमेव नतुतज्जनकत्वं घटादिस्तुक्षणिकत्वेननिर्हेतुकः स्वयमेवनिवर्त्तते तस्माज्जन्मविनाशयोर्न किंचित्केनचिदपेक्ष्यते अपेक्षणीयाभावाच्च न किंचित्कस्यचित्कारणं तथाचसति न किंचिद्द्रव्यं किन्तुपूर्वापरीभूताः परापरक्षणरूपाः पर्याया एवसन्तीत्यत्रनामादिनयाधिकारे बहु वक्तव्यं तत्तुविशेषावश्यकादव सेयमिति । एवमसम्पूर्णार्थं

याहित्वाद्गजमात्रभिन्न २ देशसंस्पर्शने बहुविध विवादमुखरजात्यंधवृन्दवद्विवदमाने नयवृन्देमिथ्यादृष्टित्वमुद्भाव्यतन्निरस्करणाय सर्वनयसमूहात्मकः स्याद्वादसुधारसास्वादरसिकतामनुभवतामयमुद्गार-स्तथाहि लोकेयत्किमपि घटपटादिकं वस्त्वस्तितत् सर्वमन्योन्य सापेक्षनामादिचतुष्टयात्मकं मधु नः केवलनामनयंवा केवलाकाररूपंवा केवलद्रव्यताश्लिष्टंवा केवलभावात्मकंवा यतः एकस्मिन्नपिशचीपत्यादौ इंद्रइति नाम। तदाकारस्तुस्थापना उत्तरावस्थाकारणत्वंतुद्रव्यत्वं दिव्यरूपसम्पत्तिकुलिशधारणपरमैश्वर्यादिसंपन्नत्वंतु भाव इति। नामादिचतुष्टयमपिप्रतीयते एतदर्थसंवादका उत्तराध्ययनवृहद्वृत्त्युक्ताः श्लोकाअपि यथा सन्निविष्टेवसर्वोपिविषयाणांव्यवस्थितिः संवेदनं घनानामादिविकलंनानुभूयते, तथाहि-घटोयमितिनामैतत् पृथुबुध्नादिचाकृतिः मृद्द्रव्यंभवनंभावोघटेदृष्टंचतुष्टयं २ तत्रापिनामानाकारमाकारोनामनोविना ॥ तौविनातौविनान्योन्यमुत्तरावपिसंस्थितौ ३ मयूरांडरसेयद्वद्वर्णानीलादयः स्थिताः। सर्वेष्वन्योन्यमुन्मि श्रास्तद्वन्नामादयोघटे ४ इति तदेवं सर्ववस्तुनामादिचतुष्टयात्मकमेव तेनात्रनामस्थापना द्रव्यभावार्हतश्च स्वारोपितमस्कार्याएवेत्यागतमिति। अत्रकश्चिदग्राह्यनामधेयो भक्षितलशुनपिशुनभूतमुद्गिरति भवतुनाम वाच्यवाचकभावसम्बन्धेन भावसन्निहितत्वान्नामोनमस्कार्यत्वं स्थापनायास्तुभावविप्रकृष्टत्वेनतत्कथमिति चेदुच्यते तस्याअपिजिनबुद्धेरुत्पादकत्वादिभिर्हेतुभिः सुतरांभावासन्नत्वान्नमस्कार्यत्वमुपपन्नमिति मामुग्धमुधानंततीर्थकृतदनुज्ञातस्थापनापलापपापपङ्किलतांकलय कलयसिनकिं स्थापनाद्रोणाचार्यसम्यग्विनयोपनतांजगदतिशायिनीमर्जुनसंतर्जिनींधनुर्वेदसिद्धिं तथाच प्रतिक्रमणादि वंदनक प्रदानेरजोहरणादिकं गुरुचरणतयाव्यप दिशसि स्थापनानिक्षेपंचापलपसि आहोवद्द्रव्याघातस्तव अपिचचित्रार्पितनिजजनकवदनमुपानद्भ्यां प्रहरतेनराय कुप्यसि चित्रन्यस्तकुंभस्तनीं निध्यायन् दृप्यसि मिथ्यावादं कुर्वंस्तथापिन तृप्यसिकिमपरादुत्तव पुरुषधुरत्वं स्थापनया तथावदामिसुहृद्भावेन भावकरणतयाद्रव्यमपि स्वीकुरु नमस्कार्यतया, अन्यथा पद्मनाभादीन् द्रव्यजिनान् नमस्कुर्वतः द्रव्यनृपत्वभावीराजेति बुध्याउपचरतश्च तवार्हन्नारीश्वर वेषविडंबनासमापतिता, तेनत्यजटिट्टिभमानं भज श्रीजिनाज्ञां सबहुमानं ततस्तवापियुक्तियुक्तं सर्वेषामर्हन्निक्षेपाणां नमस्कार्यत्वमित्यलंप्रसङ्गेन॥ अथ प्रकृतं प्रस्तुमः उक्तः सूत्रस्पर्शिकनिर्युक्त्यनुगमः तदेवंभूतलसूत्रमधिकृत्य सूत्रानुगम सूत्रालापकनिक्षेप सूत्रस्पर्शिकनिर्युक्त्यनुगमनयानुपदर्शिताः एवं प्रतिसूत्रं स्वयमनुसरणीयं। अथयस्यांनगर्यां यस्मिन्नुद्याने यथा भगवान् गौ

तमस्वामी भगवतः श्री मन्महावीरस्यांते पृष्टवान् यथाच तस्मै भगवान् व्यागृणातिस्म तथोपोद्घातमुपदिदर्शयिशुरिदमाह ॥ इतिअत्यव्याख्यातेइ ति प्राकृतशैलीवशात्तस्मिन्निति द्रष्टव्यं, अस्यायमर्थो यदा भगवान् विहरतिस्म तस्मिन्नितिकाले वर्त्तमानावसर्पिणी चतुर्थारकविभागरूपे उभयत्रापिण मिति वाक्यालङ्कारे अथवासप्तम्यर्थेतृतीया आर्षत्वात्, यदाहुः श्रीहेमसूरिपादाः स्वप्राकृत लक्षणे आर्षेतृतीयापिदृश्यते तेणंकालेणं तेणंसमएणं तस्मि न्काले तस्मिन्समयेइत्यर्थः तेणंसमएणं तिसमयो ऽवसरवाची तथाच लोकेवक्तारोनाद्याप्येतस्य समयोवर्त्तते नास्त्यस्यावसरइत्यर्थः तस्मिन्निति यस्मि न्समयेभगवान् प्रस्तुतांजम्बूद्वीप वक्तव्यतामचकथत् तस्मिन् समये मिथिलानामनगरी अभवत्। नन्विदानीमपिसानगरी वर्त्तते ततः कथमुक्तमभवदि त्युच्यते वक्ष्यमाणवर्णकग्रन्थोक्तविभूतिसमेता तदैवाभवत्। ननुविवक्षित प्रकरणकर्तुः प्रकरणविधानकाले एतदपिकथमवसेयमिति, चेदुच्यते अयंचाव सर्पिणीकालोऽस्यांच प्रतिक्षणं शुभाभावा हानि मुपगच्छन्ति, एतच्च सुप्रतीतं जिनप्रवचन वेदिना मतोऽभवदित्युच्यमानं नविरोधभाक् संतत्या नगर्यावर्णकमाह रिद्धत्थिमियसमिद्धेत्ति ऋद्धाभवनैः पौरजनैश्चातीववृद्धिमुपागता ऋधुवृद्धाविति वचनात् स्तिमितास्वचक्रपरचक्रादिसमुत्थभयकल्लोल मालावर्जिता समृद्धाधनधान्यादि विभूतियुक्ता ततः पदत्रयस्यकर्मधारयः वण्णउत्ति ऋद्धस्तिमितसमृद्धा इत्यादिक औपपातिकोपाङ्गप्रसिद्धः समस्तोपि

तेणं कालेणं तेणं समएणं मिहिलाणामं णयरी होत्था, रिद्धत्थिमियसमिद्धा वण्ण, तीसेणं मिहिलाए णयरीए

॥ तस्मिन्काले तस्मिन्समये मिथिला नाम नगरी अभवत् ऋद्धस्तिमितसमृद्धा, वर्णकः, तस्या मिथिलायानगर्याः ॥

तेणंकालेणं ॥ वांवाक्यालङ्कारे, ते अवसर्प्पिणी कालना दुखमसुखम नाम चौथा आरानेविषइ ॥ तेणं समयेणं ॥ वांवाक्यालङ्कारे, जेसमयनेविषे भग वंत कथा कहेते समये ॥ महिलाणामं णयरीहोत्था ॥ मिथिला, एहवेनामे-नगरीहूई, इहां वर्त्तमानकाले मिथिला नगरीछे तो पिण अतीतका ले नगरीनो जेहवो वर्णक-हतो, तेहवो वर्त्तमान काले नहीं अवसर्प्पिणीकालमाटेहूयोकहौ ॥ रिद्धित्थिमिअसमिद्धा ॥ ऋद्धि वृद्धिवंतस्वचक्रादिभयर हितधनादिके॥वण्णउ॥वर्णकतेउवाइसूत्रथी जाणवो॥तीसेणंमहिलाएणयरीएवण्णिया ॥ वांवाक्यालंकारे इमसर्वेजाणवोतेहनेराजां मिथिला नामानगरीनै

॥ टीका॥

वर्णकोद्रष्टव्यः, अत्रालिखनंतुग्रन्थगौरवभयादिति तस्याणमिति पूर्ववत् मिथिलायानगर्या बहिस्तात् उत्तरपौरस्त्ये उत्तरापूर्वान्तरालरूपोदिग्भाग ईशानकोण इत्यर्थः अत्रएकारोमागधभाषानुरोधतः प्रथमैकवचनप्रभवः यथा-कयरे आगच्छइदित्तरूवेइत्यादौ अत्रास्मिन्नुत्तरपौरस्त्ये दिग्विभागे माणिभद्रंनाम्नाचैत्यमभवत् चितेर्लेप्यादिचयनस्यभावः कर्मवाचैत्यं तच्चसंज्ञाशब्दत्वाद्देवता प्रतिबिम्बे प्रसिद्धं ततस्तदाश्रयभूतंयद्देवताया गृहं तदप्युपचाराच्चैत्यमुच्यते तच्चेहद्रष्टव्यंतरायतनंद्रष्टव्यं । ननुभगवतामर्हतामायतनं तस्यचचिरातीतमित्यादिवर्णकस्तत् परिक्षेपिवनषंडवर्णकसहित-औपपातिकतोऽवसेयः । तस्यांमिथिलायांनगर्यांजित शत्रुर्नामराजातस्य सकलस्त्रीगुणधारिणी धारिणीनामदेवी कृताभिषेकापट्टराज्ञीइत्यर्थः । उभयत्राप्यभवदितिशेषः । वस्मउत्ति अत्रराज्ञोमहयाहिमवंतमहंते त्यादिकोराज्ञयाश्च सुकुमालपाणिपयेत्यादिकोवर्णको प्रथमोपाङ्गप्रसिद्धोऽभिधातव्यः॥अथात्रयज्जातं तदाह तेणंकालेणं तेणंसमएणंति। पूर्ववत् स्वामीतिसमर्थविशेषणं विशेष्यमाक्षिपति, तेनात्रश्रीमन्महावीरः समवसृतइत्यर्थः । आत्यन्तिकं स्वामित्वं

॥ मूल ॥

बाहिया उत्तरपुरत्थिमे दिसीभाए एत्थणं माणिभद्दे णामं चेइए होत्था वण्णओ, ॥
जियसत्तूराया धारिणी देवी वण्णओ, तेणं कालेणं तेणं समएणं सामी समोसढे ॥

॥ अनुवाद ॥

बाह्ये उत्तरपौरस्त्ये दिग्भागे अत्रमाणिभद्रम् नाम्नाचैत्यम् अभवत् वर्णकः, जितशत्रूराजा धारिणीदेवी वर्णकः, तस्मिन्काले तस्मिन्समये स्वामी समवसृतः

॥ भाषा ॥

बाहिर ॥ उत्तरपुरत्थिमे दिसीभाए ॥ उत्तर अने पूर्वना दिशिना भाग विभागनेविषे एतले ईशानकोणनेविषे ॥ एत्थणं ॥ इहांछेअर्थात्इशानकोणनेविषे माणिभद्देणामं चेइए होत्था ॥ माणिभद्रएहवेनामेचैत्य माणिभद्रयक्षनोदेहरोतेनामे वनखण्ड जाणवा ॥ वण्णओ ॥ वर्णनजाणवा उवाइसूत्रथी ॥ जियसत्तूराया॥ तेनगरीने विषे जितसत्रूनामे राजा॥ धारिणि देवी॥ तेहनें धारणीनाम देवी छे॥ वण्णओ ॥ उवाइसूत्रथी वर्णनजाणवो॥ तेणं कालेणं॥ तेकालने विषइ, चोथा आराने विषे, तेणं समएणं तेसमयेने विषे, भगवन्त कथा कहे तेसमय,॥ सामी समोसढे श्रीमहावीरस्वामी समोसर्या परिसाणिग्गया

तस्यैवत्रिभुवनविभोरिति, अत्रच यथानिःप्रतिमप्रातिहार्यादिसमृद्धासमन्वितो,यथाच-श्रमणादिपरिवारेणापरिवृतः समवसृतः, यथाच-समवसरणेक स्तथौपपातिक ग्रन्थादवसेयं, पर्षन्निर्गता मिथिलाया नगर्यावास्तव्योजनः समस्तोपिभगवन्तमागतं श्रुत्वाविवन्दिषयास्वस्मात्स्वस्मादाश्रयादिनिर्गतइ त्यर्थः । तन्निर्गमनसूत्रंच । तएणंमहिलाएगयरीए सिंघाडगेत्यादिकं जावपंजलिडापज्जवासन्तीति पर्यंतमौपपातिकगत मवगंतव्यं, तस्याः पर्षदः पुरतो निःशेषजनभाषापरिणामिन्याऽर्द्धमागधभाषयाधर्मः कथितः, सचैवं अत्थिलोए अत्थिलोए अत्थिजीवा अत्थिअजीवाइत्यादि । तथाजहजीवाबुज्झंतीमुझं तीजहयसंकिलिस्संति जहदुरक्काणं अंतंकरिंति केई अपडिबुद्धा १ अहदुहट्टियचित्ता जहजीवादुरकसागरमुचिंति जहवेरग्गमुवगया कम्मसमुग्गंविहा डेंति २ जहरागेण कडाणं कम्माणंपावनुफलविवागो जहयपरिहीणकम्मा सिद्धासिद्धालयमुचितिहा आइरकइति । पर्षत् प्रतिगता स्वस्थानंगता प्रति गमनसूत्रमपि तएणंसा महइमहल्लिया परिसेत्यादि तामेव दिसंपडिगया उत्तियपर्यंतं ततएवोपाङ्गादवगंतव्यमिति । अथपर्षत्प्रतिगमनानन्तरंयज्जातं तदाह ॥ तेणंकालेणंति तस्मिन् कालेभगवतोधर्मं देशनाश्रुपरमकाले तस्मिन् समये पर्षत्प्रतिगमनावसरे, आम्यतितपस्यति नानाविधमिति श्रमणस्तस्य भगः समग्रैश्वर्यादिलक्षणः सोऽस्यास्तीतिभगवान् तस्य सूरवीरविक्रान्तौ वीरयतिकषायान् प्रतिविक्रामतिस्मेतिवीरः महांश्चासौवीरश्च महावीरस्तस्य

॥ मूल ॥

परिसा णिग्गया धम्मो कहिनु परिसा पडिगया ॥ तेणं कालेणं तेणं समएणं समणस्स नगवनु महावीरस्स

॥ अनुवाद ॥

पर्षन्निर्गता धर्मःकथितः पर्षत्प्रतिगता तस्मिन्काले तस्मिन्समये श्रमणस्यभगवतो महावीरस्य

॥ भाषा ॥

पर्षदिति मिथिला नगरीसंबंधिनी मनुष्य बांदवा निकल्या, परषदा बारइ१२ जाणवा, च्यारदेवनी च्यारदेवीनी चतुर्विधसंघ ॥ धम्मो कहिनु ॥ भगवंते थर्मोपदेशकरयो तंजहां-अत्थिलोये अत्थिलोये अत्थिजीवा अत्थि अजीवा इत्यादि॥ परिसा पडिगया॥ पर्षदा संबंधिलोक सर्वदेव देवीआपणास्थानक ने विषै गया ॥ तेणंका० ॥ तेकाल नेविषे ॥ तेणंस० ॥ ते समयेने विषइ ॥ समणस्सभगवनु महावीरस्स ॥ श्रमणतपस्वी भगवंत ज्ञानवंत महिमा

॥ टीका ॥

ज्येष्ठः प्रथमः अन्तेवासीशिष्यः अनेनपदद्वयेनतस्यसकलसंघाधिपतित्वमाह । इन्द्रभूतिरितिमातापितृकृतनामधेयः णामन्ति विभक्तिविपरिणामेनमान्ने त्यर्थः अन्तेवासीकिल विवक्षायां, श्रावको पिस्यादित्यतआह । नास्यागारं गृहंविद्यत इत्यनगारः, अथच्चविगीतगोत्रोपिस्यादतआह गौतमोगोत्रेणगौत माङ्गयगोत्रज इत्यर्थः अयंचतत्कालोचितदेहमानापेक्षया न्यूनाधिकदेहोपिस्यादिति सप्तोत्सेधः सप्तहस्त प्रमाणकायोच्चायः मयूरव्यंसकादित्वात् मध्य पदलोपः सप्तहस्तोर्जुनशब्दवत् । अथच्चलक्षण हीनोपिस्यादिति समचतुरस्रः समाः शरीरलक्षणशास्त्रोक्त प्रमाणाविसंवादिन्यश्चतस्रोऽश्रयश्चतुर्दिग्विभागो पलक्षिताः शरीरावयवायस्यसतथा, अन्येत्वाहुः समाअन्यूनाधिकाश्चतस्रोप्यश्रयोयस्येति पूर्ववत्०अश्रयश्चपर्यङ्कासनोपविष्टस्यजानुनोरंतरं आसनस्यल लाटोपरिभागस्यचान्तरं दक्षिणस्कंधस्यजानुन श्चान्तरं वामस्कंधस्यदक्षिणजानुन श्चान्तरमिति यावच्छब्दादिदमवसेयं । वज्रंरिसहनारायसंघयणे कणग पुलगनिघसपम्हगोरे उग्गतवेदित्ततवे उराले घोरे घोरगुणे घोरतवस्सी घोरबंभ चेरवासी उच्छूढसरीरे संखित्तवि उलतेउलेसे चउदसपुव्वी चउणाणोव गए सव्वरकरसन्निवाई समणस्सभगवउ महावीरस्स अदूरसामन्ते उट्ढंजाणूं अाहसिरेझाणकोट्ठोवगए संजमेणंतवसा अप्पाणं भावेमाणेविहरइतएणं सेभगवं गो यमेजायसड्ढेजायसमए जायकोऊहल्ले उप्पन्नसड्ढे३ सञ्जायसड्ढे ३ समुप्पन्नसड्ढे ३ उट्ठाएउट्ठेइत्ता २ जेणेवसमणेभगवंमहावीरे तेणेवउ वागच्छइ उवागच्छित्ता समणं भगवं महावीरं तिरकुत्तो आयाहिणपयाहिणं करेइ करित्ता वन्दइ णमंसइ वन्दित्ता णमंसित्ता णच्चासन्ने नाइदूरे सुस्सूसमाणे

॥ मूल ॥

जिट्ठे अंतेवासी इंदभूईणामं अणगारे गोयमगोत्तेणं सत्तुस्सेहे समचउरंसे जाव तिखुत्तो आयाहिणपयाहिणं

अनुवाद ॥

ज्येष्ठोऽन्तेवासी इन्द्रभूतिर्नाम्नाऽनगारः गोतमोगोत्रेण सप्तोत्सेधः समचतुरस्रः यावत् त्रिकृत्वः आदक्षिणप्रदक्षिणम्

॥ भाषा ॥

वंत श्री महावीरस्वामिनो ॥ जिठ्ठे अंतेवासि ॥ बडो समिपने विषेरहणे वारो प्रथम सिष्य ॥ इंद्रभूईणामं॥ इंद्रभूति एहवों मातापीतानों दीधो नाम छे तेहनो ॥ अणगारे॥ घर रहित अर्थात् साधु॥ गोयमगोत्तेणं ॥ गोतम गोत्रनो उपनों । सत्तुस्सेहे॥ सातहात ऊंचो सरीर छे जेहनों । समचउरंसे ॥ सकल पुरुष लक्षण संयुक्त समतुल्यच्यारे अंसछे जेहना ॥ जाव ॥ यावत् ॥ तिखुत्तो आयाहिण पयाहिणं करेइ त्ता ॥ तीनवार दाहिणो हाथ

णमंसमाणे अभिमुहे विणएणं पंजलिअहे पज्जुवासमाणे एवं वयासी। अत्रव्याख्या अनन्तरोक्तविशेषणो हीनसंहननोपिस्यादतआह। वज्जत्ति वज्रंऋषभ नाराचसंहननंत्रनाराचमुभयतोमर्कटबन्धः ऋषभस्तदुपरिवेष्टनपट्टः कालिका अस्थित्रयस्यापि भेदकमस्थि एवंरूपंसंहननंयस्यसतथा। अयञ्चनिन्द्यव र्णोपिस्यादतआह कणगत्ति कनकस्यसुवर्णस्य पुलकोलवस्तस्य योनिरिव रूपः तद्वत् तथापनहत्ति अवयवेसमुदायोपचारात्। पद्मगौ ऽदेन पद्मकेसरागृह्यंते तद्वद्गौरइति अयञ्चविशिष्टचरणरहितोपिस्यादतआह उग्गम०धृष्यंतपोऽनशनादियस्यसतथा यदन्येनचिन्तितुमपिनशक्य ते तद्विधेनतपसायुक्तइत्यर्थः तथादीप्तंजाज्वल्यमानं दहनइवकर्मवनगहनसमर्थतयाज्वलितंतपोधर्मध्यानादियस्यसतथा तथातप्तंतपोयेनसतथा एवं हितेनतप्तंतपो येनसर्वाण्ययशुभानिकर्माणि भस्मसात् कृतानीति, तथामहत् प्रशस्तमाशंसादिदोष रहितत्वात्तपोयस्यसतथा तथाउदारः प्रधानः अथ वाउरालोभीमः उग्रादिविशेषण विशिष्टतपः करणतयापार्श्वस्थानामत्यसत्वानां भयानक इत्यर्थः, तथाघोरोनिर्घृणः परीषहेन्द्रियादिरिपुगणविनाशनसमा श्रित्यनिर्दयइत्यर्थः।अन्येतु आत्मनिरपेक्षंघोरमाहुः।तथाघोराइतरैर्दुरनुचरागुणानूलगुणादयोयस्यसतथा तथाघोरैस्तपोभिस्तप्पी तथाघोरंदारुणमन्यस त्वै र्दुरनुचरत्वात् तद्ब्रह्मचर्यंतत्रवस्तुशीलंयस्यसतथा, उच्छूढंउज्झितं संस्कारपरित्यागात्शरीरंयेनसतथा तथासंक्षिप्ताशरीरांतर्गततत्वेन ह्रस्वतांगतावि पुलाविस्तीर्णा अनेक योजनप्रमाणक्षेत्राश्रितवस्तुदहनसमर्थत्वात्तेजोलेश्या विशिष्टतपोजन्यलब्धिविशेषप्रभावतेजोज्वालायस्य सतथा चतुर्दशपूर्वाणि विद्यन्तेयस्य सतथा तेनतेषांरचितत्वात्, अनेनतस्य श्रुतकेवलितामाह सचाऽवधिज्ञानादिविकलोपिस्यादत आह-चतुर्ज्ञानोपगतः मतिश्रुतावधिमनः पर्यायरूपज्ञानचतुष्कसमन्वित इत्यर्थः उक्तविशेषणद्वयकलितोपिकश्चि न्नसमग्रश्रुतविषयव्यापिज्ञानो भवति। चतुर्दश पूर्ववित्पदांषट्स्थानपतितत्वेन अ वगात्, अतआह। सर्वैर्यते अक्षरसन्निपाताश्चाक्षरसंयोगास्तेज्ञेयतयासन्त्यस्यसतथा, किमुक्तं भवतिया काचिज्जगतिपदानुपूर्वीवाक्यानु पूर्वीवा सम्भ वतिताः सर्वा अपिजानाति। अथवा अध्यात्मिश्रुतिसुखकारीणि अक्षराणि साङ्गत्येनमितरांवंदितुंशीलमस्येतिसतथा एवंगुणविशिष्टो भगवान् विनयरा शिरिवसाक्षादिति कृत्वाशिष्याचारत्वाच्च श्रमणस्य भगवतो महावीरस्य अदूरसामन्ते विहरतीति योगः, तत्रदूरं विप्रकृष्टं सामन्तंसन्निकृष्टंतत्प्रतिषेधा ददूरसामन्तं तत्रनातिदूरे नातिनिकटे इत्यर्थः। किंविधः सन् तत्रविहरतीति ऊर्ध्वंजानुनीयस्य सतथा शुद्धपृथिव्यासनवर्जनादौ प्रग्रहिकनिषद्यायाञ्च

॥ टीका ॥

भावाद्वोत्कटिकासन इत्यर्थः अधः शिरामोर्द्धतिर्यग्वाविक्षिप्तदृष्टिः किन्तुनियतभूभागनियमितदृष्टिरित्यर्थः, ध्यानंधर्म्यं शुक्लंवा तदेवकोष्टः कूशूलोध्वा नकोष्टस्तमुपागतः यदाहि कोष्टकेधान्यंनिक्षिप्तम विप्रसृतं भवति एवंभगवानपिध्यानतो ऽविप्रकीर्णेन्द्रियान्तःकरणवृत्तिरित्यर्थः संयमेनपञ्चाश्रवनि रोधादिलक्षणेनतपसाऽनशनादिना चशब्दोऽत्रसमुच्चयार्थोलुप्तो द्रष्टव्यः । संयमतपसोर्ग्रहणंज्ञानयोः प्रधानमोक्षाङ्गत्वख्यापनार्थं प्राधान्यंचसंयमस्यनव कर्मानुपादानहेतुत्वेन, तपसश्च पुराणकर्मनिर्जराहेतुत्वेन, भवतिचाभिनवकर्मानुपादानात्पुराणकर्मक्षपणाच्चसकलकर्मक्षयलक्षणोमोक्षइति आत्मानं भावयत् वासयन् विहरतितिष्ठतीत्यर्थः । ततोध्यानकोष्ठोपगततया विहरणादनन्तरं णमिति वाक्यालङ्कारे से इति प्रस्तुत परामर्शार्थः अनेनगतार्थ त्वेयत्पुनर्भगवान् गौतमइत्युपादानं तत्पुनः पुनरुपात्तं पापापनोदकं भगवतो गौतमस्यनामेति सुगृहीतनामधेयत्वमाह जायसड्ढेइत्यादि जातश्र द्धादिविशेषणः सन्तुष्टतीतियोगः तत्रजाताप्रवृत्ता श्रद्धाइच्छावत्यमाणार्थतत्त्वज्ञानं प्रतियस्यसतथा तथाजातः संशयोयस्यसतथा संशयोनामा ऽनवधारि तार्थज्ञानं सचैवं तीर्थांतरीयैर्जम्बूद्वीपवक्तव्यता ऽन्यथा ऽन्यथो पदिश्यते ततः किन्तत्त्वमिति संशयः तथाजातं कुतूहलंयस्यसतथा जातौत्सुक्यइत्यर्थः कथमेनांजम्बूद्वीपवक्तव्यतांसर्वज्ञो भगवान् प्रज्ञापयिष्यतीति । तथा उत्पन्ना प्रागभूतासती भूता श्रद्धायस्यासौ अथजातश्रद्धइत्येतावदेवास्तु किमर्थमु त्पन्नश्रद्धइत्यभिधीयते प्रवृत्त श्रद्धात्वेनैवोत्पन्न श्रद्धात्वस्यलब्धत्वात् नह्यनुत्पन्नाश्रद्धाप्रवर्त्तते इत्यत्रोच्यते हेतुत्वप्रदर्शनार्थं हेतुत्वप्रदर्शनंच उचितमेव वाक्यालङ्कारत्वात्तस्य, यथाहुः प्रवृत्तदीपामपवृत्तभास्करां प्रकाशचन्द्रांबुबुधेविभावरीं, इहयद्यपि प्रवृत्तदीपत्वादेवा ऽपवृत्तभास्करत्वमवगतं तथाप्यप वृत्तदीपत्वादेर्हेतुतयोपन्यस्तमिति सम्यक् तथा उपसंसंये उपासकोतुहल्लेइति प्राग्वत् तथा सञ्जायसड्ढे इत्यादिपदषट्कंप्राग्वत् नवरमिहसमश ब्दः प्रकर्षादिवचनोवेदितव्यः । अन्येत्वाहुः-जातश्रद्धत्वाद्यपेक्षयोत्पन्न श्रद्धत्वाद्यः समानार्थ विवक्षितार्थस्य प्रकर्षप्रतिपादनायरुक्ति मुखेनग्रन्थकृतो क्ताः नचैवंपुनरुक्तदोषो यदाह-वक्ताहर्षभरादिभि राक्षिप्तमनारुक्तंवस्तुयानिन्दन् । यत्पदमसकृत् ब्रूते तत्पुनरुक्तंनदोषायेति १ उत्थानमुत्था उर्द्धंवर्त्तनं तया उत्तिष्ठति ऊर्द्धीभवति इहऊर्द्धं इत्युक्ते क्रियारम्भमात्रमपि प्रतीयेत तथावक्तुमुत्तिष्ठत इति ततस्तद्व्यवच्छेदार्थ मुक्तमुत्थायेति उपागच्छतीत्युक्त रक्रियापेक्षयानुत्थानक्रियायाः पूर्वकालता भिधानायोत्थायोत्थायेतिरुक्ता प्रत्ययेननिर्दिश्यति यद्यपिद्वयोः क्रिययोः पूर्वोत्तरनिर्देशाच्यां पूर्वकाल आक्षेपल

॥ टीका॥

ज्यएव तथापिनुंजानो व्रजतइत्यादौद्वयोः क्रिययोर्योगपद्यदर्शनादानंतर्य सूचनार्थ मित्यमुपन्यासः । उत्थानक्रियासव्यपेक्षत्वादुपागमन क्रियाया इति तथाप्राकृतशैलीवशादव्ययत्वाद्वायेनेति यस्मिन्नित्यर्थेद्रष्टव्यं यस्मिन्नेवदिङ्भागे श्रमणोभगवान् महावीरोवर्त्तते तेणेवत्ति तस्मिन्नेवदिग्भागे उपागच्छति इहवर्त्तमानकालनिर्देशस्तत्कालापेक्षया उपागमनक्रियाया वर्त्तमानत्वात् परमार्थतस्तूपागतवानिति द्रष्टव्यं, उपागम्यच श्रमणं भगवन्तं महावीरं कर्म तापन्नंत्रिकृत्वस्त्रीन्वारान् आदक्षिणप्रदक्षिणंकरेत्ति आदक्षिणाद्दक्षिणहस्तादारभ्य प्रदक्षिणः परितोभ्राम्यतो दक्षिणएव आदक्षिण प्रदक्षिणस्तंकरोति कृत्वा वन्दतेवाचास्तौति नमस्यतिकायेनप्रणमति वन्दित्वानमस्यित्वाचानेनात्यासन्नो इति निकटोऽवग्रहपरिहारात् अथवा नात्यासन्नेस्थाने वर्त्तमान इति गम्यं, तथानैवातिदूरोऽतिविप्रकृष्टो ऽनौचित्यपरिहारात् अथवा नातिदूरेस्थाने वर्त्ततइति गम्यं शुश्रूषन् भगवद्वचनानि श्रोतुमिच्छन् अभिभगवन्तं लक्षीकृत्य मुखमस्येत्यभिमुखः विनयेनप्रकृष्टः प्रधानोललाटतटघटितत्वेनांजलिः संयुतहस्तमुद्राविशेषः कृतोविहितोयेन सप्रांजलिकृतः आर्हितान्यादेराकृतिगणतयाकृतशब्दस्यपरनिपातः पर्युपासीनः सेवमानः अनेनविशेषणकदम्बकेनच श्रवणविधिर्दर्शितः, यदाह-निद्दाविगहापरिवज्जिएहिं गुत्तेहिं पज्जलिउडेहिं भत्तिबहुमाणपुव्वं उवउत्तेहिंसुणेयव्वं १ एवंवक्ष्यमाण प्रकारेणावादीत् जम्बूद्वीपवक्तव्यताविषयंप्रश्नमुक्तवान् जम्बूद्वीप प्रज्ञप्ति मातृकारूपचतुःप्रश्नींहृदयाभिसंहितां भगवत्पुरतोवाग्योगेन प्रकटीचकारेत्याशयः । ननुगौतमोपिचतुर्दश पूर्वधारीसर्वाक्षर सन्निपाती संभिन्नश्रोताः सकलप्रज्ञापनीयभाव परिज्ञानकुशलः सूत्रतश्च प्रवचनस्यप्रणेता सर्वज्ञदेशीयएव उक्तंच-संखाई एविभंसाहइ जंवापुरोउपूच्छिऊजानयण अणाइसेसीवियाणई एसछउमच्छो इति कथन्तस्य संशयसम्भवः तदभावाच्चकथं पृच्छतीति उच्यते यद्यपिभगवान् गौतमोयथोक्त गुणविशिष्टस्तथापितस्या ऽद्यापि

॥ मूल ॥

करेइ२त्ता॥ वंदई , णमंसई वंदित्ता णमंसित्ता

॥ अनुवाद॥

करोति २ कृत्वा,, वन्दति नमस्यति वन्दित्वा नमस्यित्वा

॥ भाषा ॥

थकी आरंभि प्रदक्षिण चोफेर करें २ करीनें ॥ वंदई ॥ स्तुतिकरे वचनें करें॥ णमंसई॥काया थी करी नमस्कार करें ॥ वंदित्ता॥ वादिनें ॥ णमंसित्ता ॥

॥ टीका

छद्मस्थत्वात् कदाचिदनाभोगोपिजायते । यंतउक्तं नहिनामानाभोगश्छद्मस्थस्यैवकस्यचिन्नास्ति ज्ञानावरणीयंहि ज्ञानावरणप्रकृतिकर्म ततो ऽनाभोग सम्भवादुपपद्यते भगवतो गौतमस्यापिसंशयः, नचैतदनार्षं यदुक्तमुपासकदशासु आनन्द श्रमणोपासकावधिनिर्णयविषये । तएणंभंन्तेकिं आणंदेणं समणोवासएणं तस्सठाणस्स आलोइयव्वं जाव पडिक्कमियव्वं उदाहुभए तएणं गोअमाइं समणेभगवं महावीरे गोअमं एवंवयासी तुमंचेवणंतस्सठाणस्स आलोयाहिं जाव पडिक्कमाहिं आणंदंच समणोवासयं एयमठंखामेहिं तएणं समणेभगवं गोअमे समणस्स भगवउ महावीरस्स अंन्तिए एअमठंविणएणं पडिसुणेइ पडिसुणित्ता तस्सठाणस्स आलोएइ जावपडिक्कमइ आणंदंच समणोवासयं एअमठखामेइति । अथवा भगवानपगतसंशयोपि स्वकीयबोधसंवादार्थमज्ञलोकबोधनार्थं शिष्याणांवा स्ववचसि प्रत्ययोत्पादनार्थंपृच्छति। अथवा इत्थमेवसूत्र रचनाकल्प इति न कश्चिद्विरोध इति ॥ क्व कस्मिन् देशे भन्ते ति गुरोरामंत्रणं अत्रएकारोमागधभाषाप्रभवः ततश्च हेभदन्त हेसुखकल्याणस्वरूप भदुद्दमुखकल्याणयोरिति वचनात् प्राकृतशैल्यावा भवस्यसंसारस्यभ यस्यवा भीतेरंतहेतुत्वात् भवांतो भयांतोवा तस्यामंत्रणं हेभवांत भयांतवा प्राग्वर्त्तिनोन्त्रको जम्बूद्वीपोनामद्वीपोवर्त्तते इतिशेषः। अनेनजम्बूद्वीपस्य स्थानंपृष्टं १ तथा भदन्त किंप्रमाणो महानालय आश्रयोव्याप्यक्षेत्ररूपो यस्यस तथा कियत्प्रमाणमस्यमहत्वमित्यर्थः, एतेनप्रमाणं पृष्टं २ अथभदन्तकिं संस्थानं यस्यसतथा । एतेनसंस्थानंपृष्टं ३ तथाभदन्त आकारभावः स्वरूपविशेषः कस्याकारभावस्य प्रत्यवतारोयस्यस किमाकारभाव प्रत्यवतारः बहु

॥ मूल ॥

जाव एवं वयासी कहिणं भंते ! जंबूद्दीवेदीवे ? १ के महालएणं भंते ! जंबूद्दीवे दीवे, २ किं संठिएणं भंते ! जंबूद्दीवे दीवे, ३

॥ अनुवाद॥

यावत् एवं अवादीत् क्व भदन्त,जम्बूद्वीपोद्वीपः, १ किंमहालयः भदन्त, जम्बूद्वीपोद्वीपः, २किंसंस्थानः भदन्त, जम्बूद्वीपोद्वीपः, ३

॥ भाषा ॥

जाव एवंवयासी ॥ यावत् विनयेकरीने एहवूंप्रश्नपूछें ॥ कहिणं भंते जंबू० ॥ किह्याकुणस्थानने विषे हेभगवन् जंबूद्वीपनामादीपछे १ केमहालयेणं भंते जं० ॥ केतले प्रमाणें वडो हे भगवन् जंबूद्वीपनामेद्वीप २ किंसंठिएणं भंते जंबू० ॥ शुंसंस्थाने शुंआकारे संस्थितछे हे भगवन् जंबूद्वीपनामेद्वीप ३

॥ टीका ॥

लग्रहणाद्वैयधिकरण्येपि समासः । यद्वाआकारस्य स्वरूपं भावाश्च जगतीवर्ष वर्षधराद्यास्तद्गतपदार्था आकारभावास्तेषां प्रत्यवतारोऽवतरणं आविर्भाव इति यावत् ,आकारभाव प्रत्यवतारः कः, कीदृग् आकारभाव प्रत्यवतारोयस्मिन् सतथा अनेनजम्बूद्दीपस्वरूपं तद्गतपदार्थाश्च पृष्टाः ४ इति इन्द्रभूतिना प्रश्नचतुष्टयेकृते प्रतिवचः श्रवणसोत्साहताकरणार्थं जगत् प्रसिद्धगोत्राभिधानेन तमामंत्र्यनिर्वचनचतुष्टयीं भगवानाह । गौतमेत्यत्रदीर्घत्वमामंत्रणा प्रभवं तेन हे गौतम अयंयत्रवयंवसामः अनेनसमयक्षेत्र बहिर्वर्त्तिनाम संख्येयानां जम्बूद्वीपानांव्यवच्छेदः जम्बूद्वीपोनामद्वीपः कथंभूतइत्याह सर्व द्वीपा नांधातकीखंडादीनां सर्वसमुद्राणां लवणोदादीनां सर्वात्मनासामस्त्येना भ्यन्तरः सकलतिर्यग्लोकमध्यवर्त्ती सर्वाभ्यंतर एवसर्वाभ्यन्तरकः स्वार्थैकप्रत्ययः अभ्यन्तरमात्रंधातकीखण्डेपि पुष्करवरद्वीपापेक्षयास्ति अतः सर्वशब्दोपादानमिति । अनेनजम्बूद्वीपस्यावस्थानमुक्तं १ तथा सर्वेभ्यो पि शेषद्वीपसमुद्रेभ्यः क्षुल्लकोलघुः, तथाहि सर्वेलवणादयः समुद्राधातकीषंडादयश्च द्वीपाजम्बूद्वीपादारभ्यद्विगुण २ विष्कंभायामपरिधयः ततः शेष द्वीपसमुद्रापेक्षया ऽयंलघुरिति । दीर्घत्वं प्राकृतत्वात्, अनेनसामान्यतः प्रमाणमभिहितं विशेषतस्त्वायामादिगतप्रमाण मग्रेवक्ष्यति १ अत्रविशेषतः

॥ मूल ॥

किमागारभावपडोयारेणं भंते ! जंबूद्दीवे दीवे, ४ पण्णत्ते ? गोयमा !
इयमं जंबुद्दीवे दीवे. सव्वदीवसमुद्दाणं सव्वब्भंतरिए१ सव्वखुड्डाए २

॥ अनुवाद ॥

किमाकारभावप्रत्यवतारः भदन्त, जम्बूद्वीपोद्वीपः, ३ प्रज्ञप्तः, गौतम, अयम्
जम्बूद्वीपोद्वीपः सर्वद्वीपसमुद्राणाम् सर्वाभ्यन्तरकः, १ सर्वक्षुल्लकः, २

॥ भाषा ॥

किमायार भावपडोयारेणं भंते जंबूद्दीवेदीवे ॥ स्यूं आकारभावें स्यूं स्वरूपप्रत्यावतारप्रगटभाव स्यूं स्वरूप हे भगवन् जंबूद्वीपनामे द्वीपछे एच्यारिप्रश्नपूछा भगवंतनेकहै ॥४॥ गोयमा अयमं जंबू० ॥ (गौतमस्वांमीनेपीछेकियेचारप्रश्नोंका उत्तरभगवान्देतेहैं) हेगोतम इहें जंबूद्वीपनामा द्वीपछे॥ सव्वदीवसमुद्दाणं सव्वब्भंतरए ॥ सर्वअसंख्याता द्वीपसमुद्रनें समस्तपणे अभ्यंतरछें समस्ततिर्यक्लोकनेमध्यवर्त्ति छै (इहप्रथमप्रश्नउत्तरजाणवा) ॥ १ सव्वखुड्डाए ॥

॥ टीका ॥

प्रमाणमवसरप्राप्तमपियत्नोक्तं तत् सूत्रकाराणांविचित्रा प्रवृत्तिरिति ॥ तथा वृत्तः सच्छुषिरवृत्तोपिस्यादतआह । तैलापूपसंस्थानसंस्थितः तैलेनपक्कोऽपूपस्तैलापूपः तैलेनहिपक्कोऽपूपः प्रायः परिपूर्णवृत्तोभवति नघृतपक्वइति, तैलविशेषणं तस्यैवयत् संस्थानं तेनसंस्थितः । अत्रतैलादित्वाल्लकारस्यद्वित्वं तथा वृत्तोरथचक्रवालसंस्थानसंस्थितः रथस्यावयवे समुदायोपचारात् रथाङ्गस्यचक्रस्य चक्रवालं मण्डलं तस्येव संस्थानेन संस्थितः । अथवा चक्रवालं नगरलंमणडलत्वधर्मयोगाच्च रथचक्रमपिरथचक्रवालं शेषवाग्वत् । एवंवृत्तः पुष्करकर्णिका पद्मबीजकोशः कमलमध्यभाग इति यावत्, वृत्तः परिपूर्णचन्द्रसंस्थानसंस्थितः प्राग्वत्पदद्वयं भावनीयं । एकेनैवचरितार्थकत्वेपि नानादेशजविनेयानां क्षयोपशमवैचित्र्या त्क्वस्यचित् किञ्चित् बोधकमित्युपमापदनानात्वं । अतएव प्रत्युपमापदं योज्यमानत्वात् वृत्तपदस्यनपौनरुक्त्य शङ्कापि ,स्तेन संस्थानमुक्तं ॥ अथसामान्यतः प्रागुक्तं प्रमाणं विशेषतोनिर्वक्तु माह । एकंयोजनशतसहस्रं प्रमाणांगुलनिष्पन्नं योजनलक्षमित्यर्थः । आयामविष्कंभेन, अत्रचसमाहारद्वंद्वस्तेन क्लीबेएकवद्भावः,आयामविष्कम्भाभ्यामित्यर्थः अत्राहपरः जम्बूद्वीपस्ययोजनलक्षं प्रमाणमुक्तं तच्चपूर्वपश्चिमयोर्जगती मूलविष्कम्भसमकंद्वादशद्वादश योजनशेषेचतुर्विंशत्यधिकम्भवति यथायथोक्तंमा

॥ मूल ॥

वट्टे तेल्लापूयसंठाणसंठिए वट्टे रहचक्कवालसंठाण संठिए वट्टे पुक्करकण्णियासंठाण संठिए वट्टे पडिपुण्ण चंदसंठाण संठिए एगं जोयणसयसहस्सं आयामविक्खंभेणं

॥ अनुवाद ॥

वृत्तः तैलापूपसंस्थानसंस्थितः वृत्तः पुष्करकर्णिकासंस्थानसंस्थितः वृत्तः परिपूर्ण चन्द्रसंस्थानसंस्थितः, ३ एकम् योजनशतसहस्रम् आयामविष्कम्भेन

॥ भाषा ॥

सर्वेद्वीपसमुद्रनी अपेक्षायेसर्वथेलघुछे ॥ २ वट्टे तेल्लापूअसंठाणसंठिए ॥ वृत्तगोलआकारेतेलनापूवानेपरे संस्थानेंसंस्थितछे ॥ वट्टे रहचक्कवाल० ॥ वृत्त गोलआकार रथनाचक्रवालना परे (रथका पहिडाने परे गोलजाणवा) ॥ वट्टे पुक्खरकण्णियासंठाणसंठिए ॥ बलीवृत्तछै पुष्करकर्णिकाकमलनोडोडो तेहनीपरे तेसंस्थानें॥ वट्टे पडिपुण्णचंदसंठाणसंठिएवृत्त परिपूर्ण पूर्णमासिना चादनीपरे तेसंस्थानें ॥ एगं जोयणसयसहस्सं ॥ एक योजन सतसहस्र कहतालक्ष१००००० योजननोछेप्रमाणअंगुल नां योजन लाषपणेंपिहुलपणे छै इहां लक्षयोजन जगतीसहीत जाणवा इम सर्वद्वीपसमुद्र आप आपना जगतीसहित जाणवा ॥

नं विरुध्यत इति, न जम्बूद्वीपजगती विष्कंभेनसदैव लक्षंपूरणीयं लवणसमुद्रजगतीविष्कम्भेनच लवणसमुद्रलक्षद्वयं, एवमन्येष्वपिद्वीपसमुद्रेषु अन्यथा समुद्रमाना जगतीमानस्य पृथग्भणने मनुष्यक्षेत्र क्षेत्रपरिधेरतिरिक्तः स्यात्, सहिपञ्चचत्वारिंशल्लक्ष प्रमाण क्षेत्रापेक्षयाऽभिधीयते । अयमेवाशयः श्री अभयदेवसूरिभिः चतुर्थाङ्गवृत्तौ पञ्चपञ्चाशत्तमेसमवाये प्रादुःकृतोस्तीति । तथात्रीणियोजनशतसहस्राणि षोडशसहस्राणिद्वे योजन शतेसप्तविंशेसप्तविंशत्यधिकेत्रयः क्रोशा अष्टाविंशं अष्टाविंशत्यधिकंधनुः शतंत्रयोदशाङ्गुलानि अर्द्धाङ्गुलञ्च किंचिद्विशेषाधिकमित्येतावान् परिक्षेपेण परिधिना प्रज्ञप्तः। अत्रसप्तविंशमष्टाविंश मित्यादिकाः शब्दाः अधिकंतत् संख्यमस्मिन् शतसहस्रेशत शब्दाद्दशांताड्ड इति सूत्रेणड प्रत्ययेसप्तविंशत्यधिकमित्यर्थः । परिध्यानयनोपायस्त्वयं चूर्णिकाकारोक्तः विरकम्भवग्गदहगुण करणीवट्टस्सपरिरउहोइ विरकम्भपायगुणिउ परिरउतस्सगणियपयं १ अत्रव्याख्या जम्बूद्वीपस्य विष्कंभोव्यासः स्थापना यथा १००००० तद्वर्गः क्रियते तद्गुणोवर्ग इति वचनाल्लक्षलक्षेण गुण्यते जातं १०००००००००० सच दशगुणः क्रियते शून्यानि ११ तदनुकारीणीतिवर्गमूल मानीयते, तथाहि विषमात्यदतस्त्यक्त्वावर्गंस्थानच्युतेन मूलेन । द्विगुणेनभजेच्छेषं लब्धंविनिवेशयेत्यक्त्वां १ तद्वर्गंसंशोध्य द्विगुणी कुर्व्वीतपूर्ववल्लब्धं । उत्सार्यततो विभजेच्छेषं द्विगुणी कृतंदलयेत् इत्यनेनकरणेनानीते वर्गमूलेजातोऽधस्तनः छेदराशिः ६३२४५७ अत्रसप्तकरूपोंऽत्यों ऽको न द्विगुणीकृत इति तद्वर्जशेषंसर्वमप्यधिक्रियते लब्धं योजनानि ३१६२२७ छेदराशिश्चसप्तकेपि द्विगुणीकृतेजातः ६३२४५६ उपरिशेषांशाः ४७४५७१ एतेच योजनस्थानीया इति क्रोशानयनार्थं चतुर्गुणा जाताः १९३७८८४ छेदराशिनाभागेलब्धंक्रोशाः ३ शेषं ४०५४०५१२ धनुरानयनाय द्विसहस्रगुणं जातं ८१०८४००० छेदराशिनाभागेलब्धामिधनूंषि १२८ शेषं ८९८८८ षण्णवत्यङ्गुलमानत्वाद्धनुषोङ्गुला नयनार्थं षण्णवतिगुणंजातं ८६२६२४८ छेदेनभागेलब्धं अङ्गुलानि १३ शेषं ४०७३४६ अत्रव्याख्यानतोविशेष प्रतिपत्तिरितिन्यायात् यवादिकमप्यानीयते, तथाहि तेष्वंगुलांशा अष्टभिर्यवै रंगुलमिति अष्टभिर्गुण्यंते जाताः ३२५८७६८ छेदः सएवलब्धाः यवाः ५ ततोप्यष्टगुण नेयूकादयः स्युः तत्रयूका १ एतत् सर्वमप्यर्द्धाङ्गुलस्य किंचिद्विशेषाधिकत्वकथनेन सूत्रकारेणापि सामान्यतः संगृहीतमितिबोध्यं।गणितपदंत्वत् करणंचसोदाहरणमग्रे भावयिष्यते इति॥ अथा कारभाव प्रत्यवतार विषयकं प्रश्ननिर्वक्तुमाह इतिसोऽनंतरोदितायामविष्कम्भपरिक्षेपपरिमाणो जम्बूद्वीपः सामितिपूर्ववत् एकयाएकसंख्यया अद्वितीययावज्रमय्यावज्ररत्नात्मिकयाजगत्या जम्बूद्वीप प्राकार

रूपयादीपसमुद्र सीमाकारिण्या महानगरप्राकारकल्पया सर्वतोदिक्षु समन्ताद्दिदिक्षुसम्परिक्षिप्तः सम्यग्वेष्टितः प्राकृतत्वाद्दीर्घत्वं वज्रशब्दस्य ॥ साजगती अष्टयोजनान्यूर्द्ध्वोच्चत्वेन वस्तुतोऽनेक धोच्चत्वं ऊर्द्ध्वस्थितस्यैकं अपरंतिर्यक्स्थितस्या ऽन्यदुरोन्नतिरूपं तत्रेतरापोहेनोर्द्ध्वस्थितस्ययदुच्चत्वं तदूर्द्ध्वोच्चत्वमित्यागमेरूढमिति, अत्रानुस्वारः प्राकृतत्वात् मूलेद्वादशयोजनानिविष्कम्भेन मध्ये ऽष्टौ उपरिचत्वारि अतएवमूले विष्कम्भमधिकृत्य विस्तीर्णामध्ये संक्षिप्ता त्रिभागोनत्वात् उपरितनुका मूलापेक्षयात्रिभागमात्र विस्तारभावात्, एतदेवोपमया प्रकटयति गोपुच्छस्येव संस्थानंतेन संस्थिता ऊर्द्ध्वकृतगो

॥टीका॥

तिन्नि जोयणसयसहस्साइं सोलससहस्साइं दोन्नियसत्तावीसे जोयणसए तिन्नियकोसे अट्ठावीसं च धणुसयं तेरसय अंगुलाइं अद्धंगुलंच किंचिविसेसाहियं परिक्खेवेणं पन्नत्ते, सेणं एगाए वइरामईए जगईए सव्वओ समंता संपरिक्खित्ते, साणं जगई अट्ठजोयणाइं उड्ढं उच्चत्तेणं, मूले बारसजोयणाइं विक्कंभेणं, ॥

॥ मूल ॥

त्रीणि योजनशतसहस्राणि षोडशसहस्राणि द्वे सप्तविंशे योजनशते त्रयः क्रोशा अष्टाविंशं च धनुः शतं त्रयोदशाङ्गुलानि अर्द्धाङ्गुलंच किञ्चिद्विशेषाधिकम् परिक्षेपेण ४. प्रज्ञप्तः,सःएकया वज्रमय्या जगत्या सर्वतःसमन्तात्सम्परिक्षिप्तः, साजगती अष्टयोजनान्यूर्द्ध्वमुच्चत्वेन मूलेद्वादशयोजनानिविष्कम्भेन

॥अनुवाद॥

तिन्निजोयण सयसहस्साइं ॥ त्रिणयोजनसयसहस्र कहता त्रिणलक्ष ३००००० योजन ॥ सोलसयसहस्सा ॥ सोलहैसहस्र (अर्थात् सोलहजार १६०००) दोन्नियसत्तावीसेजो०॥ दोयसय२००अने२७योजन जाणवा३१६२२७योजन ॥ तिन्नियकोसे ॥ त्रिणगाउ ३ अर्थात् त्रिणकोश ॥ अट्ठावीसंचधणुसयं ॥ अट्ठावीस धनुष २८ तेरसय अंगुलाइं ॥ तेरेअंगुल १३ अद्धंगुलच किंचिविसेसाहियं ॥ अर्द्धांगुलं पांचजव ५ अने यूका १ एतलेंकाइंविशेसाधिक ॥ परिक्खेवेणं पन्नत्ते २ एतली परिधि जंबूद्दीपपरिधिपणें कह्यो सेणंएगाएवइरामइए०॥ तेजंबूद्दीपनें एकवज्रमयजगतीमोटा गढने आकारें बें जगती वज्रमय।।सव्वओ समंता संपरिखित्ते ।। तेणें चोफेर जंबूद्दीपनें सर्वदिसें वीटयोछै ॥ साणं जगईअठजोयणाइं ॥ तेजगती ८ योजनऊर्द्ध उचपणेंछै ॥ मूलेबारसजोय० ॥ मूलतेबारह १२ योज

॥भाषा॥

पुच्छाकारेतिभावः । सर्वात्मनासामस्त्येन वज्रमयीवज्ररत्नात्मिका दीर्घत्वंच प्राकृतशैलीप्रभवं अच्छाआकाशस्फटिकवदतिस्वच्छा सल्लाश्लक्ष्णापुद्गलस्कंध निष्पन्ना श्लक्ष्णदलनिष्पन्नपटवत् लक्ष्णामसृणा घुटितपटवत् घट्टाघृष्टाइवघृष्टा खरशाणया पाषाणप्रतिमावत् तथामृष्टाइव मृष्टासुकुमार शाणया पाषाण प्रतिमावत् तथानीरजासहजरजोरहिता तथानिर्मला आगंतुकमलरहिता तथानिष्पंकाकलङ्कविकलाकर्दमरहिताच तथानिःकङ्कटा निःकवचा निराव रणा छायादीप्तिर्यस्याः सा, तथासप्रभा स्वरूपतः प्रभावती अथवास्वेनात्मना प्रभाति शोभते प्रकाशतेवेति स्वप्रभा तथा समरीचिका सकिरणावस्तुस्तोम प्रकाशकरीइत्यर्थः ।तथा प्रसादाय मनःप्रसत्तयेहिता तत् कारित्वात् प्रासादीया मनःप्रह्लादकारिणीतिभावः। तथा दर्शनीयादर्शनयोग्या यां पश्यतश्चक्षुष

मज्झे अट्ठजोयणाइं विक्कंभेणं उवरिं चत्तारि जोयणाइं विक्खंभेणं मूले वित्थिण्णा मज्झे संखित्ता उवरिं तणुया गोपुच्छसंठाणसंठिया सव्ववयरामई अच्छा सण्हा लण्हा घट्ठा मट्ठा णीरया णिम्मला णिप्पंका णिक्कंकडच्छाया सप्पभा सस्सिरीया सउज्जोया पासादीया दरिसणिज्जा

मध्येऽष्टौयोजनानि विष्कम्भेनउपरिचत्वारियोजनानिविष्कम्भेन मूलेविस्तीर्णा मध्येसंक्षिप्ता उपरितनुका गोपुच्छसंस्थानसंस्थिता सर्ववज्र मयी अच्छा श्लक्ष्णा मसृणा घृष्टा मृष्टा नीरजानिर्मला निष्पङ्का निः कङ्कटच्छाया सप्रभा सश्रीका सोद्योता प्रासादीया दर्शनीया

नविस्तारद्वै पिंहुली मज्झे अठजोयणाइं० ॥ मध्यनैविषे अर्थात्विषे आठयोजनपिहुली ॥ उवरिचत्तारिजो० ॥ उपरीच्यांरिजोजनपिहुली ॥ मूलेवित्थि ण्णा । मूले वीस्तीर्ण पुहलपणा माटइ ॥ मज्झेसंखित्ता ॥ विचनेविषे संक्षिप्तसाकडी छै ॥ उवरितणुआ ॥ उपरिपातलीमूलथीत्रीजाभागमाटइ ॥ गोपुच्छसं० गोपूछनें संस्थानें संस्थित उधोकीधोगायनोपूछडो तेआकारछै ॥ सव्ववइरामई ॥ सर्वप्रदेशेवज्ररत्नमय छइ ॥ अछासण्हा ॥ आछाआकास नोपरेंश्लक्ष्णानों मलछइ ॥ लण्हा ॥ विकनीछे ॥ घट्ठा ॥ घृष्टचसोछइ ॥ मट्ठा ॥ मृष्टमांजी कोमलकीधी ॥ णीरया ॥ रजरहित ॥ णिम्मला ॥ मलरहीतछइ ॥ णिप्पं का ॥ पंककर्दमरहितछइं ॥ णिक्कंकडछाया ॥ निकंकटछाया ॥ सप्पभा ॥ प्रभावंतछै ॥ सस्सिरीआ ॥ सश्रीकअत्यंतसोभावंत ॥ सउज्जोया ॥ उद्यो

॥ टीका॥

अमंनगच्चतइति, तथा अभिरूवा अभि सर्वेषांद्रष्टृणां मनः प्रसादानुकूलतया अभिमुखंरूपंयस्याःसा अत्यन्तकमनीया इति भावः । अतएव प्रतिविशिष्टमसाधारणं रूपंयस्याः सा प्रतिरूपा । अथवा प्रतिक्षणं नवरंनवमिवरूपंयस्याःसा तथा । अथा ऽत्रसूत्रे ऽनुक्तोपि वाचयितृणामधिकार्थजिज्ञापयिषया जगत्या इष्टस्थाने विस्तारानयनोपायः प्रदर्श्यते। तत्रमूलेमध्ये उपरिच,विष्कम्भपरिमाणं साक्षादेव सूत्रेलभ्यते ।अथांतरालेउपरिष्टादधोगमने ऽयमुपायः जगती शिखरादधोयावदुत्तीर्णं तस्मिन्नेकेनभक्ते सतिय लब्धंतत्चतुर्भिर्गुणितमिष्टस्थाने विस्तार स्तथाहि-उपरितनभागाद्योजनमेकंगव्यूताधिकमवतीर्णं, ततोस्यराशेः एकेनभागेहृते लब्धमेकंयोजनं गव्यूताधिकं तच्चयोजनचतुष्कयुतंक्रियते जातानिपञ्चयोजनानि गव्यूताधिकानि एतावांस्तत्र प्रदेशेविष्कंभः, एवंसर्वत्रभाव्यं । सम्प्रतिमूलादूर्द्धगमने विस्तारानयनोपायः मूलादूर्द्धंगतंतस्यैकेनभागेहृते यल्लब्धंतस्मिन्मूलविस्ताराच्छोधिते यच्छेषंसतत्रयोजनादावतिक्रान्ते विस्तारः । तद्यथा-मूलादुत्पत्ययोजनमेकं गव्यूतद्वयाधिकङ्गत स्ततोयोजनस्यगव्यूतद्वयाधिकस्यैकेन भागेहृतेलब्धंयोजनं गव्यूतद्वयाधिकं एतन्मूल सम्बन्धिनोद्वादशयोजन प्रमाण विस्तारादपनीयते, स्थितानिदशयोजनानि गव्यूतद्वयाधिकानिएतावत्प्रमाणः सार्द्धयोजनातिक्रमे विस्तारः । एवंसर्वत्रापिभाव्यं । एवं ऋषभकूट जम्बूशाल्मलीवृक्षवनगत कूटानामिष्टस्थाने विस्तारानयनार्थमिदमेव करणं भाव्यं । अथास्यागवाक्ष कटकवर्णनायाह । सा ऽनन्तरोदितस्वरूपा जगती णमिति प्राग्वत् जगतीएकेन महागवाक्ष कटकेन वृहज्जालक समूहेन सर्वतः सर्वासुदिक्षु समंतात् सामस्त्येन सम्परिक्षिप्ता व्या

॥ मूल ॥

अभिरूवा पडिरूवा, सा णं जगई एगेणं महंतगवक्खजालेणं सव्वओ समंता संपरिक्खित्ता,

॥ अनुवाद ॥

अभिरूपा प्रतिरूपा सा जगती एकेन महागवाक्षकटकेन सर्वतःसमन्तात्सम्परिक्षिप्ता,

॥ भाषा ॥

तवंत ।। पासादीया ॥ मननें प्रसादनी करण हारी ।। दरिसणिज्जा ।। आंखिनै देखवा जोग्य ।। अभिरूआ ।। देखणहारनें मनोज्ञ अभिमुखरूपछै ॥ पडिरूवा ॥ प्रतिबिंबपणेंजेहवीएहवीछै ।। सा णं जगई एगेणं महंतगवरकजालकडएणं ।। तेएहवी जगती एकमोटेंगवाक्षकटक गोखानी मोटीजालीई करी सव्वउ समंता संपरिक्खित्ता, ।। सर्व दिसिजगतीनेंसमान चोफेर वीटीछै ॥ सेणं गवरककडए ।। तेगवाक्ष कटक गोखा, एगवाक्ष लवण समुद्रनेंपासइं जग

प्रेत्यर्थः । स गवाक्षकटकः उर्द्ध्वोच्चत्वेनाऽर्द्धयोजनंद्वेगव्यूते विष्कम्भेन पञ्चधनुः शतानि सर्वात्मना रत्नमयः । तथाअच्छः अत्रयावत्करणात्प्राग्वर्णितं विशेषण पदवृंदंग्राह्यं । इयञ्चगवाक्षश्रेणिर्लवणोदपार्श्वेजगतीभित्तिबहुमध्यभागगताऽवगन्तव्या, रिरंसुदेवविद्याधर वृन्दरमणस्थानं । अथ जगत्युपरिभागवर्णनायाह । तस्या यथोक्तस्वरूपाया जगत्या उपरि उपरितनेतले योबहुमध्यदेशलक्षणोभागः भागश्चप्रदेशलक्षणो पिस्यात्तत्रच पद्मवरवेदिकाया अवस्थाना ऽसम्भवः अतोदेशग्रहणेन महान् भागइत्यर्थः । सचचतुर्योजनात्मक जगत्युपरितनतलस्यमध्ये पञ्चधनुः शतात्मकइति, सूत्रेएकारान्तता मागधभाषालक्षणानुरोधात्, अत्रएतस्मिन्बहु मध्यदेशभागे णमिति प्राग्वत् महती एका पद्मवर वेदिका देवभोगभूमिः प्रज्ञप्ता,मयाशेषैश्चतीर्थंकरैः । साचऊर्ध्वोच्चत्वेनार्द्धयोजनं पञ्चधनुः शतानिविष्कम्भेन, जगत्याः समा समाना जगतीसमासैवजगतीसमिका परिक्षेपेण परिरयेण, कोर्थः, जम्बूद्वीपस्यसर्वतोवलयाकारेणव्यवस्थिता याजगत्या यावदुपरितनं तलंचतुर्योजन विस्तारात्मकं तस्माल्लवणदिशिदेशोनंयोजनद्वयेत्यक्तं अर्वाक्यावान् जगतीपरिरय स्तावानस्या अपीति । सर्वरत्न

सेणं गवक्खकडए अद्धजोयणं उद्धं उच्चत्तेणं पंचधणुसयाइं विक्कंभेणं सव्वरयणामए अच्छे जाव पडिरूवे, तीसेणं जगईए उप्पिं बहुमज्झदेसभाए एत्थणं महंएगा पउमवरवेइया पण्णत्ता, अद्धजोयणं उद्धं उच्चत्तेणं पंचधणुसयाइं विक्कंभेणं जगई समीया परिक्खेवेणं सव्वरयणामयी

सगवाक्षकटकः अर्द्धयोजनमूर्ध्वमुच्चत्वेन पञ्चधनुःशतानिविष्कम्भेन सर्वरत्नमयः अच्छःयावत्प्रतिरूपःतस्या जगत्या उपरि बहुमध्यदेशभागः अत्र महत्ये का पद्मवरवेदिका प्रज्ञप्ता, अर्द्धयोजनमूर्द्ध मुच्चत्वेन पञ्चधनुः शतानिविष्कम्भेन जगती समिका परिक्षेपेण सर्वरत्नमयी

॥ मूल ॥

॥ अनुवाद॥

तीनेंमध्यभागेंचोफेर जाणवो ॥ अद्धजोयणं उद्धं उच्चत्तेणं ॥ अर्द्धयोजनवें गाऊ ऊर्ध्वउचपणेछै ॥ पंचधणुसयाइं विक्कंभेणं ॥ पांचसेंधनूपपीहुलपणे ॥ सव्व रयणामए ॥ सर्वरत्नमयछै ॥ अच्छेजाव० ॥ आछै निर्मल यावत् शब्दे पूर्वलीपरे जाणवु प्रतीरूपछे ॥ तीसेणं जगईए उप्पिं ॥ तेजग तीनें ऊपर ॥ बहुमज्झ देसभाए ॥ बहुमध्यदेशभागेमध्यस्थानकइ ॥ एत्थणं महं० पण्णत्ता ॥ इहां मोटीएक पद्मवरवेदिका देवतानइ क्रीडानुंस्थानकप्रज्ञप्ताकही तीर्थंकरे

॥ भाषा ॥

मयी सामस्त्येनरत्नखचिता अच्छा सल्ला इत्यादि विशेषणकदम्बकम्पाठतो ऽर्थतश्चप्राग्वत् । अथास्या अतिदेशगर्भवर्णकं सूत्रमाह । तस्याःपद्मवरवेदिकाया अयमिति वक्ष्यमाणतया प्रत्यक्षः सचोच्यमानोन्यूनाधिकः पित्यादिति एतद्रूपः एतदेवरूपंस्वरूपंयस्य सतथा । वर्णावासोवर्ण श्लाघायथावस्थित स्वरूपकीर्त्तनं तस्यावासोनिवासोग्रन्थपद्धतिरूपोवर्णकः निवेशइत्यर्थः, अथवा वर्णावासो वर्णकग्रन्थविस्तरः प्रज्ञप्त, स्तद्यथेतिरूपदर्शने वइरामइत्यादि व इरामयानेमाइत्यादिकं । एवमिति अनेन प्रकारेणयथा जीवाभिगमेपद्मवरवेदिका वर्णविस्तरउक्तस्तथाबोध्यइतिशेषः । सचकियत्पर्यंत इत्याह । जाव अ ट्ठोइति यावदर्थः पद्मवरवेदिकाशब्दस्यार्थं निर्वचनं ततोपि कियत्पर्यंत इत्याह । जाव धुवा णिययासासया इति, पुनस्ततोपिकियत्पर्यंत इत्याह । जावणि च्चा इति सचसमग्रपाठोयं वइरामयाणेमारिट्ठामया एइट्ठाणा वेरुलियामया खंभा सुवण्णमया फलगा लोहियक्खमईउ सुईउ वइरामईसंधी णाणामणि म याकलेवरा णाणामणिमया कलेवरसंघाडा णाणामणिमयारूवा णाणामणिमया रूवसंघाडा अंकामया परका परकबाहाउ जोई रसामयावंसा वंसकवेल्लु

अच्छा जाव पडिरूवे तीसेणं पउमवरवेइयाए अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा वय रामयाणेमा एवं जहा जीवाभिगमे जाव अट्ठो जाव धुवा णीयया सासयं जाव णिच्चा,

अच्छा यावत् प्रतिरूपा तस्याःपद्मवरवेदिकायाःएतद्रूपःवर्णावासःप्रज्ञप्तः,तद्यथा-वज्र मयानेमा एवं यथा-जीवाभिगमे यावत् अर्थः यावत् ध्रुवानीरजासाश्वया यावत् नीचा,

प्ररूपी ॥ अद्धुजो० ॥ तेअद्धयोजन उंचपणइ ॥ पंचधणु० ॥ ५००पांचसे धनुषपीहुलपणेछै ॥ जगई सन्निआ० ॥ जगतीसंबमांगें परिधिपणें ॥ सव्वरयणा० ॥ सर्वरत्नमयी ॥ अच्छाजा० ॥ आछीजावत्शब्दैंपूर्वत्प्रतिरुपछै ॥ तीसेणं० तेपद्मवरवेदीकानइ ॥ अयमे० ॥ एहवोरूपछै ॥ वण्णा०पण्णत्ते ॥ वर्णनोवास कह्योतीर्थंकरइ ॥ तंजाहा ॥ तेकेहवोतेकहेछइ ॥ वइराम० ॥ वज्ररत्नमयनेमांभुमीभागथीऊर्द्धप्रदेशपणें ॥ एवंजाहा० ॥ पद्मवरवेदिकानोवर्णनजी वाभिगमथीजाणवो ॥ जावअट्ठो ॥ यावत् अर्थजांणवो जावधुवा ॥ थिरछइ ॥ णिययया ॥ निश्चयेछेइ ॥ सा० ॥ सास्वतीसदाछइ ॥ जावणिच्चा॥जावत्नित्यछइ

॥ टीका ॥
॥ मूल ॥
अनुवाद॥
॥ भाषा ॥

याय रययामईं उपट्टियाओ जायरूवमईंउ उहाडणीउ वइरामईंउ उवरिपुंछणीओ सव्वसेए रयथामए च्छायणे साणं पउमवरवेइया एगमेगेणं हेमजालेणं एगमेगेणं गवक्खजालेणं एगमेगेणं खिंखिणीजालेणं एगमेगेणं घंटाजालेणं एगमेगेणं मुत्ताजालेणं एगमेगेणं मणिजालेणं एगमेगेणं कणगजालेणं एगमेगेणं रयणजालेणं एगमेगेणं पउमजालेणं सव्वरयणामएणं सव्वउ समन्ता सम्परिरिक्खित्ता तेणं जाला तवणिज्जलंबूसगा सुवण्णपयरगमंडिया णाणामणिरयणहार द्धहार उवसोभिय समुदया ईसिमण्णमण्णमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायंमंदायंपइज्जमाणापइज्जमाणा पलंबमाणा पलंबमाणा पभंजमाणापभंजमाणा उरालेणं मणुण्णेणं मणहरेणं कण्णमणनिव्वुइकरेणं सद्देणं तेपएसे सव्वउ समन्ता आपूरेमाणासिरीए अईव २ उवसोभमाणा २ चिट्ठंति तीसेणं पउमवरवेइया तत्थतत्थदेसे तिहिंतिहिं बहवे हयसंघाडा गयसंघाडा णरसंघाडा किंनरसंघाडा किंपुरिससंघाडा महोरगसंघाडा गंधव्वसंघाडा वसहसंघाडा सव्वरयणामया जाव पडिरूवा एवंपंतीउ ८ विहीओ ८ विमिहुणगाइवि ८ तीसेणं पउमवरवेइयाए तत्थतत्थदेसे तहिं तहिं बहुईओ पउमलयाउ णागलयाउ असोगलयाउ चम्पगलयाउ वणलयाओ वासंतीलयाउ अइमुत्तयलयाउ कुंदलयाउ सामलयाउ णिच्चंकुसुमियाउ णिच्चंमउलियाओ णिच्चं लवयाउ णिच्चंपल्लइयाओ णिच्चं गुल ओइयाओ णिच्चंगुच्छियाओ णिच्चंजमलियाओ णिच्चंजुअलियाओ णिच्चंविसामियाउ णिच्चंपणमियाओ णिच्चं सुविभत्तपडि मंजरिवडिंसगधरीउ णिच्चंकुसुमियमउलि अलबइयथवइयगुलइय गुच्छिय जमलिय जुअलिय विणमिय पणमिय सुविभत्तपडि मंजरिवडिंसगधरीओ सव्वर यणामईउ अच्छा जाव पडिरूवा तीसेणं पउमवरवेइयाए तत्थतत्थदेसे तहिं तहिं बहवे अस्कयसोत्थिया पसता सव्वरयणामया अच्छा जाव पडिरूवा से केणट्ठेणं भन्ते एवंवुच्चइ पउमवरवेइया २ गोअमा पउमवरवेइयाए तत्थतत्थदेसे तहिंतहिं वेइयासु वेइयाबाहासु वेइयापुडंतरेसु खंभेसु खंभबाहासु खंभ सीसेसु खंभपुडंतरेसु सूईसु सूईमुहेसु सूईफलएसु सूईपुडंतरेसु परकेसु परकबाहासु बहुइं उप्पलाइं पउमाइं कुमुयाइं सुभगाइं सोगन्धियाइं पोंड रीयाइं सयवत्ताइं सहस्सवत्ताइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवाइं महावासिक्कच्छत्तसमाणाइं पसत्ताइं समणाओ सो सेएएणट्ठेणं गोअमा एवंवुच्च इ पउमवरवेइया २ अदुत्तरंचणं गोअमा पउमवर वेइयाए सासयणा मध्येजे पण्णत्ते पउमवरवेइयाणं भंते किंसासया असासया गोअमा सिअसासया सि अअसासया सेकेणट्ठेणंभन्ते सिअसासया सिअअसासया गोअमा दव्वट्ठयाए सासया वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासया

सेतेणट्ठेणं एवंवुच्चइ सियसासया सियअसासया पउमवरवेइयाणं भन्ते कालओ केवचिरं होइ गोअमा णकयाइणासी णकयाइणभवइ णकयाइणभविस्सइ भुविंच भवइय भविसइय धुवा णियया सासया अक्खया अव्वया अवट्ठि आणिच्चाइत्ति अत्रश्लोक्या अनन्तरोक्तायाः पद्मवरवेदिकायाः वज्रमया रत्नमयानेमाः नेमानामभूमिभागादूर्द्धंनिः क्रामंतः प्रदेशाः वज्रशब्दस्यदीर्घत्वं प्राकृतत्वात् एवमन्यत्रापिद्रष्टव्यं। तथारिष्टरत्नमयानि प्रतिष्ठानानि मूलपादाः तथा वैदूर्यरत्नमयाः स्तंभाः सुवर्णरूप्यमयानि फलकानि पद्मवरवेदिकांगभूतानि लोहिताक्षरत्नमय्यः सूचयः फलकद्वयस्थिरसम्बन्धकारि पादुकास्थानीयाः वज्रमयाः संधयः संधिमेलाःफलकानां किमुक्तंभवति वज्ररत्नापूरिताः फलकानांसंधयः नानामणिमयानिकलेवराणि मनुष्यशरीराणि तथानानामणिमयाः कलेवरसंघाटाः मनुष्यशरीरयुग्मानि संघाटशब्दो युग्मवाची यथा साधुसंघाटइति नानामणिमयानिरूपाणि हस्त्यादीनां रूपकाणि रूपसंघाटाअपि तथैव तानिचकानिचिच्छोभार्थं कानिचिद्दृनोदार्थं कानिचिन्नदृग्दोषनिवारणार्थं यथा राजद्वारादिषु हस्त्यादिरूपाणि कंपमानलम्बकूर्चकवृद्धरूपाणि च क्रियंते तथात्र फलके सूचीमयानिसंतीत्यर्थः आकारस्तद्विशेषस्तन्मयाः पक्षास्तदेकदेशाः पक्षबाहवोपि तदैकदेशभूता एवाङ्गमुच्यः ज्योतीरसंनामरत्नंतन्मयावंशाः महांतः पृष्ठवंशामध्यवलका इत्यर्थः। महतांपृष्ठवंशानामुभयतस्तिर्यक् स्थाप्यमानावंशाः कवेलुकानि प्रतीतानि अत्रद्वितीयवंशशब्दाद्विभक्तिलोपः प्राकृतत्वात् अत्रक्रमप्राप्तानामपि कवेलुकानां पृष्ठवंशैर्वंशैश्चसहयदेकत्र विशेषणेयोजनं तत्रज्योतीरसरत्नमयत्वं हेतुरिति रजतमय्यः पट्टिकवंशानामुपरिकंबास्थानीयाः जातरूपंसुवर्णविशेष स्तन्मय्यः अवघाटिन्यः आच्छादनहेतु कंबोपरिस्थाप्यमान महाप्रमाण किलिंचस्थानीयाः वज्रमय्योऽवघाटिनीना मुपरि पुंच्छन्योनिर्विडतराच्छादनहेतुश्चोक्ततरतृण विशेषस्थानीयाः सर्वश्वेतंरजतमयं पुंच्छनीना मुपरिकवेलुकानामध आच्छादनं सापद्मवरवेदिकाएकैकेन हेमजालेन सर्वात्मनाहेममयेन दामसमूहेन तथा एकैकेन गवाक्षजालेन गवाक्षाकृतिरत्न विशेषदाम समूहेन एकैकेन किंकिणीजालेन किंकिण्यः क्षुद्रघंटिकाः एकैकेन घंटाजालेन किंकिण्यपेक्षया किंचिन्महत्योघंटाः एकैकेनमुक्ताजालेन मुक्ताफलमयेन दामसमूहेन एकैकेनमणिजालेन मणिमयेन दामसमूहेन एकैकेनकनकजालेन कनकम्पीतरूपः सुवर्णविशेषस्तन्मयेन दामसमूहेन एकैकेन रत्नजालेन रत्नमयदामसमूहेन अत्रस्थल जाता मणयो जल जातानि रत्नानीति रत्नमण्योर्भेदः एकैकेन सर्वरत्नमयपद्मात्मकेन दाम समूहेन सर्वतः समन्तादिति प्राग्वत् सम्परिक्षिप्ता, एतानिचदाम

रूपाणि हेमजालादीनि जालानिलम्बमानानिवेदितव्यानि । तथाचाह तेणंजालाइत्यत्रपुंस्त्वनिर्देशः प्राकृतत्वात्तेन तानिजालानि तपनीयमारक्तसुवर्णतन्मयोलम्बूसगोदाम्नामयिमभागेमण्डनविशेषो येषांतानितथा, पार्श्वतः सामस्त्येन सुवर्णस्य प्रतारकेणपत्रेणसंगिडतानि अन्तरा अन्तरालम्बमानहेमपत्रकालंकृतानि, तथा नानारूपाणांजातिभेदेनानेकप्रकाराणां मणीनांरत्नानांचये विचित्र वर्णोहारा अष्टादशसरिका अर्द्धहारानवसरिकास्तैरुपशोभितः समुदायोयेषांतानि, तथा ईषन्मनाक् अन्योन्यं परस्परमसंप्राप्तानि असंलग्नानि पूर्वापरदक्षिणोत्तरागतैर्वातैर्मंदायं मन्दायमिति मन्दंमंदंएज्यमानानि कंप्यमानानि भृशाभीक्ष्ण्याविच्छेदेहिः प्रोक्तमत्रादेरित्य विच्छेदेद्विर्वचनं यथा पचतिपचतीत्यत्र । एवमुत्तरत्रापि ईषत्कंपनवशादेव प्रकर्षतइतस्ततोमनाक् चलनेन लम्बमानानि २ उदारेण स्फारेणशब्देनेतियोगः । सचस्फारशब्दोमनः प्रतिकूलोपि भवति ततआह । मनोज्ञेनमनोनुकूलेन तच्चमनोनुकूलत्वं लेशतोपिस्यादतआह । मनोहरेण मनांसिश्रोतृणां हरति आत्मवशंनयतीति मनोहरोलिहादेराकृति गणत्वादच् प्रत्ययः, तेन तदपिमनोहरत्वंकुत इत्याह । कर्णमनोनिर्वृत्तिकरेण निमित कारणहेतुषुसर्वासां विभक्तीनां प्रायोदर्शनमिति वचनात् हेतौतृतीया, ततोयमर्थः प्रतिश्रोतृकर्णयोर्मनसश्चनिर्वृतिकरः सुखोत्पादकस्तलोमनोहरस्तेनइत्यंभूतेनशब्देनतान् प्रत्यासन्नान् प्रदेशान् सर्वतः समन्तात् आपूरयन्ति २ शतृप्रत्ययांतस्यशाविदंरूपं । अतएव श्रियाशोभया अतीव उपशोभमानानि २ तिष्ठंति पुनरस्यांयदस्ति तदुपदर्शयति । तस्याः पद्मवरवेदिकायाः तत्रतत्रदेशेतहिं तहिं इति तस्यैवदेशस्य तत्र तत्र एकदेशे एतावता किमुक्तं भवति यत्रदेशेएकस्तत्रान्येपि विद्यन्तइति बहवोहयसंघाटा अपिवाच्याः । एतेचसर्वेसर्वात्मनारत्नमयाः अच्छायावत् प्रतिरूपाइत्यादि सर्वंप्राग्वत्, एतेचसर्वेपि हयसंघाडादयः संघाटाः पुष्पावकीर्णका उक्ताः । संप्रत्येषामेवहयादीनां पंक्त्यादि प्रतिपादनार्थमाह । एवमिति यथाऽमीषांहयादीना मष्टानांसंघाटाउक्ताः तथापंक्तयोपिवीथ्योपि मिथुन कानिच वाच्यानि तानि चैवं,तीसेणं पउमवरवेइयाये तत्थतत्थदेशेतहिं २ बहुआउ हयपंतीउ गयपन्तीओ इत्यादि नवरमेकस्यांदिशिया श्रेणिः सापंक्तिरभिधीयते, उभयोरपिपार्श्वयोरे कैकश्रेणिभावेनयत् श्रेणिद्वयंसावीथी, एतेचवीथीपंक्ति संघाटा हयादोनां पुरुषाणामुक्ताः । सांप्रतमेतेषामेवहयादीनां स्त्रीपुरुषयुग्मप्रतिपादनार्थं मिथुनाइं इत्युक्तं उक्तेनैव प्रकारेणहयादीनां मिथुनकानि स्त्रीपुरुष युग्मरूपाणिवाच्यानि, यथा-तत्थतत्थदेशेतहिं तहिं बहुइहयमिथुनाइं इत्यादि । तीसेणमित्या

दि ॥ तस्याः पद्मवरवेदिकायास्तत्रतत्रदेशे तस्मिं तस्मिं इति, तस्यैवदेशस्यतत्रतत्र एकदेशे । अत्रापि तत्यतत्यदेशे तस्मिं तस्मिं इति वदतायत्रैका लता तत्रान्या अपिबहवोलताःसन्तीति प्रतिपादितं द्रष्टव्यं । बहवः पद्मलताः पद्मिन्यः नागलताः नागाद्रुमविशेषास्तएवलता स्तिर्यक्शाखाप्रसराभावात् नागलताः । एवमशोकलताः चम्पकलताः वणलताः वणास्तरुविशेषाः वासंतिकालताः अतिमुक्तलताः कुंदलताः श्यामलताः।कथंभूताएता इत्याह । नित्यंसर्वकालं षट्स्वपिऋतुष्वित्यर्थः, कुसुमिताः कुसुमानिसञ्जातान्यास्विति कुसुमिताः तारकादिदर्शनादितज् प्रत्ययः । एवंनित्यंमुकुलिताः मुकुलानिनामकुड्मलानिकलिका इत्यर्थः, तथा नित्यंलवकिताः लवएवलवकः स्वार्थेकः ससञ्जात आस्वितिलवकिताः सञ्जातपल्लवलवा इत्यर्थः, तथानित्यंस्तबकिताः संजातपुष्पस्तबकाः, तथानित्यंगुल्मिताः संजातगुल्मकाः गुल्मकन्दलतासमूहः, तथानित्यंगुच्छिताः संजातगुच्छाः गुच्छश्चपत्रसमूहः । यद्यपिचपुष्पस्तबकयोरन्नेदोनामकोशेऽधीत, स्तथा प्यत्रपुष्पपत्रकृतो विशेषोज्ञेयः। नित्ययमलिता यमलंनाम समानजातीययोर्लतयोर्युग्मं तत्संजातमास्वितियमलिताः,नित्ययुगलिता युगलं सजातीयविजातीययोर्लतयोर्द्वन्द्वं तथानित्यंविनमिताः नित्यंफलपुष्पादिभरेण विशेषेणनमितानीचैर्भावं प्रापिताः, तथानित्यं प्रणमिता स्तेनैवनमयितुमारब्धाः, प्रशब्दस्यादिकर्मार्थत्वात् अन्यथा पूर्वविशेषणादिन्नेदः स्यात् । नित्यंसुविभक्तेत्यादि । सुविभक्तः सुविच्छित्तिकः प्रति विशिष्टोमंजरी रूपोयो ऽवतंसकस्तद्धरा स्तद्धारिण्यः, औपपातिकादौतु सुविभक्तपिंडी मंजरीविडंसगधराउ इतिपाठस्तत्रसुविभक्ता अतिविविक्ताः सुनिध्यन्नतयापिंड्यो लुंब्यो मंजर्यश्चप्रतीताः शेषंतथैव । एषः सर्वोपि कुसुमितत्वादिकोधर्म एकैकस्याः २लतायाउक्तः । साम्प्रतंकासां चिल्लतानांसकल कुसुमित त्वादिधर्म प्रतिपादनार्थमाह । णिच्चं कुसुमियत्ति । नित्यं कुसुमित मुकुलित लवकित स्तबकित गुल्मित गुच्छित यमलित युगलित विनमित प्रणमित सुविभक्त प्रतिमंजर्यवतंसकधर्य इति, अर्थस्तुप्राग्वत् । एताश्चसर्वा अपिलताः किंरूपाइत्याह । सर्वात्मनारत्नमय्यः अच्छासल्हाइत्यादि विशेषणानि प्राग्वत्, अत्रतीसेणमित्यादि अरकयसोच्छियासूत्रं दृश्यते, परंवृत्तिकारेणनव्याख्यातमिति न व्याख्यायते । अधुनापद्मवरवेदिकाशब्दप्रवृत्तिनिमित्तं जिज्ञासुः पृच्छति । सेशब्दोऽथशब्दार्थः । अथ केनार्थेन केन कारणेन भदन्त एवमुच्यते पद्मवरवेदिका पद्मवरवेदिकेति, किमुक्तंभवति पद्मवरवेदिकेत्येवं रूपस्यशब्दस्य तत्र प्रवृत्तौ किंनिमित्तमिति एवमुक्ते भगवानाह–गौतम पद्मवरवेदिकायां तत्रतत्रदेशे तस्यैवदेशस्य तत्र तत्र एकदेशे वेदिकासू पवेशनयोग्यमत्तवारणरूपासु वेदिकापार्श्वे

॥ टीका

षु वेइया पुडंतरेसु इति, द्वेवेदिके वेदिका पुटन्तेषा मन्तराणि तेषुस्तंभेषु सामान्यतः स्तम्भबाहासु-स्तम्भपार्श्वेषु स्तम्भशीर्षेषु, द्वौस्तम्भौ स्तंभपुटंतेषा मंतराणि तेषु सूचीषुफलकसम्बन्धविधनाभावहेतुपादुकास्थानीयासु तासामुपरि इति तात्पर्यार्थः, सूचीमुखेषु यत्र प्रदेशे सूची फलकम्भित्वामध्ये प्रविशति तत्प्रत्यासन्नोदेशः सूचीमुखं तेषु, तथा सूचीफलकेषु सूचीभिः सम्बन्धितायेफलकप्रदेशास्तेषूपचारात् सूचीफलकानि तेषु सूचीनामधउपरिच वर्त्तमानेषु, तथा सूचीपुटांतरेषु द्वेमूच्यौ सूचीपुटन्तेषा मन्तरेषु, पद्माः पद्मबाहा वेदिकैकदेशविशेषाः तेषु बहूनिउत्पलानि गर्दभकानि ईषन्नीलानिवा पद्मानि सूर्यविकासीनि ईषत्श्वेतानिवा नलिनानि ईषद्रक्तानिकुमुदानि चंद्रविकासीनि सुभगानि पद्मविशेषाः सौगन्धिकानि कल्हाराणि पुंडरीकाणि श्वेतपद्मानि तान्येव महापुंडरीकाणि शतपत्राणि दलशतकलितानि सहस्रपत्राणि सहस्रदलकलितानि एतौचपद्मविशेषौ पत्र सङ्ख्याविशेषात् पृथगुपात्तौ सर्वरत्नमयानि श्वेतानि अच्छे त्यादिविशेषणानि प्राग्वत्, महांति महाप्रमाणानि वार्षिकाणि वर्षाकाले पानीयरक्षणार्थं यानिकृतानिवार्षिकानितानि चतानिछत्राणिच तत्समानानि प्रज्ञप्तानि, हे श्रमण-तपःप्रवृत हे आयुष्मन्-प्रशस्तजीविन् से एएणट्ठेणमित्यादि तदेतेनार्थेनान्वर्थेन-गौतम-एव मुच्यते पद्मवरवेदिका पद्मवरवेदिकेति तेषुतेषु यथोक्तरूपेषु यथोक्तरूपाणिपद्मानि पद्मवरवेदिकाशब्दस्य प्रवृत्तिनिमित्तमिति भावः । व्युत्पत्तिश्चैवं पद्मप्रधाना वेदिका पद्मवरवेदिकेति । अथापरञ्चप्रवृत्तिनिमित्तं किं तदित्याह । पद्मवरवेदिकायाः शाश्वतंनामधेयं प्रज्ञप्तमिति, अयमभिप्रायः प्रस्तुतपुद्गलप्रचयविशेषे पद्मवरवेदिकेति शब्दस्य निसक्तनिरपेक्षाऽनादिकालीनारूढिः प्रवृत्तिनिमित्तमिति । पद्मवरवेइयाणंभन्तेत्ति, पद्मवरवेदिकाशाश्वती उताऽशाश्वती प्रत्ययेडीर्नवा इत्यनेन प्राकृतसूत्रेण ङीप्रत्ययस्यवैकल्पिकत्वेन आर्षतया सूत्रेनिर्देशः किंनित्याउताऽनित्येतिभावः । भगवानाह-गौतम स्याच्छाश्वतीस्यादशाश्वती कथंचिन्नित्या कथंचिदनित्येत्यर्थः । स्याच्छब्दोनिपातः कथंचिदित्येतदर्थवाची।एतदेवसविशेषंजिज्ञासुः पृच्छति । से केणट्ठेणमित्यादि, सेशब्दोऽथशब्दार्थः सच प्रश्नेकेनार्थेन कारणेन भदन्त एवमुच्यते यथा स्याच्छाश्वतीस्यादशाश्वतीति।भगवानाह-गौतम द्रव्यार्थतयाशाश्वती तत्रद्रव्यं सर्वत्रान्वयिसामान्य मुच्यते द्रवतिगच्छतितान् तान् पर्यायान् विशेषानितिवा द्रव्यमितिव्युत्पत्तेः, द्रव्यमेवार्थस्तात्विकः पदार्थप्रतिज्ञायां यस्य नतुपर्यायाः, सद्द्रव्यार्थः द्रव्यमात्रास्तित्व प्रतिपादको नयविशेषस्तद्भावो द्रव्यार्थता तया द्रव्यमात्रास्तित्व प्रतिपादकनयाभिप्रायेणेति यावत्, शाश्व

ती द्रव्यार्थिकनयमतपर्यालोचनाया मुक्तरूपस्य पद्मवरवेदिकाया आकारस्य सदाभावात्, तथावर्णपर्यायैः कृष्णादिभिः गन्धपर्यायैः सुरभ्यादिभिः रस पर्यायै स्तिक्तादिभिः स्पर्शपर्यायैः कठिनत्वादिभिः अशाश्वती अनित्या तेषां वर्णादीनां प्रतिक्षणं कियत् कालानंतरंवा ऽन्यथा ऽन्यथाभवनात्, अता दवस्थ्यस्यवानित्यत्वात्, नचैवमपिभिन्नाधिकरणे नित्यत्वाऽनित्यत्वे द्रव्यपर्याययो र्भेदाभेदो पगमात्, अन्यथो भयोरप्यसत्वापत्तेः, तथाहि-शक्यते व क्तुंपरपरिकल्पितं द्रव्यमसत् पर्यायव्यतिरिक्तत्वात्, बालत्वादिपर्यायशून्यवंध्यासुतवत्, तथा-परपरिकल्पिताः पर्याया असन्तोद्रव्यव्यतिरिक्तत्वात् वं ध्यासुतगतबालत्वादिपर्यायवत् । उक्तंच द्रव्यंपर्यायवियुतं पर्यायाद्रव्यवर्जिताः । क्वकदाकेनकिंरूपा दृष्टमामेनकेनवा ? इति कृतं प्रसङ्गेन, सेएएणठे णमित्याद्युपसंहारवाक्यंसुगमं । इह द्रव्यास्तिकनयवादी स्वमतप्रतिष्ठापनार्थमेवाह । नात्यंतासतउत्पादो नापिसतो विद्यतेविनाशोवा।नासतोविद्यते भावोनाभावो विद्यते सत इति वचनात्, योतुदृश्यते प्रतिवस्तु उत्पादविनाशौतदाविर्भावतिरोभावमात्रं यथासर्प्पस्यउत्फणात्व विफणत्वे,तस्मात् सर्वं वस्तुनित्यमिति । एवंचतन्मतचिंतायांसंशयः किंघटादिवत् द्रव्यार्थतयाशाश्वती उत सकलकालमेवं रूपेति, ततः संशयापनोदार्थं भगवंतं भूयः पृच्छति । पउमवरवेइयाणमित्यादि पद्मवरवेदिका णमिति पूर्ववत् । भदंत-परमकल्याणयोगिन् कियच्चिरं कियंतंकालंयावद्भवतिएवंरूपाकियंतंकाल मवतिष्ठते इति,भगवानाह-गौतम कदाचिन्नासीत् सर्वदैवासीदिभावः । अनादित्वात्, तथानकदाचिन्नभवति सर्वदैव वर्त्तमानकालचिन्तायां भवतीतिभावः।सर्व दैवभावात्,तथान कदाचि न्न भविष्यति किंतु भविष्यच्चिंतायां सर्वदैव भविष्यतीति प्रतिपत्तव्यं।अपर्यवसितत्वात्,तदेवंकालत्रय चिंतायांनास्तित्वप्रतिषेधं सम्प्रत्यस्तित्वं प्रतिपादयति । भुविंचइत्यादि । अभूच्च भवतिच भविष्यतिचेति एवंत्रिकालावस्थायित्वात् ध्रुवामेर्वादिवत् ध्रुवत्वादेव सदैव स्वरूपे नियता नियतत्वादेवच शाश्वती शश्वद्भवनस्वभावा, शाश्वतत्वादेवच सतत गंगा सिन्धु प्रवाह प्रवृत्तावपिपौण्डरीक ह्रदइवानेक पुद्गलविघटनेपितावन्मात्रान्यपुद्ग लोच्चटनसंभवात्,अक्षया नविद्यतेक्षयो यथोक्तस्वरूपाकारपरित्र्यंशोयस्याः सा अक्षया अक्षयत्वादेवा ऽव्यया, अव्ययशब्दवाच्या मनागपि स्वरूपचलनस्य जातुचिदप्यसंभवात्,अव्ययत्वादेव स्वप्रमाणे ऽवस्थिता मानुषोत्तरपर्वताद्बहिःसमुद्रवत्,एवंस्वस्वप्रमाणेसदावस्थानेन चिंत्यमाना नित्या धर्मास्तिकायादि वत् ।अथजगत्याउपरि पद्मवरवेदिकायाः परतोयदस्तितदावेदयति । तस्याणमिति प्राग्वत् जगत्याउपरि पद्मवरवेदिकायाः बहिः परतोयः प्रदेशस्तत्र ए

॥ टीका ॥

तस्मिन् णमिति पूर्ववत् महानेकोवनषंडःप्रज्ञप्तः,अनेकजातीयाना मुत्तमानां महीरुहाणां समूहोवनषंडः। यदुक्तं एगजाइएहिं रुक्खेहिं वणं अणेगजाइएहिं उत्तमेहिं रुक्खेहिं वण संडेइति । सच वनषंडो देशोने किंचिदूने द्वेयोजने विष्कंभतो विस्तारतः, देशश्चात्र सार्द्धधनुः शतद्वयरूपो ऽवगंतव्यः । तथाहि-चतुर्योजनविस्तृतशिरस्कायां जगत्यां बहुमध्यभागे पंचधनुःशतव्यासा पद्मवरवेदिका तस्याश्च बहिर्भागे एकोवनषंडो ऽपरश्चांतर्भागे, अतोजग तीमस्तकविस्तारो वेदिकाविस्तारधनुःशतपंचकोनो ऽर्द्धक्रियते ततो यथोक्तं मानं लभ्यत इति । तथा जगती समएव जगतीसमको जगती तुल्यः परिक्षेपेण परिरयेण, वनषंडवर्णकः सर्वोप्यत्र प्रथमोपांगगतोनेतव्यः स्मृतिपथं प्रापणीयः । सचायंकिल्लेकिल्लोभासे नीले नीलोभासे हरिए हरिओभासे सीए सीओभासे णिद्धेणिद्धोभासे तिव्वे तिव्वोभासे किल्ले किल्लोलाए नीले नीलोलाए हरिए हरियच्छाए सीए सीअच्छाए णिद्धेणिद्धच्छाए तिव्वे तिव्वच्छाए घणकडियडच्छाए रम्मे महामेहणिकुरंबभूए तेणं पायवा मूलमंतो कंदमंतो खंधमंतो तयामंतो सालमंतो पवालमंतो पत्तमंतो पुप्फमंतो फलमंतो बीअ मंतो अणुपुव्विसुजायरुइलवट्टभावपरिणया एगखंधी आणगसाहप्पसाहविडिमा अणेगणरवामसुप्पसारियागेज्जघण विउल वट्टखंधी अच्छिद्दपत्ता अ विरलपत्ता अवाईणपत्ता अणीईअपत्ता निद्धूयजरठपंडुरपत्ता णवहरिअ भिसंतपत्तभारंधयारगंभीरदरिसणिज्जा उवविणिग्गयनवतरुणपत्तपल्लवकोम लउज्जल चलंत किसलय सुकुमालपवालसोभियवरं कुरग्गसिहरा णिच्चं कुसुमिया णिच्चं मउलिआ णिच्चं लवइया णिच्चं थवइया णिच्चं गुलइया णिच्चं

॥ मूल ॥

तीसेणं जगईए उप्पिं बाहिं पउमवरवेइयाए एत्थणं महंएगे वणसंडे पन्नत्ते ? देसू णाइं दोजोअणाइं विक्खंभेणं जगईसमए परिरएवेणं, वणसंडवन्नओ णेयव्वो ॥

॥ अनुवाद॥

तस्या जगत्या उपरि बहिःपद्मवरवेदिका अत्र महानेकोवनखण्डःप्रज्ञप्तः,देशोने द्वे योजने विष्कम्भेन जगतीसमः परिक्षेपेण वनखण्डवर्णको, नेतव्यः

॥ भाषा ॥

तीसेणं० तेजगतीनें उपर,उपरलेभागें ॥ बाहिरपासे पद्मवरवेदिकाने महिलेंपासै (वेदिकानें बेपासें) ॥ एत्थणं०इहां एकमोटो वनखंड वृक्षसमूह कह्यो तीर्थंकरें ॥ देसूणा० देशइ काई उणाबेदोयोजन विष्कंभपणें ॥ जगइ०जगतीने समानपरिधिपणेछै वणसंड० वनखंडवर्णन उवाइसूत्रथी विसेषजाणवो

गुत्थिया णिच्चं जमलिया णिच्चंजुअलिया णिच्चं विणमिया णिच्चं पणमिया णिच्चं कुसुमिअ मउलिअ लवइअ थवइअ गुलइअ गोच्छिअ जमलिअ जुअलिअ विणमिअपणमिअ सुविभत्तपडिमंजरिवडिंसयधरासु अबरहिणमयण सलागकोइलकोरगभिंरग कोंडलक जीवं जीवगणं दीसुह कविल पिंडल रक्ख का रंडचक्कवाय कलहंस सारसं अणेगसउणगणविरइअस दुदुन्नइअ महुर सरणाइ आसुरम्मासंपिंडि अदरिभमरमहु अरिपहकरपरिलिंतमत्त छप्पय कुसुमा सवलोलमहुरगुमगुमेंतगुंजंतदेसभागा अब्भिंतर पुप्फफला बाहिरपत्तच्छन्ना पुप्फेहिं फलेहिंयउच्छन्नपलिछन्नाणीरो अया अकंटया साउफलाणाणाविह गगुच्छम्ममंडवगसोहिया विचित्तसुहकिउभूयावाविपुरकरिणी दीहीयासुनि वसियरम्मजालथरया पिंडिमनेहारिमंसुगंधिंसुहसुरभिमणहरंच महयागंध द्वणिसुअन्ना सुंहासउकेउबहुला अणेगरहजाणजुग्गसिबि अमन्दमाणिआ पवित्या अणापासादीया जाव पडिरूवाइति। अत्रव्याख्या इह प्रायोमध्यमे वयसि वर्त्तमानानिपत्राणि कृष्णानिभवंति ततस्तद्योगाद्वनषंडोपि कृष्णः। नचोपचारमात्रतः कृष्णइति व्यपदिश्यते किंतुतथा प्रतिभासनात्, तथाचाह कृष्णावभासः यावतिभागे कृष्णानिपत्राणिसन्ति तावति भागे सवनषंडो कृष्णोऽवभासते प्रतिभाति दृष्टृजनलोचन पथइति, कृष्णोऽवभासोयस्य स कृष्णा वभासः। तथा प्रदेशान्तरेनीलपत्रयोगाद्वनषंडोपिनीलः, एवंनीलावभासः तथा प्रदेशांतरे हरितो हरितावभासश्च, तत्रनीलोमयूर कंठवत् हरितरक्तशु कपिच्छवत् हरितालाभइतिवृद्धाः तथा प्रायोदिनकर कराणा मप्रवेशादृक्षाणां पत्राणि शीतानि भवंति तद्योगात् वनषंडोपिशीतः। नचासावुपचारमा त्रतइत्यतआह। शीतावभासइति अधो वर्त्तिन्यंतरदेवदेवीनांतद्योगशीतवातस्पर्शतः शीतोवनषंडो ऽवभासते, तथाएते कृष्णनीलहरितवर्णा यथास्वं स्वस्मिन् २स्वरूपे अत्यर्थं मुत्कटाः स्निग्धाः भण्यंते तीव्राश्च ततस्तद्योगाद्वनषंडोपि स्निग्धस्तीव्रश्चोक्तः। नचैतदुपचारमात्रं किंतु प्रतिभासोपि, ततउक्तं स्निग्धावभासस्तीव्रावभास इति। इहचावभासोन्नांतोपिस्याद्यथा मरुमरीचिकासु जलावभास स्ततोनावभासमात्रो पदर्शने यथावस्थितं वस्तुस्वरूपमुप वर्णितं भवति। किंतु तथा स्वरूपप्रतिपादनेनतत कृष्णत्वादीनां तथा स्वरूप प्रतिपादनार्थं मनुवाद पुरस्सरं विशेषणांतरमाह। किण्हेइत्यादि कृष्णो वनषंडः कुतइत्याह। कृष्णच्छायः। निमित्तकारण हेतुषुसर्वासांविभक्तीनां प्रायोदर्शनमिति वचनात् हेतौ प्रथमा, ततोयमर्थः यस्मात् कृष्णाच्छाया आकार: सर्वोविसंवादितयातस्यास्ति तस्मात् कृष्णः। एतदुक्तंभवति सर्वोविसंवादितयातत्र कृष्ण आकारउपलभ्यते तवन्नांतावभाससंपादितसत्ताकः स

र्वाविसंवादोभवति ततस्तत्ववृत्या स कृष्णोनञ्नांतावभासमात्रव्यवस्थापित इति । एवंनीलोनीलच्छाय इत्याद्यपि भावनीयं । नपरं शीतः शीतच्छाय इ त्यत्रछायाशब्दआतपप्रतिपक्षवस्तुवाची द्रष्टव्यः । घणत्ति । इहशरीरस्य मध्यभागेकटिस्ततो ऽन्यस्यापि मध्यभागः कटिरिवकटिरित्युच्यते कटिस्तटमिव कटितटं घनाअन्योन्यशाखाप्र शाखानुप्रवेशतोनिविडा कटितटे मध्यभागे छायायस्यघनकटितटच्छायः मध्यभागेनिविडतरच्छायइत्यर्थः । वाचनांतरेघण कडिअ कडच्छाएति पाठेतु कटः संजातोऽस्येति कटितः कटांतरेणोपर्यावृत इत्यर्थः कटितश्चासौकटश्च कटितकटः घना निविडा कटितकटस्येवाधो भू मौछायायस्यसघनकटितकटच्छायः अतएवरम्योरमणीयः तथामहान् जलभारावनतः प्रावृट्कालभावी यो मेघनिकुरंबो मेघसमूहस्तथाभूतोगुणैः प्राप्तोम हामेघवृंदोपमइत्यर्थः । तेणंपायवत्ति । यत् संबंधीवनषंडस्तेपादपाः मूलमंत इत्यादीनि दशपदानि तत्रमूलानि प्रभूतानि दूरावगाढानिच संत्येषामिति मूलवंतः यानिकन्दस्याधः तानिमूलानि तेषामुपरिवर्त्तिनः कन्दाः स्कंधः स्तूर्ध्वंयातामूलशाखाः प्रभवन्ति त्वक्छल्लीशले शाखा प्रवालः पल्लवांकुरः प त्रपुष्पफलबीजानि प्रसिद्धानि सर्वत्रातिशायने (क्वचिद्भूम्निवा)मतुप् प्रत्ययः । अणुपुव्वित्ति आनुपूर्व्या मूलादिपरिपाट्या सुष्ठु जाताः आनुपूर्वीसुजाताः रु चिराःस्निग्धतयादीप्यमानच्छविमन्तः, तथा वृत्तभावेन परिणता वृत्तभावपरिणताः । किमुक्तं भवति एवंनामसर्वासुदिक्षुच शाखादिभिः प्रसृता यथावर्तु लाकृतयोजाताइति ततः पदत्रयस्यकर्मधारयः । तथातेपादपाः प्रत्येकमेक स्कंधाः प्राकृतेचास्य स्त्रीत्वमिति एकरकंधी इति सूत्रपाठः अनेकाभिः शाखा भिःप्रशाखाभिश्च मध्यभागे विटपो विस्तारोयेषांते तथा, तथा तिर्यग्बाहुद्वय प्रसारण प्रमाणोव्यामः अनेकैर्नरव्यामैः पुरुषव्यामैः सुप्रसारितैरग्राह्योऽ मेयोघनोनिविडो विपुलो विस्तीर्णः स्कंधो येषांते तथा. अच्छिद्राणिपत्राणियेषांते अच्छिद्रपत्राः किमुक्तं भवति नतेषांपत्रेषु वातदोषतः कालदोषतोवा गडुरिकादिरीतिरुपजायते येनतेषुच्छिद्राण्यभविष्यन्नित्यच्छिद्रपत्राः । अथवा एवंनामान्योन्यंशाखाप्रशाखानु प्रवेशात् पत्राणिपत्राणा मुपरिजातानि येन मनागप्यंतरालरूपं च्छिद्रंनोपलक्ष्यत इति अच्छिद्रपत्राः । कुतइत्याह । अविरलपत्ताइ ति अत्रहेतौ प्रथमा ततोयमर्थः यतोऽविरलपत्रा अतोअच्छिद्रपत्राः अविरलपत्राअपि कुत इत्याह । अवाईणत्ति वातादुपहतानि वातीतानि वातेन पातितानीत्यर्थः नवातीतानि अवातीनानि अवातीनानि पत्राणियेषां तेतथा, किमुक्तंभवति नतत्र प्रबलोवातः खरपरुषोवाति येन पत्राणित्रुटित्वामूमौपतन्ति ततोऽवातीन पत्रत्वादविरलपत्रा इति, अच्छिद्रपत्रा इत्य

त्रप्रथमव्याख्यापक्षेहेतुमाह । अणीइंपत्ताइति नविद्यते ईतिर्गंडुरिकादिरूपायेषुतान्यनीतीनि अनीतिनिपत्राणियेषांते तथा अनीतिपत्रत्वाच्चाच्छिद्रपत्राः तथा निर्द्धूतानि अपनीतानि जरठानि पुराणत्वात्कर्कशानि ततएवपांडुराणि पत्राणि येषांते तथा । अयमाशयः यानिवृक्षस्थानि उक्तरूपाणि पत्राणि तानि वातेन निर्धूय २ भूमौपात्यंते ततोपिच प्रायोनिर्द्धूयनिर्द्धूयान्यत्रापसार्यंत इति तथा, नवेनसद्यस्केन हरितेन शुकपिच्छाभेन ततएवभासमानेन स्निग्धत्वचा दीप्यमानेन पत्रभारेण दलसंचयेन योज्ञातों ऽधकारस्तेन गम्भीरा अलब्धमध्यभागाः सन्तोदर्शनीयाः नवहरितभासमानपत्रभारांधकारग म्भीरदर्शनीयाः तथा उपविनिर्गतैर्निरंतरविनिर्गतैर्नवतरुणपत्रपल्लवै स्तथा कोमलैर्मनोज्ञैरुज्वलैः शुद्धैश्चलद्भिरीषत्कंपमानैः किशलयैरवस्थाविशेषोपेतैः पल्लवविशेषै स्तथा सुकुमारैः प्रवालैः पल्लवांकुरैः शोभितानि वरांकुराणि वरांकुरोपेतानि अग्रशिखराणियेषांते तथा इहचांकुरप्रवालयोः कालकृताव स्थाविशेषाद्विशेषो भावनीयइति । णिद्धं कुसुमिया इत्यादिकं वर्डंसयधरा इत्यंतं सूत्रं पूर्ववद्व्याख्येयं, तथाशुकबर्हिणमदनशलाकाकोकिल कोरकभृंगारक कोंडलक जीवंजीवक नंदीमुख कपिल पिंगलाक्षक कारंडव चक्रवाक कलहंस सारसाएयानामनेकेषांशकुनिगणानां पक्षिकुलानां मिथुनैः स्त्रीपुंसयुग्मैर्वि रचितं शब्दोन्नतिकंचोन्नतशब्दकं मधुरस्वरंच नादितं लपितं येषुते तथा, अतएव सुरम्या अतिमनोज्ञाः अत्रशुकाः कीराः बर्हिणामयूराः मदनशला काः सारिकाः, कोकिल चक्रवाक कलहंस सारसाः प्रतीताः शेषास्तुजीवविशेषाः लोकतोऽवसेयाः संपिंडिता एकत्रपिंडीभूता दृप्ता मदोन्मत्ततयादर्प्पा ध्माता भ्रमरमधुकराणां पहकराः संघाताः यत्र तेतथा तथा परिलीयमाना अन्यत आगत्यागत्याश्रयंते मत्ताः षट्पदाः कुसुमासवलोलाःकिंजल्कपा नलंपटा मधुरं गुमगुमायमाना गुंजंतश्चशब्दविशेषं विदधाना देशभागेषुयेषांते तथा गमकत्वादेवमपिसमासः, ततोभूयः पूर्वपदेन सह विशेषणंसमा सः, तथा अभ्यंतराएयंतर्वर्तीनि पुष्फफलानियेषांते तथा, तथाबहिः पत्रैः च्छन्ना व्याप्ताः तथा पत्रैश्च पुष्पैश्चच्छन्ना परिच्छन्ना एकार्थिकशब्दद्वयोपा दानात् अत्यंतमाच्छादिताः । तथा नीरोगका रोगवर्जिता वृक्षचिकित्सा शास्त्रेषु येषां प्रतिक्रिया तैः रोगैः स्वतएव विरहिता इत्यर्थः । तथा ऽकंट का नतेषु मध्येबदर्यादयः सन्तीतिभावः । तथास्वादूनिफलानियेषांते स्वादुफलाः स्निग्धफला इत्यपि क्वचित्, नानाविधैर्गुच्छै र्वार्ताकीप्रभृतिभिर्गु ल्मैर्नवमल्लिकादिभिर्मण्डपकैर्द्राक्षामण्डपकै :शोभिताः उक्तरूपैर्गुच्छादिभिस्तेसंश्रिता इत्यर्थः । तथा विचित्त सुहकेउ भूया इति, विचित्रान् शुभान् केतून्

॥ टीका ॥

ध्वजान् प्राप्ताः विचित्रसुरकेउबहुला इतिपाठांतरं, तत्र विचित्रैःशुभैर्मङ्गलभूतैः केतुभिर्ध्वजैर्बहुला व्याप्तास्तथा वाप्यश्चतुरस्राकारास्ताएव वृत्ताः पुष्करिण्यः दीर्घिका ऋजुसारिण्यः तासुसुष्ठूनिवेशितानिरम्याणिजालगृहकाणि यत्रतें तथा । अयमर्थः यत्रतेवृत्ता आसन्नाः सूत्रवाप्यादिषुगवाक्षवन्तिगृहाणि व्यंतरमिथुनानां जलकेलिकृते बहूनि संतीति, पंडिमनिर्हारिमां पुद्गलसमूहरूपां दूरदेशगामिनींच सुगंधिं सद्गंधिकां शुभसुरभिन्योगंधान्तरेभ्यः सकाशान्मनोहराया सा तथा तांच महतामोचनप्रकारेण प्राकृतत्वाद्वाद्वितीयार्थे तृतीया महती मित्यर्थः । गंधघ्राणिं यावद्भिर्गंधपुद्गलैर्घ्राणेंद्रियस्य तृप्तिरुपजायते तावती पुद्गलसंहति रूपचारा द्गंधघ्राणिरित्युच्यते तांनिरंतरंमुंचंत इत्यर्थः, तथा शुभाः प्रधानाः सेतवोमार्गाः आलवालपाल्योवा के तवो ध्वजबहुला अनेकरूपायेषान्ते तथा रथाः क्रीडारथादयः यानानि उक्तवक्ष्यमाणातिरिक्तानि शकटादीनि वाहनानि युग्यानि गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि चतुरस्रवेदिकायुतानि नरयानानि शिबिकाः कूटाकारेणाच्छादिताः जंपानविशेषाः स्यंदमानिकाः पुरुषप्रमाणजंपानविशेषाः अनेकेषांरथादीनामधोविस्तीर्णत्वात्प्रविमोचनं येषुते तथा, पासादीया इत्यादि प्राग्वत् । अथ वनषंडस्य भूमिभागवर्णनमाह । तस्यणमिति पूर्ववत् वनषंडस्यांत र्मध्येबहु अत्यंतं समोबहुसमः सचासौरमणीयश्च सतथा भूमिभागः प्रज्ञप्तः । कीदृश इत्याह । से इति तत् सकललोकप्रसिद्धं यथेति दृष्टांतोपदर्शने नामेति शिष्यामंत्रणे एइति वाक्यालंकारे, आलिंगोमुरजो वाद्यविशेष स्तस्य पुष्करंचर्मपुटकं तत्किलात्यंतसममिति तेनोपमाक्रियते, इतिशब्दाःसर्वेपिस्वस्वोपमाभूतवस्तुसमाप्तिद्योतकाः वाशब्दाः समुच्चये यावच्छब्देन बहुसमत्ववर्णकोमणिलक्षणवर्णकश्च ग्राह्य इति । सचायं मुरंग

॥ मूल ॥

तस्सणं वणसंडस्स अंतो बहुसमरमणिज्जे भूमिभाए पन्नत्ते? सेजहाणामए आलिंगपुक्करेइ वा जाव

॥ अनुवाद ॥

तस्य वनखण्डस्यान्तर्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः. सयथा-नामकः आलिङ्गपुष्करमिव यावत्

॥ भाषा ॥

तस्सं०तेवनषंडनइ मध्यइं अत्यंतसम रमणीक मनोहर भूमी भाग कह्यो तीर्थंकरइं । से०ते दृष्टांते करी कहे छइं जिमकोईक आलिंगतेमादलप्रमुख वाजो तेहनां चर्मपुट जेहवोसमरमणीक कह्यो इतलो छे । जा०पूर्वतीपरइ, (आलो आकारतें परेश्न ना नीचलछे वी०तीछे घसी०ईमांजी०तोमलछे)

पुरकरे इवा सरतले इवा करतले इवा चंदमंडले इवा सूरमंडले इवा आइंस मंडले इवा उरब्भचम्मे इवा वसहचम्मे इवा वराहचम्मे इवा सीहचम्मे इवा वग्घचम्मे इवा दीवियचम्मे इवा अणेगसंकुकीलगसहस्सवितते आवट्टपव्वावट्टसेढिपसेढिसोच्छिय सोवच्छिय पूसमाणवद्धमाणग मच्छंडक मगरंडक जारमार फुल्लावलिय उमपत्त सागरतरंगवासंती पउमलयभत्तिचित्तेहिं सच्छाएहिं सप्पभेहिं समरीइएहिं सउज्जाएहिं इति । अत्र व्याख्यामृदंगो लोकप्रतीतो मर्दलस्तस्य पुकरं मृदंगपुकरं तथापरिपूर्णपानीयेन भृतं तडागंसरस्तस्यतलमुपरितनोभागः सरस्तलं अत्रव्याख्यानतोविशेष प्रतिपत्तिरिति निर्वातं जलपूर्णमरोगाढ्यं । अन्यथा वातोद्धूयमानतयोल्लावचजलत्वेन विवक्षितः समभावोनस्यादित्यर्थः, करतलं प्रतीतं चंद्र मंडलं सूर्यमंडलंच यद्यपि वस्तुगत्याउत्तानीकृतार्द्धकपित्थाकारपीठप्रासादापेक्षया वृत्तालेखमिति, तद्वतोदृश्यमानो भागोनसमतलस्तथापि प्रतिभासते सम तलइति तदुपादानं आदर्शमंडलं सुप्रसिद्धं ॥ उरब्भचम्मेइवा इत्यादि ॥ अत्रसर्वत्रापि अणेगसंकु कीलगसहस्सवितते इतिपदं योजनीयं । उरब्भउरणः वृषभवराह सिंह व्याघ्रछगलाः प्रतीताः द्वीपीचित्रक एतेषां प्रत्येकंचर्म अनेकैः शंकुप्रमाणैः कीलकसहस्रैर्यतो महद्भिः कीलकैस्ताडितं प्रायोमध्येक्षामं भवतिनसमतलं तथारूपताडा संभवात् अतः शंकुग्रहणं वितंववितीकृतंताडितमिति भावः । यथा ऽत्यंत बहुसमं भवति तथा तस्यापि वनषंडस्यां त बहुसमोभूमिभागः । पुनःकथं भूत इत्याह । णाणाविहपंचवण्णेहिं मणीहिंतणेहिं उवसोभिए इतियोगः नानाविधजातिभेदा नाना प्रकाराये पंचवर्णा मणयस्तृणानिचतैरुपशोभितः कथंभूतैर्मणिभिरित्याह । आवर्त्तादीनिमणीनां लक्षणानि तत्रावर्त्तः प्रतीतः एकस्यावर्त्तस्य प्रत्यभिमुखः आवर्त्तः प्रत्या वर्त्तः श्रेणिस्तथाविधबिंदुजातादेः पंक्तिः तस्याश्च श्रेणेर्योविनिर्गता ऽन्या श्रेणिः साप्रश्रेणिः स्वस्तिकः प्रतीतः सौवस्तिक पुष्पमाणवौच लक्षणविशे

॥ मूल ॥

णाणाविहपंचवण्णेहिं मणीहिं तणेहिं उवसोभिए तंजहा— किण्हेहिं

॥ अनुवाद॥

नानाविधपञ्चवर्णैर्मणिभि स्तृणै रुपशोभितः तद्यथा-कृष्णैः (नीलवर्णैर्लोहितवर्णैर्हारिद्रवर्णैःशुक्लवर्णैश्चेति)

॥ भाषा ॥

णा०नानाप्रकारमाअनेकप्रकारना पंचवर्ण । म०मणीरत्नकरी।त०तृणेकरी।उ०शोभायमानछे। तेकहछइ।कि०कालोवर्ण (नीलवर्णलालवर्णपीलावर्णश्वेतवर्ण)

॥ टीका॥

षौलोकात् प्रत्येतव्यौ वर्द्धमानकं शरावसंपुटं मत्स्यांडकमकरांडके जलचरविशेषांडके प्रसिद्धे जारमारेति लक्षण विशेषौ सम्यग्मणिलक्षणवेदितौ लोका द्वेदितव्यौ पुष्पावलि पद्मपत्र सागरतरंगवासंतीलता पद्मलताः प्रतीताः तासांभक्त्याविच्छित्या चित्रमालेखोयेषुते तथा किमुक्तंभवति आवर्त्तादि लक्षणोपेतै स्तथासती शोभनाच्छाया शोभायेषांते तथातैः सप्यभेहिं इत्यादि विशेषण द्वयं प्राग्वत्, एवं भूतैर्नानाविधैः पंचवर्णैर्मणिभिस्तृणैश्चोपशो भित स्तद्यथेत्युपदर्शने कृष्णैः कृष्णवर्णोपेतैः एवंवसउत्ति एवमनुना प्रकारेणशेषोपिनीलादिकोवर्णो मणितृणविशेषणतया योजनीयो, यथा नीलवर्णैर्लोहितवर्णैः हारिद्रवर्णैः शुक्लवर्णैश्च तथा तेषांमणितृणानां गंधः स्पर्शः शब्दश्चनेतव्यः तथा तस्यवनषंडस्य भूमिभागे पुष्करिण्यः पर्वतका गृहका णि मंडपकाः पृथिवी शिलापट्टकाश्च नेतव्या बुद्धिपथं प्रापणीयाः । भवंतिहि सूत्रकाराणां गतेर्वैचित्र्यादीदृशानिलाघवार्थकानि एवं जाव तहेव इच्चाइं व सणं सेसंजहा इत्याद्यनेक प्रकारक पदाभिव्यंग्यानि अतिदेश रूपाणि सूत्राणि यदाह कत्थइदेसग्गहणं कत्थइभसंति निरवसेसाइं उक्कमकमजुत्ताइं का रणवसउनिरुत्ताइं १ इति अत्रैत त्सूत्राभिप्रायाभिव्यक्तये जीवाभिगमादि ग्रंथोक्तः कियान् पाठोलिख्यते तत्यणंजेतेकिल्लामणीतणायतेसिणं अयमेया रूवेवण्णावासेपण्णत्तेतंजहा सेजहाणामए जीमूते इवा अंजणेइवा खंजणे इवा कज्जलेइवा मासीइवा मसीगुलियाइवा गवलेइवा गवलगुलिया इवा भ मरे इवा भमरावली इवा भमरपत्तसारे इवा जंबूफलेइवा अट्टारिठेइवा परपुट्ठे इवा गएइवा गयकलभेइवा किल्लसप्पेइवा किल्लकेसरेइवा आगास थिग्गलेइवा किल्लासोए इवा किल्लकरवीरेइवा किल्लबंधुजीवे इवा भवेएयारूवे गोअमा-णो इणट्ठे समट्ठे तेणं कल्लामणी तणाय इत्तो इट्ठतरयाचेव कततराचेव मणुन्नतराचेव मणामतराचेव वण्णेणं पण्णत्ता इति, अत्रव्याख्या तत्यणमित्यादि तत्रतेषां पञ्चवर्णानांमणीनां तृणानांच मध्ये णमिति प्रा

॥ मूल ॥

एवं वण्णो गंधो फासो सद्दो ॥ पुक्करिणीउपव्वयगा घरगा मंडवगा पुढविसिलावट्टगा य णेयव्वा,

अनुवाद॥

एवं वर्णो गन्धः स्पर्शः शब्दः ॥ पुष्करिण्यः पर्वतकाः गृहकाणि मण्डपका पृथ्वीशिलापट्टका श्च नेतव्याः

॥ भाषा ॥

इमेवर्णपांच गंध२स्पर्श आठ८शब्दतेसमभूमिभागेपू०वावीछइप०पर्वतघ०गृहभवन मांडवापु०पृथ्वीसिलापट्टक एतलीवस्तुसर्वजीवाभिगमसूत्रथीजाणवो ॥

ग्वत् येतेकृष्णा मणय स्तृणानिच येइत्येवंसिद्धेयेते इति वचनं भाषाक्रमार्थं। तेसिणमित्यादि सेजहाणामए इत्यंतंच सूत्रं पूर्ववत्, जीमूतोमेघः सचेहप्रावृट् प्रारंभ समये जलपूर्णोवेदितव्यः, तस्यैव प्रायोऽतिकालिम संभवात्, इतिशब्दउपमाभूतवस्तुनामपरिसमाप्तिद्योतकः वाशब्दउपमानान्तरापेक्षया समुच्चये, एवं सर्वत्र इति वा शब्दौदृष्टव्यौ। अंजनं सौवीरांजनं रत्नविशेषोवा खज्जनंदीपमल्लिकामलः स्नेहाभ्यक्तशकटाक्षघर्षणोद्भव मित्यपरे कज्जलं दीपशिखापतितं मषी तदेवकज्जलं ताम्रभाजनादिषु सामग्रीविशेषेणघोलितं मषीगुलिका घोलित कज्जलगुटिका गवलंमाहिषंशृङ्गं तदपिचापसारितो परितनत्वग्भागंग्राह्यं तत्रैवविशिष्टस्य कालिम्नः संभवात्, तथा तस्यैवमाहिषशृङ्गस्य निर्विडतरसारनिर्वर्त्तिना गुटिका गवलगुटिका भ्रमरः प्रतीतः भ्रमरावली भ्रमरपंक्तिः तथा भ्रमरपत्रसारः भ्रमरस्यपत्रं पक्ष स्तस्य सार स्तदंतर्गतो विशिष्टश्यामतोपचितः प्रदेशः जंबूफलंप्रतीतं आर्द्रारिष्टः कोमलकाकः परपुष्टः कोकिलः गजोगजकलभश्च प्रसिद्धौ कृष्णसर्पः कृष्णवर्णःसर्पजातिविशेषः कृष्णकेसरः कृष्णबकुलः आकाशथिग्गलं शरदिमेघमुक्तमाकाशखंडं तद्वि कृष्णमतीव प्रतिभातीति तदुपादानं कृष्णाशोक कृष्णकणवीर कृष्णबंधुजीवाः अशोककणवीरबंधुजीववृक्षभेदाः अशोकादयोहि पंचवर्णाभवंति ततः शेषव्युदासार्थं कृष्णग्रहणं एतावत्युक्ते भगवंतं गौतमः पृच्छति। भवेएयारूवेइति। भवेत्मणीनां तृणानांच कृष्णोवर्णः एतद्रूपो जीमूतादिरूपः काकुपाठाच्चास्य प्रश्नसूत्रतावेदितव्या भगवानाह-गौतमनायमर्थः समर्थः नायमर्थः उपपन्नो यदुतएवंभूतः कृष्णोवर्णोमणीनां तृणानांच किंतुते कृष्णामणयस्तृणानिचइतो जीमूतादेः सकाशादिष्टतरका एव कृष्णेनवर्णेन ईप्सिततरकाएव तत्र किंचिदकांतमपिकेषांचिदिष्टतरंभवति ततोऽकांततान्यवच्छित्यर्थमाह कांततरका एव अतिस्निग्धमनोहारिकालिमोपचितया जीमूतादेः कमनीयतरका एव, अतएव मनोज्ञतरका मनसाज्ञायंते अनुकूलतया स्व प्रवृत्ति विषयी क्रियंते इति मनोज्ञा मनोनुकूलाः ततः प्रकर्ष विवक्षायांतरप् प्रत्ययः तत्र मनोज्ञमपि किंचिन्मध्यमं भवति, ततः सर्वोत्कर्षप्रतिपादनार्थमाह। मन आपतरका एव दृष्टृणांमनांसि आप्नुवंति आत्मवशतांनयंतीतिमनआपाः ततः प्रकर्ष विवक्षायांतरप् प्रत्ययः प्राकृतत्वात् पकारस्य मकारेमणामतरा इति भवति। अथवाकोपिशब्दः कस्यापि प्रसिद्धो भवतीति नानादेशजविनेयानुग्रहार्थं एकार्थिका एवैतेशब्दा इति॥ तत्थण०॥ जेते नीलगा मणीतणाय तेसिणं अयमेयारूवे वण्णावासे पण्णत्ते तंजहा सेजहाणामए भिंगेइवा भिंगपत्ते इवा चासेइवा चासपिच्छेइवा सुएइवा सुअपिच्छे

इवा णीलीइवा णीलीभेए इवा नीलीगुलिया इवा सामाएइवा उच्चंतए इवा वणराईइवा हलधरवसणे इवा मोरगीवा इवा पारेवयगीवा इवा अय सिकुसुमे इवा बाणकुसुमेइवा अंजणकेसियाकुसुमे इवा णीलुप्पलेइवा णीलासोए इवा णीलकणवीरे इवा णीलबंधुजीवे इवा भवेएयारूवे गोअमा णोइणठे समठे तेणं णीलामणी तणायइत्तो इठतरयाचेव कंततरयाचेव मणुण्णतरयाचेव मणामतरयाचेव वण्णेणं पण्णत्तेत्ति पदयोजना प्राग्वत् भृंगः कीटविशेषः पद्मलः भृंगपत्रंतस्यैव कीटविशेषस्यपक्ष्म शुकः कीरः शुकपिच्छं शुकस्यपत्रंप्रसिद्धं चाषः पक्षिविशेषः चाषपिच्छं तस्यैवपिच्छं नीलीप्रसिद्धा नीलीभेदो नीलीच्छेदः नीलीगुलिका श्यामाकोधान्यविशेषः प्रज्ञापनायांतु सामाइति पाठस्तत्रश्यामाप्रियंगुः उच्चंतगो दंतरागः वनराजी प्रतीता हलधरोबलभद्र स्तस्यवसनंतच्च किलनीलं भवति सर्वदैवबलो गौरशरीरत्वाच्छोभाकारीति नीलमेव वस्त्रंपरिधत्ते मयूरग्रीवा पारावतग्रीवा अतसीकु सुमबाणकुसुमानि प्रतीतानि अंजनकेशिका वनस्पतिविशेषः तस्याः कुसुमं नीलोत्पलं कुवलयं नीलाशोकनीलकणवीर नीलबंधुजीवा अशोकादिवृक्ष विशेषाः भवे एयारूवे इत्यादि प्राग्वत् व्याख्येयं । तत्थणंजेतेलोहिअगामणी तणाय तेसिणं अयमेयारूवे वण्णावासे पण्णत्ते तंजहा सेजहाणामए सस गरुहिरेइवा उरब्भरुहिरेइवा वराहरुहिरेइवा मणुस्सरुहिरे इवा महिसरुहिरे इवा बालिंदगोवएइवा संकब्भरागे इवा गुंजठरागे इवा जायहिंगुलि ए इवा सिलप्पवाले इवा पवालंकुरे इवा लोहिअरकमणी इवा लरकारसे इवा किमिराग कंबले इवा चीणपिट्ठरासी इवा जासुअणकुसुमें इवा किंसुअकुसुमे इवा पालियघेकुसुमे इवा रत्तुप्पले इवा रत्तासोए इवा रत्तकणवीरे इवा रत्तबंधुजीवे इवा भवे एयारूवे गोअमा णोइणठे समठे तेणं लोहिअगामणी तणाय इत्तो इठतरयाचेव कंततरयाचेव मणुरकतरयाचेव मणामतरयाचेव वस्णेणं पण्णत्तेति । शशकरुधिरं प्रतीतं उरब्भउरणस्तस्य रु धिरं वराहः शूकरः तस्यरुधिरं मनुष्यरुधिरंच प्रतीतं एतानिहि शेषरुधिरेभ्यो लोहित वर्णोत्कटानि भवंति तेनैषामुपादानं बालेंद्रगोपकः सद्योजा त इंद्रगोपकः सहिप्रवृद्धः सन् ईषत् पांडुरक्तो भवति ततो बालग्रहणं इंद्रगोपकः प्रावृट् कालभावी कीटविशेषः बालदिवाकरः प्रथममुद्गच्छन् सू र्यः सहिशदयेरक्तो भवतीति बालपदोपादानं संध्याब्भरागो वर्षासु संध्यासमयभावी अब्भरागः गुंजारक्तिका तस्या अर्द्धतस्यरागः गुंजार्द्धराग गुंजा याहि अर्द्धमतिरक्तं भवति अर्द्धमति कृष्णं अतो गुंजार्द्ध ग्रहणं जात्यहिंगुल को व्यक्तं शिला प्रवालं प्रवालनामारत्न विशेषः प्रवालाङ्कुरस्तस्यैवांकुर

सहि प्रथमोद्गतत्वेनात्यंतरक्तोभवत्यतस्तदुपादानं लोहिताक्षमणिर्नामरत्नविशेषः लाक्षारसःप्रसिद्धः कृमिरागेणरक्तःकंबलः कृमिरागकंबलः वान पिष्टं सिंदूरं तस्यराशिः जपाकुसुमकिंशुककुसुमपारिजातकुसुमरक्तोत्पलरक्ताशोकरक्तकणवीररक्तबंधुजीवाः प्रतीताः। भवेएयारूवे इत्यादि प्राग्वत्, तत्थणं जेते हालिद्दामणी तणाय तेसिणं अयमेयारूवे वण्णावासेपण्णत्ते तंजहा सेजहाणामए चंपगे इवा चंपगच्छल्ली इवा चंपगच्छेए इवा हलिद्दा इवा हलिद्दाभेए इवा हलिद्दा गुलिया इवा हलियालिया इवा हलियालियागुलिया इवा विउरेइवा विउरंगरागे इवा वरकणगे इवा वरकणगनिघसे इवा वरपुरिसवसणे इवा अल्लई कुसुमेइवा चंपगकुसुमे इवा कोहंडियाकुसुमे इवा कोरंटमल्लदामे इवा नइउडाकुसुमे इवा घोसाडिया कुसुमे इवा सुवण्णकुहियाकुसुमे इवा सुहिरण्णिया कुसुमे इवा बीअग कुसुमेइवा पीयासोए इवा पीतकणवीरे इवा पीअबंधुजीवे इवा भवे एयारूवे गोअमा णोइणट्ठे समट्ठे तेणं हालिद्दामणीतणाय एतो इट्ठतराचेव जाव वण्णेणं पण्णत्ता॥तत्रेत्यादि पदयोजना प्राग्वत्, चंपकः सामान्यतः सुवर्णचंपकोवृक्षः चंपकल्ली सुवर्णचंपकत्वक् चंपकभेदः सुवर्णचंपकच्छेदः हरिद्राव्यक्ता हरिद्राभेदो हरिद्राच्छेदः हरिद्रागुलिका हरिद्रासारनिर्वर्त्तितागुटिका हरितालिका पृथिवीविकाररूपा प्रतीता हरितालिकाभेदो हरितालिकाच्छेदः हरितालिकागुलिका हरितालिकारसनिर्वर्त्तितागुटिका चिकुरो रागद्रव्यविशेषः चिकुरांगरागः चिकुररसयोगनिमित्तो वस्त्रादौरागः वरं प्रधानं यत्कनकं पीतसुवर्णमित्यर्थः, वरकनकं तस्य निघर्षः निकषोवाकषपट्टकेरेखारूपः वरपुरुषो वासुदेव स्तस्य वसनं वस्त्रं तद्विकिलपीतमेव भवतीति तदुपादानं अल्लकीकुसुमं लोकतोऽवसेयं चंपककुसुमं सुवर्णचंपककुसुमं कूष्मांडिका कुसुमं पुष्फलीपुष्पं कोरंटकमाल्यदाम कोरंटकः पुष्पजातिविशेषः सच कंटासेलिआख्यः संभाव्यते तस्यमालायै हितानीति कृत्वामाल्यानि पुष्पाणि तेषांदाम मालासमुदायेहिवर्णोत्कटं भवतीति दाम ग्रहणं तडवड आउली तस्याः कुसुमं तडवडा कुसुमं,तथा घोषातकीकुसुमं सुवर्णयूथिकाकुसुमंच प्रतीतं सुहिरण्यिका वनस्पति विशेषः बीअकोवृक्षविशेषः प्रतीतस्तस्य कुसुमं पीताशोकादयोव्यक्ताः शेषं पूर्ववत्॥ तत्थणं जेते सुक्किल्लामणीय तणाय तेसिणं अयमेयारूवे वण्णावासे पण्णत्ते तंजहा सेजहाणामए अंके इवा खीरेइवा खीरपूरे इवा कोंचावली इवा हारावली इवा बलायावली इवा सारइअबलाहए इवा धंतधोअरुप्पपट्ट इवा सालिपिट्ठरासी इवा कुंदपुप्फरासी इवा कुमुअरासी इवा मुक्कच्छिवाडिआ इवा पेडु

णमंजिआ इवा सेइवा मुणाले इवा गयदंते इवा लवंगदले इवा पोंडरीयदले इवा सिंदुवारमल्लदामे इवा सेआसोए इवा सेअकणवीरे इवा सेअबंधुजीवे इवा भवे एयारूवे गोअमा णो इणठे समठे तेणं सुक्किल्लामणीतणाय इत्तो इठतराचेव जाव वण्णेणं पण्णत्ता ॥ तत्थणमित्यादिपदयोजनाप्राग्वत्, अंकोरत्नविशेषः शंखचन्द्रौ प्रसिद्धौ कुंदपुष्पविशेषः दकरजउदककणास्तेह्यतिशुभ्राभवंतीत्युपात्ताः दधिघनोदधिपिंडः क्षीरंप्रतीतं क्षीरपूरंक्ष्यमानमतितापादूर्द्धंगच्छत् क्षीरं क्रोंचावलिहारावलिहंसावलि बलाकावलयः प्रकटार्थाः आवलिपदोपादानं वर्णोत्कट्यप्रतिपादनार्थं चंद्रावलीतटागादिषु जलमध्ये प्रतिबिम्बिता चन्द्रपंक्तिः शारदिकबलाहकः शरत्कालभावीमेघः ध्मातधौतरूप्यपट्टः ध्मातोग्निसंपर्कतो ऽतिनिर्मलीकृतो धौतो भूतिखरंटित हस्तसन्मार्जनेनातितेजितो रूप्यमयः पट्टः, अन्येतु- व्याचक्षते ध्मातेनाग्निसंयोगेन धौतःशोधितो रूप्यपट्टः, शालिपिष्टं शालिचूर्णं तस्यराशिः पुंजःकुंदपुष्पराशिः कुमुदराशिश्च स्पष्टः छेवाडीनामवल्लादिफलिका साच क्वचिद्देशविशेषेशुक्लासती अतीव शुक्ला भवत्यतस्तदुपादानं पेहुणमिंजिका पेहुणं मयूरपिच्छं तन्मध्यवर्त्तिनीमिंजा साचातिशुक्लेति तदुपन्यासः बिसंपद्मिनीकंदः मृणालं पद्मतंतुः शेषागजदंतादिका उत्तानार्थाः नवरं सिंदुवारोनिर्गुण्डीतस्यमाल्यंदाम प्राग्वत् भवे एयारूवे इत्यादि भावितार्थं तदेवमुक्तं वर्णस्वरूपं॥ संप्रतिगंधस्वरूपप्रतिपादनार्थमाह ॥ तेसिणं भंते मणीणं तणाणय केरिसए गंधे पण्णत्ते सेजहा कोट्ठपुडाणवा तगरपुडाणवा एलापुडाणवा चोअपुडाणवा अगरुपुडाणवा दमणगपुडाणवा कुंकुमपुडाणवा चंदणपुडाणवा उसीरपुडाणवा मरुअगपुडाणवा जाईपुडाणवा जूहियापुडाणवा मल्लिआपुडाणवा णवमल्लियापुडाणवा केअइपुडाणवा पाडलपुडाणवा णोमालियापुडाणवा अगरुपुडाणवा लवंगपुडाणवा वासपुडाणवा कप्पूरपुडाणवा अणुवायंसिउद्भिज्जमाणाणवा कुट्टिज्जमाणाणवा रुंचिज्जमाणाणवा उक्किरिज्जमाणाणवा परिभुंजमाणाणवा भंडाउ भंडं साहरिज्जमाणाणं उराला मणुण्ण मणहरा घाणमणोनिव्वुइकरा सव्वउ समंता गंधा अभिणिस्सवंति भवे एयारूवे गोअमा णो इणठे समठे तेसिणं मणीणयतणाणय इत्तो इठतरएचेव जाव मणीमतरएचेव गंधे पण्णत्ते ॥ तेषां जगतीपद्मवरवेदिकावनषंडस्थानां दंत मणीनां तृणानांचकीदृशोगंधः प्रश्नः, भगवानाह॥ गौतम सेजहाणामए इत्यादि। प्राकृतत्वात् सेइतिअ हुवचनार्थः तेयथानाम एइति वा क्या लंकारे गत्वा अभिनिः स्रवन्तीति सम्बन्धः, कोष्ठंगन्धद्रव्यं तत्पुटाः कोष्ठपुटा स्तेषां वाशब्दः सर्वत्रतमुच्चयार्थः इह एकस्य पुटस्य प्रायो नतादृशो

गन्धः प्रसरति गन्धद्रव्यस्याल्पत्वात् ततो बहुवचनं तगरमपि गन्धद्रव्यं एलाः प्रतीताः चोअंगन्धद्रव्यं चंपकदमनककुंकुमचंदनोशीरमरुबकजातीयूथिकामल्लिकास्नानमल्लिकाकेतकीपाटलानवमालिकाअगरुलवंगवासकर्पूराणि प्रतीतानि नवरमुशीरं वीरुणं मूलं अत्रक्वचित् हिरिबेरपुडाणवा इति तत्रह्रीवेर पुटानां बालपुटानां स्नानमल्लिका स्नानयोग्योमल्लिकाविशेषः एतेषा मनुवाते आघ्रायकविवक्षितपुरुषाणामनुकूलेवाते वातिस ति उद्भिद्यमानाना मुद्वाट्यमानानां निर्भिद्यमानानां नितरामतिशयेन भिद्यमानानां कोटिज्जमणोणवा इति इहपुटैः परिमितानि यानि कोष्टा दिगन्धद्रव्याणि तान्यपि परिमेय परिमाणोपचारात् कोष्टपुटादीनी त्युच्यते तेषां कुट्यमानाना मुदूखलादिषुक्षुद्यमानानां रुचिज्जमाणाणवा इति श्लक्ष्ण खंडीक्रियमाणानां एतच्च विशेषणद्वयं कोष्ठादि द्रव्याणामवसेयं तेषांप्रायः कुट्टन श्लक्ष्णखंडीकरण संभवात् नतु यूथिकादीनां तथाउत्कीर्यमाणानांक्षुरि कादिभिः कोष्टादिपुटानां कोष्टादिद्रव्याणां वा उल्लिख्यमानानां तथाविकीर्यमाणाना मितस्ततो विप्रकीर्यमानानां परिभुज्यमानानां परिभोगायोपयु ज्यमानानां क्वचित् परिभाज्यमाणाणंवा इति पाठस्तत्र परिभाज्यमानानां पार्श्ववर्त्तिन्योमनाक् मनाक् दीयमानानां तथाभांडात् स्थानादेकस्माद न्यद्भांडं भाजनांतरं संक्रियमाणानां उदाराः स्फारास्तेषाऽमनोज्ञाअपिभवंत्यतआह, मनोज्ञामनोनुकूलाः तच्चमनोज्ञत्वं कुत इत्याह, मनोहरा मनो हरंत्यात्मवशतांनयंतीति मनोहरा यतस्ततो मनोज्ञा स्तदपि मनोहरत्वंकुत इत्याह घ्राणमनोनिर्वृतिकराः नासासचिवचेतःसुखोत्पादकाः एवंभूताः सर्वतः दिक्षु समंततः सामस्त्येन गंधा अभिनिःस्रवंति जिघ्रतामभिमुखं निस्सरंति एवमुक्तेशिष्यः पृच्छति,भवेदेतद्रूपः भगवानाह-गौतम नायमर्थः समर्थः तेषांमणीनांतृणानांच इतइष्टतरकश्चैव यावन्मन आपतरकश्चैवगन्धः प्रज्ञप्तइति ॥ तेसिणं भन्ते मणीणं तणाणाणय केरिसएफासे पण्णत्ते सेजहाणामए आइणगेइवा रूप इवा बूरेइवा णवणीए इवा हंसगब्भतूली इवा सिरीसकुसुमनिचए इवा बालकुमुदपत्तरासी इवा भवे एयारू वे गोअमा णो इणठे समठे तेसिणं मणीणं तणाणय इत्तो इठतरएचेव जाव फासेणं पण्णत्ते तेषां भदन्त मणीनां तृणानांच कीदृशः स्पर्शः प्रज्ञप्तः,भग वानाह-गौतम सेजहाणामए इत्यादि ॥ तद्यथा अजिनकञ्चर्म्ममयं वस्त्रं रूपं कर्पासपक्ष्म बूरो वनस्पतिविशेषः नवनीतं म्रक्षणं हंसगर्भतूली शिरीष कुसुमनिचयश्च प्रकटः बालानि अचिरकालजातानियानि कुमुदपत्राणि तेषांराशिः क्वचिद्बालकुसुमपत्रराशिरितिपाठः भवे एया रूवे इत्यादि पूर्ववत्

तेसिणंभन्ते मणीणतणाणय पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायं एइयाणं वेइयाणं कंपियाणं चालियाणं फंदियाणं घट्टियाणं खोभिआणं उदीरियाणं केरिसए सद्देपण्णत्ते गोअमा सेजहाणामए सिबिआ एवा संदमाणिआ एवा रहस्सवासच्छत्तस्स सज्झयस्स सघंटाबरस्स सपडीयस्स सतोरणवरस्स सणंदिघोसस्स सखिंखिणीअहेसजालपेरंतपरिरिक्कतस्स हेमवयचित्ततिणिसकणगणिज्जत्तदारुआगस्स सुपिणद्धारगमंडलधुरागस्स कालायससुकयणेमिजंतकम्मस्स आइण्णवरतुरगसुसंपउत्तस्स कुसलनरछेअसारहिसुसंपग्गहिअस्स सरसयबत्तीसतूणपरिमंडियस्स सकंकडावयंसगस्स सचावसरपहरणावरणभरिअजोहजुद्धसज्जस्स रायंगणंसिवा अंतेउरंसिवा रम्मंसिवा मणिकुट्टिमतलंसिअभघट्टिज्जमाणस्स जेंउराला मणुण्णा कण्णमणोणिव्वुइकरा एद्दा सव्वउ समंता अभिणिस्सरंति भवे एयारूवे सिआणो इणट्ठे समट्ठे अत्रव्याख्या, तेषांमणीनां तृणानांच भदन्त पूर्वापरदक्षिणोत्तरागतै र्वातै र्मंदंमंदमेजितानां तथा व्येजितानां विशेषतः कंपितानां एतदेव पर्यायशब्देन व्याचष्टे कंपितानामिति तथा चालितानां इतस्ततो विक्षिप्तानां एतदेव पर्यायेणाह स्पंदितानामिति तथा घट्टितानां परस्परं घर्षयुक्तानां कथं घट्टिता इत्याह क्षोभितानां स्वस्थानाच्चालितानां स्वस्थानाच्चालनमपिकुत इत्याह, उदीरितानामुत्प्राबल्येनेरितानां, प्रेरितानां कीदृशः शब्दः प्रज्ञप्तः भगवानाह-गौतम सयथानामकः शिबिकायावा स्पंदमानिकायावा रथस्यवा तत्रशिबिका जंपानविशेषरूपा उपरिच्छादिता कोष्टाकारा तथा दीर्घा जंपान विशेषः पुरुषस्यस्वप्रमाणावकाशदायी स्यंदमानिका अनयोश्चशब्दः पुरुषोत्पाटितयोः क्षुद्रहेमघंटिकादिचलनवशतोवेदितव्यः रथश्चेहरणरथः प्रत्येतव्यः नक्रीडारथः तस्याग्रेतनविशेषणानामसंभवात्, तस्यच फलकवेदिका यस्मिन् काले येपुरुषास्तदपेक्षयाकटिप्रमाणा वसेया तस्यच रथस्य विशेषणान्यभिधत्ते सछत्रस्य सध्वजस्य सघंटाकस्य उभयपार्श्वावलंबिमहाप्रमाणघंटोपेतस्य सपताकस्य सक्षुद्रध्वजस्य सतोरणवरस्य प्रधानतोरणोपेतस्य सनंदिघोषस्य द्वादशविधतूर्यनिनादोपेतस्य द्वादशतूर्योणिच. त्रंभामुकुंदमद्दलकडंबज्झल्लरिझुडुक्क । कंसाला काहलतलिमावंसोसंखोपणवोअबारसमो १ तथा सकिंकिणीकहेमजालपर्यंतपरिक्षिप्तस्य सहकिंकिणीभिः क्षुद्रघंटाभिर्वर्त्ततइति सकिंकिणीकानि यानि हेमजालानि हेममयदामसमूहास्तैः पर्यंतेषुबहिःप्रदेशेषुपरिक्षिप्तोव्याप्तः तस्य तथा हैमवतं हिमवत्पर्वतभावि चित्रं विचित्रमनोहारि तिनिशंतिनिशद्रुमसम्बन्धि कनकनियुक्तं कनकविच्छुरितं कनकपट्टिका संवलित मित्यर्थः तथाविधं दारु काष्टं यस्यतत्तथा

तस्य प्रथमो बहुव्रीहौकः द्वितीयः स्वार्थिकः पूर्वस्यबदीर्घत्वं प्राकृतत्वात् तथा सुष्ठुतिशयेन सम्यक् पिनद्धुमरकमंडलं धूश्चयस्य स सुसंपिनद्धारकमं डलधूस्तस्य तथा कालायसेन लोहेन सुष्ठु अतिशयेन कृतं नेमेर्बाह्यपरिधेर्यन्त्रस्य चारकोपरिफलकचक्रवालस्य कर्मयस्मिन् सकालायससुकृतने मियंत्रकर्मा तस्य आकीर्णागुणैर्व्याप्तायेवराः प्रधानासुरगास्ते सुष्ठु अतिशयेन सम्यक् प्रयुक्तायोजिता यस्मिन् सतथा तस्य बहुव्रीहावपिनिष्टांतस्य प रनिपातः प्राकृतत्वात् तथा सारथिकर्मणिये कुशला नरास्तेषां मध्ये अतिशयेनच्छेकोदक्षः सारथिस्तेनसुष्ठु सम्यक् परिगृहीतस्य तथा शराणांशतं प त्येकं येषुतानि शरशतानि तानि चतानिद्वात्रिंशत्तूणानिच बाणाश्रयाः शरशतद्वात्रिंशत्तूणानितैर्मंडितः किमुक्तं भवति एवंनाम तानि द्वात्रिंशत्शरश त भृतानि तूणानिरथस्य सर्वतः पर्यंतेष्वलंबितानि तस्यरणायोपकल्पितस्यातीवमंडनाय भवंतीति, तथा कंकटः कवचं अवतंसः शिरस्त्राणं ताभ्यां सहवर्तते यस्स तथा तस्य सहचापेन ये शरा यानिच कुंतादीनि प्रहरणानि यानिचखेटकादीन्या वरणानि तै र्भृतः पूर्णस्तथा योधानां युद्धं तन्निमि त्तं सज्जः प्रगुणी भूतोयः सयोधयुद्धसज्जस्ततः पूर्वपदेन कर्मधारयः तस्य इत्थंभूतस्य राजांगणेवा अंतः पुरेवा रम्येवा मणिकुट्टिमतले मणिबद्धभूमि तले अभीक्ष्णं मुहुर्मुहुर्मणिकोट्टिमतलप्रदेशैः राजांगणादिप्रदेशैर्वा अभिघट्टिज्जमाणस्सेति अभिघट्यमानस्य वेगेन गच्छतोयेउदारा मनोज्ञाः कर्णम नोनिर्वृत्तिकराः सर्वतः समंतात् शब्दा अभिनिस्सरंति श्रोतृणामभिमुखं निस्सरंति भवे एयारूवे सिआइतिस्यात्कथंचिद्भवेदेतद्रूप स्तेषां मणीनां तृणा नांच शब्दः भगवानाह गौतम नायमर्थः समर्थः पुनरपिगौतमःप्राह खेजहाणामए वेआलिआए वीणाए उत्तरमंदामुच्छिआए अंकेसुपइट्ठियाए चंदण सारकोणपरिघट्टियाए कुसलणरनारिसुसंपग्गहियाए पढमसकालसमयंसि मंदंमंदं एइयाए वेइयाए चालियाए घट्टियाए फंदियाए खोभियाए उच्चालाम णुणा करणसणनिव्वुइकरा सव्वउ समंता सद्दा अभिनिस्सवंति भवे एयारूवे सियाणो इणट्ठे समट्ठे अत्रव्याख्या सयथानामकः प्रातःसंध्यायांदेवतायाः पुरतोयावादनायोपस्थाप्यते साकिल मंगलपाठिका तालाभावेचवाद्यते इति वितालेतालाभावे भवतीति वैतालिकीतस्या वैतालिक्यावीणाया उत्तरमंदा मुच्छिआए इति मूर्च्छनं मूर्छा सा संजाता अस्या इति मूर्च्छिता उत्तरमंदया उत्तरमंदाभिधया गंधारस्वरान्तर्गतया सप्तम्या मूर्छनया मूर्च्छिता तस्याः अयमाशयः गंधारस्वरस्य सप्तममूर्च्छना भवंति, तथाहि नंदीयखुल्लिमा पूरिमाय चोच्छीयसुद्धगंधारा उत्तरगंधारावित्रहवर्हसापंचमी मुच्छा १ सुद्धुत्तरमा

यामा छट्ठीसानियमसाउवोंधवा उत्तरमंदायतहा हवइसासत्तमी मुच्छा २ अथ किंस्वरूपा मूर्च्छनाः उच्यंते गंधारादिस्वरस्वरूपामोचनेन गायतोऽति मधुरा अन्यान्स्वरविशेषान्यान् कुर्वन् श्रांस्तां श्रोतॄन् मूर्च्छितान् करोति किंतुस्वयमपि मूर्च्छित इव तान् करोति यदिवास्वयमपिसान्तान्मूर्च्छांकरोति यदुक्तं अन्नन्नसरविसोस उप्पायंतस्समुच्छणाभणिया कत्ताविमुच्छिनुइवकुणए मुच्छंवसोवति १ गंधारस्वरान्तर्गतानांच मूर्च्छनानां मध्येसप्तमी उत्तर मंदा मूर्च्छनाकिलातिप्रकर्षप्राप्ता ततस्तदुपादानं तयाच मुख्यवृत्त्या वादयिता मूर्च्छितो भवति परमऽभेदोपचाराद्वीणापि मूर्च्छितेत्युक्ता सापियद्येकेषु प्रतिष्ठितान भवति ततो न मूर्च्छना प्रकर्षंविदधाति, ततआह-अंकेउत्संगे स्त्रियाः पुरुषस्यवा सुप्रतिष्ठिताया स्तथा कुशलेनवादननिपुणेन नरेणनार्यावा सुष्टु अतिशयेन सम्यक् प्रगृहीताया स्तथा चंदनस्यसारो गर्भस्तेन निर्मायितो यः वीणावादनदंडः तेनपरिघट्टितायाः संघट्टितायाः प्रत्यूषकालसमये प्र भातसमये कालश्ववर्णो पिस्यादतआह। कालेति। मंदंमंदं शनैःशनैः एजितायाश्चंदनसारकोणेन मनाक् कंपितायाः स्तथा व्येजितायाः विशेषतः कंपितायाः एतदेव पर्यायेण व्याचष्टे चालितायाः तथाघट्टितायाः ऊर्द्धाधोगच्छता चंदनसारकोणेन गाढतरं वीणादंडेन सह तंत्र्याः स्पष्टाया इत्यर्थः तथास्पन्दिता यानखाग्रेण स्वरविशेषोत्पादनार्थं मीषन्मालितायाः क्षोभिताया मूर्च्छांप्रापिताया ये उदारा मनोहरा मनोज्ञाः कर्णमनोनिर्वृतिकराः सर्वतः समन्ता च्छब्दा अभिनिस्सरंति स्यात्कथंचिद्भवेदेतद्रूप स्तेषां मणीनां तृणानांच शब्दः भगवानाह-गौतमनायमर्थः समर्थः पुनरपिगौतमःप्राह सेजहाणामए किंन राणवा किंपुरिसाणवा महोरगाणवा गंधव्वाणवा भद्दसालवणगयाणवा णंदणवणगयाणवा सोमणसवणगयाणवा पंडगवणवा महाहिमवंतमलयमंदर गि रिगुहसमभागयाणवा एगउ सहियाणं समुहागयाणं संसुपविठाणं सन्निविठाणं पमुइयप क्कीलियाणं गीयरइ गंधव्वहरि सिअसणाणं गज्जंपज्जं कत्थं पयब द्धंपायबद्धं उरिकत्तायं मंदायं पवत्तायं रोइया वसाणं सत्तरससमगणागयं अठारसदोसविप्पमुक्कं अट्ठगुणोववेयं रत्तंतिठाणकर णसुद्धं सकुहरगुंजंत वंसतंतीतलतालल्लयग्गहसुसंपउत्तं महुरंसमंसुललिअं मणोहरमउयरिभिय पयसंचारं सुरईसुणइवरचारुरूवं दिव्वंणट्टसज्जंगेयं पगी यागं भवे एयारूवे सिया गोअमा एवं नूएसिआ अत्रव्याख्या सयथा नामकः किंनराणांवा किंपुरुषाणांवा महोरगाणांवा गंधर्वाणां वा वाशब्दाः सर्वेपिवि कल्पार्थाः एते किंनरादयोरत्नप्रभायाः उपरितनयोजनसहस्रवर्त्तिव्यंतरनिकायाष्टकमध्यगतपञ्चमषट्सप्तमाष्टमनिकायरूपा व्यंतरविशेषाः तेषां क

थंभूतानामित्याह ॥ भद्रशालवनं गतानां वा इत्यादि, तत्र मेरोः समंततो भूमौ भद्रशालवनं तत्र मेखलायां नंदनवनं द्वितीयमेखलायां सौमनसवनं शिरसिचूलिकायाः पार्श्वेषुसर्वतःपंडकवनं तत्रगतानां महाहिमवान् हैमवतक्षेत्रस्योत्तरतः सीमाकारी वर्षधरपर्वतस्तस्य उपलक्षणंचैतत् शेषवर्षधरपर्वतानांमलयपर्वतस्यमंदरगिरेश्च मेरुगिरेर्गुहासमन्वागतानां गुह्यप्राप्तानां वाशब्दाविकल्पार्थाः एतेषु स्थानेषुप्रायः किंनरादयःप्रमुदिता भवंति तत एतेषा मुपादानं एकतःएकस्मिन्स्थाने सहितानां समुदितानां तथा परस्परंसंमुखागतानां संमुखास्थितानां नैकोपिकस्यापिपृष्टंदत्वास्थितइत्यर्थः,पृष्टदानेहर्ष विघातोत्पत्तेः तथासम्यक्परस्पराऽनाबाधया उपविष्टाः समुपविष्टा स्तेषां तथासन्निविष्टानां सम्यक्स्वशरीरानाबाधया नतुविषमसंस्थानेननिविष्टाःस न्निविष्टा स्तेषां तथाप्रमुदितप्रक्रीडितानां प्रमुदिताःहर्षगताःप्रक्रीडिताः क्रीडितुमारब्धवंत स्ततोविशेषणसमासः तेषां तथागीते रतिर्येषान्तेगीतरतयोगन्ध र्वैःकृतंगांधर्वंनाट्यादि तत्र हर्षितमनसःततःपूर्वपदेनविशेषणसमास स्तेषां रागगीत्यादिकं गीतं पदस्वरतालावधानात्मकंगांधर्वमितिभारतादिशास्त्र वचनात, गद्यादिभेदा दष्टधा गेयं तत्रगद्यं यत्रस्वरसंचारेगद्यंगीयते यत्र तुपद्यंवृत्तादियद्गीयतेतत्पद्यं यत्र कथिकादि गीयते तत्कथ्यं पदबद्धं यदेका क्षरादि यथा तेतेइत्यादि पादबद्धंयद्वृत्तादि चतुर्भागमात्रेपादेबद्धं उत्क्षिप्तकं प्रथमंतःसमारभ्यमाणं अत्र ककारात्पूर्वंदीर्घः प्राकृतत्वात् एवमुत्तरत्रापिद्र ष्टव्यं प्रवृत्तकं प्रथमसमारंभादूर्द्धमाक्षेपपूर्वकंप्रवर्त्तमानं तथामंदकंमध्यभागेसकलमूर्छनादिगुणोपेतं मंदंमंदंसंचरत् अथवा मंदमयतेगछतेइति परिघोल नात्मकत्वात् मंदायं रोचितावसानं रोचितं सम्यग्भावितमव सानंयस्यतत् रोचितावसानं शनैःशनैः प्रक्षिप्यमाणस्वरंयस्यगेयस्यावसानंत द्रोचितावसा नमित्यर्थः इहपद्यं पादबद्धं चैकएवभेद :उभयत्रापिवृत्तरूपतानतिक्रमात्, तेनगेयस्याष्टप्रकारताकथनंनविरुद्धमिति तथासप्तस्वरसमन्यागतं सप्तस्वराःष ड्जादयः उक्तंच, सर्जरिसह गंधारे मध्मिे पंचमेसरे । धेवएचेवनेसाए सरासत्तविआहिया १ तेच सप्तस्वराः पुरुषस्य स्त्रियावानाभीतः समुद्भवंति ॥ सप्तसरानाभीउ इति पूर्वमहर्षिवचनात्, तथाअष्टभीरसैःशृंगारादिभिःसम्यक्प्रकर्षेणयुक्तंतथा एकादशालंकाराःपूर्वान्तर्गतस्वराप्रा भृतेसम्यग्भिहितास्ता निचपूर्वाणिसं प्रति व्यवच्छिन्नानि तेभतेभ्यो लेशतो विनिर्गतानि यानि भरतविशाखिलप्रभृतीनि तेभ्यो वेदितव्याः तथा षट्दोषविप्रमुक्तं षड्भिर्दोषै र्विप्रमुक्तं तेचामीषड्दोषाः भीअं १ दुअ २ मुप्पिच्छं ३ उत्तालं ४ च कमसो मुणेयव्वं ५ काकस्सरमं मुणासं ६ जाहो हुंतिगेयस्सस १ अत्रव्याख्या भीतमु

त्रस्तं किमुक्तंभवति यत् उत्त्रस्तेनमनसागीयते त द्भीतपुरुषनिबंधनत्वात्तद्भीतानुवृत्तत्वा द्भीतमुच्यते द्रुतंयत् त्वरितंगीयते त्वरितगानेहि रागतानादिपुष्टि रक्तरत्यक्तिश्च नभवति उप्पिच्छंस्वासससंयुक्तमिति पाठांतरेण रहस्संति ह्रस्वस्वरंलघुशब्दमित्यर्थः उत्तालंउत्प्राबल्येनअतितालं अस्थानतालंवा तालस्तु कंसिकादिस्वरविशेषः काकस्वरं शृक्लाश्रयस्वरं अनुनासं नासिकाविनिर्गतस्वरानुगतमिति तथा अष्टभि र्गुणै रुपेतं अष्टगुणोपेतं तेचाष्टावमीगुणाः पुस्सं रत्तंअलंकियंच वत्तंतहेवअविघुट्ठं महुरंसमंसुललिअं अट्ठगुणाहुंतिगेअस्स १ तत्रयत्स्वरकलाभिःपूर्णंगीयतेतत्पूर्ण१ गेयरागानुरक्तेन यत् गीयते तद्रक्तं २ अन्योन्यस्फुटशुभस्वरविशेषाणां करणाद लंकृतं ३ अक्षरस्वरस्फुटकरणाद्व्यक्तं ४ विक्रोशनमिव यद्विस्वरं नभवति तदविघुष्टं ५ मधुरं मधुरस्वरं कोकिलारुतवत् ६ तालवंशस्वरादिसमनुगतं समं ७ स्वरघोलनाप्रकारेण सुष्ठु अतिशयेन ललतीव यत् सुललितं यदिवा यत्श्रोत्रेन्द्रियस्यशब्द स्पर्शनमतीव सूक्ष्ममुत्पादयति सुकुमारमिव प्रतिभासते तत्सुललितं ८ एतेअष्टौगुणा गेयस्य भवन्त्येतद्विरहितंतु विडंबनामात्रं तदिति इदानी मेतेषामेवाष्टानांगुणानांमध्ये कियतो गुणान् अन्यच्चप्रतिपिपादयिषु राह । रक्तमित्यादि । रक्तं पूर्वोक्तस्वरूपं तथा त्रिस्थानकरणशुद्धं त्रीणिस्थानानि उरः प्रभृतीनि तेषुकरणेनक्रिययाशुद्धंत्रिस्थानकरणशुद्धं तद्यथा उरःशुद्धंकंठशुद्धंशिरोविशुद्धंच तत्रयद्युरसिस्वरोविशाल स्तर्ह्युरोविशुद्धं सएव यदि कंठेवर्त्तत ऽस्फुटितश्च ततःकंठविशुद्धं यदिपुनःशिरसिप्राप्तःसन्नानुनासिको भवति ततःशिरोविशुद्धं अथवा उरःकंठरस्तु श्लेष्मणा अव्याकुलेषुविषुद्धेषुप्रशस्तेषुय द्गीयते तदुरःकंठशिरोविशुद्धत्वात्त्रिस्थानकरणविशुद्धं तथा सकुहरः सच्छिद्रो गुंजन् शब्दायमानो योवंशो यैंचतंत्रीतलतालालयग्रहा स्तैःसह सुष्ठुअतिश येनसंप्रयुक्तमविरुद्धतयाप्रवर्त्तितं किमुक्तंभवति सकुहरेवंशेगुंजति तंत्र्यांच वाद्यमानायां यद्गीतंतंत्रीस्वरेणाविरुद्धंतत् सकुहरगुंजद्गीतंतंत्रीसुसंप्रयुक्तं त था परम्पराहतहस्ततलस्वरानुवर्त्ति यद्गीतंतत्तलंसुसंप्रयुक्तं यत् मुरजवंशिकादीना मातोद्याना माहतानांयोध्वनि र्यश्चनृत्यंत्या नर्त्तक्याः पादोत्क्षेप स्तेन समं तत् तालसुसंप्रयुक्तं तथा शृंगदारुदंतादिमयो योऽङ्गुलिकोशक स्तेनाहताया स्तंत्र्याः स्वरप्रकारो लय स्तमनुसरद्गेयं लयसुसंप्रयुक्तं तथा प्रथमतो वंशतंत्र्यादिभिर्यःस्वरो गृहीतस्तत्समेनस्वरेण गीयमानं ग्रहसुसंप्रयुक्तं तथा मधुरमित्यादि विशेषणत्रयंप्राग्वत्, अतएव मनोहरं । पुनःकथं भूतमित्याह । मृदुकं मृदुना स्वरेण युक्तं नऋिष्टुरेण तथा यत्रस्वरोऽक्षरेषुघोलनास्वरविशेषेषु च संचरन् रागोऽतीवप्रतिभासते सपदसंचारो रिभितमु

च्यते मृदुरिभितपदेषु गेयनिबद्धेषुसंचारो यत्रगेयेतत् मृदुरिभितपदसंचारं तथा सुष्ठुशोभना रतिः श्रोतृणां यस्मिन् तत्सुरति सुष्ठुशोभना नति रवनामोऽवसाने यस्मिन् तत्सुनति पर्यंतेमंद्रस्वरस्यविधानात् तथा वरंप्रधानं विषिष्ट चंगिमोपेतं रूपंस्वरूपंयस्य तत्तथा। कुतइत्याह। दिव्यंदेवसंबधि यतः नाट्यनृत्यविधौ सज्जं नाट्यसज्जं गीतवाद्ये तथाविधेहि नाट्यविधिरपिसुमनोहरःस्यादिति, उक्तस्वरूपंगेयंगीतानांगातुमारब्धवतां यादृशःशब्दोऽति मनोहरोभवति स्या त्कथंचिद्भवेदेतद्रूप स्तेषां मणीनां तृणानांचशब्दः दृष्टांतस्यसर्वसाम्याभावात् स्यादितिपदोपादानं। एवमुक्ते भगवानाह- ॥ गौ तमस्यादेवंभूतःशब्दइति। अथपुष्करिणीसूत्रं यथा तत्थणं वणसंडस्स तत्थतत्थ देसे तहिंतहिं बहूइंतं खुड्डाखुड्डियाइं वावीइं पुष्करिणीइं दीहियाइं गुंजालियाइं सराइं सरपंतीइं सरीपंतीइं बिलंपतीइं अच्छाइं सल्लाइं रययामयकूलाइं समतीराइं वयरामयपासाणाइं तवणिज्जतलाइं सुवण्णसुद्धर ययवालुयाओ वेरुलियमणिफालियपडलपच्चोअडाओ सुओयरेसुहोत्ताराइं णाणामणितित्थसुबद्धाइं चाउक्कोणाओ अणुपुव्वसुजायवप्पगंभीरसीयलजलाइं संछन्नपत्तभिसमुणालाइं बहुउप्पलकुमुयणलिणसुभगसोगंधियपुंडरीयमहापुंडरीयसयपत्तसहस्सपत्तफुल्लकेसरोवचियाइं छप्पयपरिभुज्जमाणकमलाइं अच्छविमलसलिलपुण्णाइं परिहत्थभमंतमच्छकच्छभअणेगसउणिमिहुणिपविअरियाइं पत्तेयं पत्तेयं पउमवरवेइयापरिरिक्खित्ताओ पत्तेयंपत्तेयं वणसंडपरिरिक्खित्ताइं अप्पेगइयाओ आसवोदगाइंअप्पेगइयाइं वारुणोदगाओ अप्पेगइआइं खोदोदगाओअप्पेगइयाओ अमयरसरसोदगाओ अप्पेगइयाओ उदगरसेणंपसत्ताओ पासादीयाओ ४ अत्रव्याख्या तस्येत्यादिप्राग्वत् बह्व्यः नुद्दा अखातसरस्यस्ताएव लघ्व्यः नुल्लिका वाप्यश्चतुस्राकाराः पुष्क रिण्योवृत्ता काराः दीर्घिकाकासारण्यः ताएव वक्रा गुंजालिकाः बहूनि केवलकेवलानि पुष्पावकीर्णकानि सरांसि सूत्रेस्त्रीत्वं प्राकृतत्वात् बहूनिसरांसिएकपंक्त्या व्यवस्थितानि सरःपंक्तिः ताबह्व्यः सरःपंक्तयः तथायेषु सरस्सु पंक्त्याव्यवस्थितेषु एकस्मात्सरसोऽन्यस्मिन्तस्मात्तदन्यस्मैवंसंचारकपाटकेनोदकंसंचरतिसास रःपंक्ति स्ताबह्व्यः सरा सरः पंक्तयः विलानीवबिलानिकूपा स्तेषां पंक्तयोबिलपंक्तयः एताश्च सर्वाअपि कथंभूताइत्याह अच्छाः स्फटिकवद्बहिर्निर्मलप्रदेशाःश्ल क्ष्णाःश्लक्ष्णपुद्गलनिष्पादितबहिःप्रदेशाः. रजतमयंरूप्यमयंकूलंयासान्तास्तथासमंनगर्त्तासद्भावतोविषमंतीरंतीरवर्त्तिजलापूरितंस्थानंयासांतास्समतीराःतथा वज्रमयाःपाषाणाः यासांता स्तथा तथातपनीयंहेमविशेषस्तन्मयंतलंयासांता स्तथातथासुवण्णसुद्धरययवालुयाओइति सुवर्णंपीतंहेमकुम्भंरूप्यविशेषःरजतं

प्रतीतं तन्मय्यो वालुकायासुताः सुवर्ण शुभ्ररजतवालुकाः तथा वैडूर्यमणिफलिहपंडलपद्मोपडाओइति वैडूर्यमणिमयानि स्फाटिकपटलमयानिस्फाटिकरजतबद्धिपाटलमयानि प्रत्यवतटानि तटसमीपवर्त्यभ्यन्तरप्रदेशा यासांता स्तथा तथा सुखेनावतारोजलमध्ये प्रवेशनं यासुताः स्ववतारा स्तथासुखेनोत्तारो जलाद्बहिर्विनिर्गमनंयासुताः सुखोत्तारातःपूर्वपदेन विशेषणसमासः तथा नानामणिभिः सुबद्धानि तीर्थानि यासांतास्तथा अत्रबहुव्रीहावपिक्तांतस्यपर निपातोभार्योदिदर्शनात् प्रा कृतशैलीवशाद्वा चाउक्कोणाओइति चत्वारः कोणायासांताः तथा दीर्घत्वंचअतःसमृद्ध्यादौवाइतिसूत्रेण प्राकृतलक्षणवशात् एतच्च विशेषणं वापी कूपांश्चप्रतिद्रष्टव्यं, तेषामेवचतुःकोणत्वसंभवात् नशेषाणां । आनुपूर्व्येणक्रमेण नीचैर्नीचैस्तरभावरूपेण सुष्टुअतिवेशनयोजातोवप्रः केदारोजलस्थानंत त्रगंभीरमलब्धतलं शीतलंजलंयासुताः आनुपूर्व्यसुजातवप्रगंभीरशीतलजला स्तथा तथा संछन्नानिजालेनांतरितानि पत्रबिसमृणाला नियासुताः तथा बहुबिसमृणालसाहचर्यात्पत्राणिपद्मिनीपत्राणिद्रष्टव्यानि, बिशानिकंदाः मृणालानि पद्मनालानि तथा बहूनामुत्पलकुमुदनलिनसुभगसौगंधिकपुंडरीकमहापौंडरीकशतपत्रसहस्रपत्राणां फुल्लानां विकस्वराणां केशरैःकिंजल्कैः उपचिता भृताः विशेषणस्यविवक्षानिपातः प्राकृतत्वात् तथाषट्पदैः भ्रमरैःपरिभुज्यमानानिकमलानि उपलक्षणमेतत् कुमुदादीनि यासुताः तथा अच्छेन स्वरूपतः स्फटिकवत् शुद्धेन निर्मलेन आगंतुकमलरहितेन सलिलेन पूर्णाः तथा पडिहत्था अतिरेकिता अतिप्रभूताइत्यर्थः देशीशब्दोयं पडिहत्थसद्दुमायं अइरेइयंचजाणआइरुंओतिवचनात् उदाहरणं चात्र घणपडिहत्थं गयणं सराइं नवसलिलसुद्दुमायाइं ॥ अ हिरेइयं महउणचिंताए मणं तुहं विरहे इति, भ्रमंतो मत्स्यकच्छपाः यत्र ताःपडिहत्यभ्रमन्मत्स्यकच्छपाः अनेकैः शकुनिमिथुनकैः प्रविचरिता इतस्ततो गमनेन सर्वतो व्याप्ताः ततःपूर्वपदेन विशेषणसमासः एतावाप्यादयः सरस्सरपंक्तिपर्यवसाना प्रत्येकंइति एकंएकंप्रतिप्रत्येक मत्राभिमुख्येप्रतिशब्दो नवीप्सा विवक्षा याःपद्मा इत्यत्रैकशब्दस्य द्विर्वचनमिति पद्मवरवेदिकाय परिक्षिप्ताःप्रत्येकं प्रत्येकंवनषंडपरिक्षिप्ताश्च अपिर्बाढार्थे बाढमेककाः काश्चन वाप्यादय आसवमिव चंद्रहासादि परमासवमिवउदकं यासांताः तथा अप्येकिकाः वारुणस्येववारुणसमुद्रस्येव उदकं यासांताः अप्येकिकाःक्षीरमिवोदकं यासांताः अप्येकिकाः घृतमिवोदकं यासांताः अप्येकिकाः क्षोदइव इक्षुरसइवो दकं यासांताः अप्येकिकाः अमृतरससमरसं उदकं यासांताः अमृतरससमरसरसोदकाः अप्येकिकाः उदकेन स्वाभाविकेन प्रसन्नाः पासाईयाइत्यादि प्राग्व

त् । तासिणं खुड्डाणं खुड्डियाणं वावीणं जाव बिलपंतीणं पत्तेयं पत्तेयं चउद्दिसिं चत्तारि सोवाणपडिरूवगा पण्णत्ता तेसिणं तिसो वाणपडिरूवगाणं अयमेयारूवे वण्णावासे पण्णत्ते तंजहा वइरामया णेमा रिट्ठामया पइट्ठाणा वेरुलियामया खंभा सुवण्णरूप्पमया फलगा वइरामया संधी लोहिअरक्खमईओसूइ ओ णाणामणिमया अवलंबणा अवलंबणबाहाओ पासाईया ४ इति । अत्रव्याख्या तासां क्षुद्राणां, क्षुद्रिकाणां यावद्बिलपंक्तीनां प्रत्येकंप्रत्येकं चतसृणां दिशां समाहारश्चतुर्दिक् तस्मिंश्चतुर्दिशि चत्वारि एकैकस्यां दिशि एकैकभावात् त्रिसोपानप्रतिरूपकाणि तथा प्रतिविशिष्टं रूपं येषांतानि प्रतिरूपकाणि त्रयाणांसोपानानांसमाहार स्त्रिसोपानं त्रिसोपानानि च तानि प्रतिरूपकाणिचेति विशेषणसमासः विशेषणस्यपरनिपातः प्राकृतत्वात् तानिप्रज्ञप्तानि तेषांच त्रिसोपानप्रतिरूपकाणां मयंव ह्यमाण एतद्रूपो वर्णकनिवेशःप्रज्ञप्त स्तद्यथा वज्ररत्नमयानेमा भूमेरूर्द्धंनिःक्रामंतःप्रदेशाः रिष्टरत्नमयानिप्रतिष्ठानानि त्रिसोपानमूलपादाः वैदूर्यमयास्तंभाः सुवर्णरूप्यमयानि फलकानि त्रिसोपानांगभूतानि वज्ररत्नमयापूरिताःसंधयः फलकद्वयापांतरालप्रदेशाः लोहितात्तमय्यःसूचयः फलकद्वयसंबंधविघटनाभावहेतुपादुकास्थानीयाः नानामणिमया अवलंब्यतेइति अवलंबना अवतरतामुत्तरतां वालंबनहेतुभूताः अवलंबनबाहातो विनिर्गताः केचिदवयवाः अवलंबनबाहाअपि नानामणिमय्यः अवलंबानबाहानामुभयोःपार्श्वयोः अवलंबनाअयनूताभित्तयः पासाईयाओ ४ इत्यादि पदचतुष्टयं प्राग्वत् तेसिणं तिसो वाणपडिरूवगाणं पुरओ पत्तेयंपत्तेयं तोरणा पण्णत्ता तेसिणं तोरणाणं अयमेयारूवे वण्णावासे पण्णत्ते तेणं तोरणा णाणामणिमया णाणामणिमएसु खंभेसु उवनिविट्ठसंनिविट्ठा विविहसुत्तंतरोविया विविहतारारूवो वचिया ईहामिगउसभतुरगणरमगरविहगवालगकिंनररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ता खंभुग्गयवरवइरवेइयापरिगया भिरामा विज्जाहरजमलजुअलजंतजुत्ता विवअच्चीसहस्समालणीया रूवगसहस्सकलियाभिसमाणा भिब्भिसमाणाचरकुल्लो अणलेसा सुहफासायसस्सिरीयरूवा पासाईया ४ इतिअत्रव्याख्या , तेसिणमित्यादि तेषां त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं प्रत्येकंतोरणानि प्रज्ञप्तानि तेषां तोरणाना मयमेतद्रूपो वर्णावासो वर्णकनिवेशः प्रज्ञप्तः तद्यथा तेणं तोरणाइत्यादि तानि तोरणानि नानामणिमयानि नानामणिमयेषु स्तंभेषु उपविष्टानि सामीप्येनस्थितानि तानिच कदाचिच्चलानि अथवा ऽपदपतितानिश्चंक्येरन् ततआह सम्यग्निश्चलतया ऽपदपरिहारेणच निविष्टानि ततोविशेषणसमासः

विविधा नानाविच्छित्तिकलिता मुक्ताःमुक्ताफलानि अंतराशब्दोगृहीतवीप्सीषि वीप्सांगमयति अंतराअंतराओति आइति आरोपिता यत्र तानि तथा विविधै स्तारारूपै स्तारिकारूपै रुवचित्तानि तोरणेषु हि शोभार्थंहितारकानिबध्यंते इतिप्रतीतं लोकेपि ईहामृगा वृकाःऋषभा वृषभाः व्याला भुजगाः रुरवो मृगविशेषाः शरभा अष्टापदाः चमरा आटव्यागावः वनलताअशोकलताद्याः पद्मलताः पद्मिन्यः शेषाः प्रतीताः एतासां भक्त्या विच्छित्त्या चित्र मालेखो येषु तानि तथा स्तंभोद्गतया स्तंभोपरि वर्त्तिन्या वज्ररत्नमय्या वेदिकया परिगतानि परिकरितानि संति यानि अतिरमणीयानि तथा विद्याधरयो र्विशिष्टशक्तिमत्पुरुषविशेषयो र्यमलं समश्रेणीकं युगलं द्वंद्वं ते नैव यंत्रेण संचरिष्णु पुरुषप्रतिमाद्वयरूपेण युक्तानि आर्षत्वाच्चैवंविधसमासः तथा अर्च्चिषां मणिरत्नप्रभाणां सहस्रैर्मालिनीयानि रूपकसहस्रकलितानिस्पष्टं भिसमाणाइति दीप्यमानानि भिब्भिसमाणा इति अत्यर्थं दीप्यमानानि तथा चक्षुःकर्तृलोकने अवलोकनेलिप्यतीव दर्शनीयत्वातिशयतः श्लिष्यतीव यत्र तानि तथा सुहफासाइति शुभस्पर्शानि सश्रीकानि सशोभाकानि रूपाणि यत्र तानि सश्रीकरूपाणि पासाईयाइत्यादि विशेषणचतुष्टयं प्राग्वत् तेसिणं तोरणाणं उप्पिंअट्ठमंगलगा पण्णत्ता सोच्छिय १ सिरिवच्छ २ णंदि यावत्त ३ वद्धमाणग ४ भद्दासण ५ कलस ६ मच्छ ७ दप्पण ८ सव्वरयणामया अच्छा जाव पडिरूवा अत्रव्याख्या, तेषां तोरणानामुपरीत्यादिसुगमं नवरं जाव पडिरूवा इति यावत्करणात् घटा मठा नीरया इत्यादिग्रहः तेसिणं तोरणाणं उवरि किण्हचामरद्धया णीलचामरद्धया लोहियचामरद्धया हालिद्दचामरद्धया शुक्लचामरद्धया अच्छा सण्हा रुप्पपट्टा वइरदंडा जलयामलगंधिया सुरम्मा पासाईया इति, तेषां तोरणानामुपरि बहवः कृष्णचामरयुक्ताः ध्वजा :कृष्णचामरध्वजाः एवं बहवो नीललोहितहारिद्रशुक्लचामरयुक्ताःध्वजाः वाच्याः कथंभूता एते सर्वे पीत्याह अच्छा सण्हाइति स्पष्टं रूप्यमयो वज्रमयस्य दंडस्योपरिपट्टो येषांते तथा वज्रो वज्रमयोदंडो रूप्यपट्टमध्यवर्त्तीयेषांते तथा जलजानामिव पद्मानामिवामलो नतुकुद्रव्यगंधस्निग्धो योगंधः सविद्यते येषांते जलजामलगंधिकाः अतोऽनेकस्वरादितीकप्रत्ययःअतएव सुरम्याःपासादीयाइत्यादि प्राग्वत् तेसिणंतोरणेणं उप्पिं बहवे छत्ताइं छत्तापडागाइं पडागा घंटाजुअला चामरजुअला उप्पलहत्थगा पउमहत्थगा जाव सहस्सपत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा तेषां तोरणाना मुपरि बहूनि छत्रातिछत्राणि छत्रालोकप्रसिद्धा देकसंख्याकादतिशायीनि द्विसंख्यानि त्रिसंख्यानि वा छत्रातिछत्राणि बह्व्यः पताकाश्चे

ऽतिशायिन्यो दीर्घत्वेन विस्तरेणच पताकाः पताकातिपताकाः बहूनि घंटायुगलानि बहूनि चामरयुगलानि बहव उत्पलहस्तकाः उत्पलाख्यजलज कुसुमसमूह विशेषाः एवं पद्महस्तकाः बहवो नलिनहस्तकाः बहवः सुभगहस्तकाः बहवः सौगंधिकहस्तकाः बहवः पुंडरीकहस्तकाः बहवः शतपत्र हस्तकाः बहवःसहस्रपत्रहस्तकाः उत्पलादीनां व्याख्यानं प्राग्वत्, एतेच छत्रातिछत्रादयः सर्वेपि सर्वरत्नमया जाव पडिरूवा इति, यावत्करणात् अच्छा सण्हा लण्हा इत्यादि विशेषण कदंबकपरिग्रहः॥ अथ पर्वतकसूत्रं। यथा तासिणं खुड्डियाणं वावीणं जाव विलपंतियाणं तत्थतत्थ देसे तहिंतहिं बहवे उप्पायपव्वया नियइपव्वया जगईपव्वया दारुपव्वयगा दगमंडवगा दगमंचगा दगमालगा दगपासाया उसडा खुड्डा अंदोलगा पक्खंदोलगा सव्व रयणामया अच्छा जाव पडिरूवगा। अत्रव्याख्या। तासांक्षुल्लिकानां वापीनां यावद्विलपंक्तीनां। अत्र यावत् करणात् पुष्करिण्यादिग्रहः अपान्तरालेषु तत्रतत्रदेशे तहिंतहिं इति तस्यैव देशस्य तत्रतत्रैकदेशे बहव उत्पातपर्वताः यत्रागत्य बहवो व्यंतरदेवा देव्यश्च विचित्रक्रीडानिमित्तं वैक्रियशरीरमा चरयंति नियत्या नैयत्येन पर्वताः, क्वचिन्नियय पव्वयाइतिपाठः तत्र नियताः सदाभोग्यत्वेना वस्थिताः पर्वताः यत्र व्यंतरदेवदेव्यो भवधारिणीयेन वैक्रियशरीरेण प्रायः सदा रमंते इतिभावः। जगतीपर्वताः पर्वतविशेषाः दारुपर्वतका दारुनिर्मापिता इव पर्वतकाः दकमंडपकाः स्फटिकमंडपकाः एवंदकमंचकाः ककमालकाः दकप्रासादाः, एतेच दकमंडपकादयः केचित् उत्सृता उच्चा इत्यर्थः। केचित् क्षुल्ला लघवः क्वचित् खुड्डखुड्डगा इतिपाठः। क्षुल्लक्षुल्लका अतिलघवः आयताश्च तथा अंदोलकाः पद्मयंदोलकाश्च तत्र यत्रागत्य मनुष्या आत्मानमान्दोलयंतीति अंदोलका इति लोके प्रसिद्धाः,, यत्र तुपक्षिण आगत्यात्मान मांदोलयंति तेपद्मयंदोलकाः तेचांदोलकाः पद्मयंदोलकाश्च तस्मिन् वनषंडे तत्रतत्र प्रदेशे वानमंतरदेवदेवीक्रीडायोग्या बहवः संति, तेचोत्पातपर्वताः तेचोत्पातपर्वतादयः कथंभूता इत्याह। सर्वरत्नमया अच्छा इत्यादि विशेषणजातं प्राग्वत्। तेसुणं उप्पायपव्वएसु जाव पक्खंदोलएसु बहूइं हंसासणाइं कोंचासणाइं गरुलासणाइं उन्नयासणाइं पणयासणाइं दीहासणाइं भद्दासणाइं पक्खासणाइं मगरासणाइं पउमासणाइं सीहासणाइं दिसासोवत्थियासणाइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवा इति। अत्रव्याख्या। तेषुउत्पातपर्वतेषु यावत्पद्मयंदोलकेषु अत्र यावत्करणात् नियत पर्वतादिपरिग्रहः, बहूनि हंसासनानि तत्र येषा मासनानामधोभागे हंसाव्यवस्थिताः, यथा सिंहासनानि हंसासनानि एवं क्रौं-

वासनानि गरुडासनानि भाव्यानि उन्नतासनानि अत्युच्चासनानि, प्रणतासनानि निम्नासनानि दीर्घासनानि शय्यारूपाणि भद्रासनानि येषामधोभागे पीठिकाबंधः, पद्मासनानि येषा मधोभागेनानारूपाः पक्षिणः एवं मकरासनानि सिंहासनानिच भावनीयानि पद्मासनानि पद्मा काराणि आसनानि दिक्सौवस्तिकासनानि येषा मधोभागे दिक्सौवस्तिका दिक्प्रधानाः स्वस्तिकाः आलिखिताः संति । अत्र यथाक्रममासनानां संग्राहिका संग्रहिणी। गाथा । हंसे कोंचे गरुले उण्णय पणए यदीह भद्दे य । पक्खेमयरे पउमे सीहदिसासो अधारसाम १ एतानि सर्वाण्यपि कथंभूतानी त्याह सव्वरयणामयाइं इत्यादि प्राग्वत् ॥ अथ गृहकसूत्रं यथा । तस्सणं वणसंडस्स तत्थतत्थदेसे तहिंतहिं बहवे आलिघरगा मालिघरगा कयलीघरगा अच्छणघरगा पेच्छणघरगा मज्जणघरगा पसाहणघरगा गब्भघरगा मोहणघरगा सालघरगा जालघरगा कुसुमघरगा चित्तघरगा गंधव्वघरगा आयंसघरगा सव्वरयणामया अच्छा जाव पडिरूवा इति । अत्र व्याख्या । तस्यवनषंडस्य मध्ये तत्रतत्र प्रदेशे तस्यैव प्रदेशस्य तत्र तत्र एकदेशे बहूनि आलिगृहकाणि आलिर्वनस्पतिविशेष स्तन्मयानि गृहकाणि आलि गृहकाणि मालिरपि वनस्पति विशेषः तन्मयानि गृहकाणि कदलीगृहकाणि लतागृहकाणि च प्रतीतानि । अच्छण घरगा इत्ति, अवस्थानगृहकाणि येषु यदा तदावागत्य बहवः सुखसिकाया अवतिष्टंते प्रेक्षणकगृहकाणि प्रेक्षणकानि विदधति निरीक्ष्यंतेच मज्जनगृहकाणि यत्रागत्य स्वेच्छया मज्जनं कुर्वंति प्रसाधन गृहकाणि यत्रागत्य स्वंपरंच मंडयंति गर्भगृहकाणि गर्भगृहाकाराणि मोहनगृहकाणि मोहनं मैथुनसेवा तत्प्रधानानि गृहकाणि वासभवनानीतिभावः, शालागृहकाणि जाल पट्टशाला प्रधानानि गृहकाणि जालगृहकाणि जालयुक्तानि गृहकाणि, कुसुमगृहकाणि कुसुमप्रकारोपचितानि गृहकाणि चित्रगृहकानि चित्रप्रधानानि गृहकाणि । गंधर्वगृहकाणि गीतनृत्याभ्यासयोग्यानि गृहकाणि । आदर्शगृहकाणि आदर्शमयानीव गृहकाणि । अत्र सूत्रे सर्वत्रककारः स्वार्थिकोवसेयः, एतानि कथंभूतानीत्याह । सव्वरयणामयाइं इत्यादि प्रग्वत् । तेसुणं आलिघरेसु जाव आयंसघरेसु बहूइं हंसासणाइं जाव दिसासोवत्थियासणाइं सव्वरयणामयाइं जावपडिरूवाइं इतिगतार्थं ॥ अथ मंडपकसूत्रं यथा ॥ तस्सणं वणसंडस्स तत्थ तत्थदेसे तहिंतहिं बहवे जाइमंडवगा जूहियामंडवगा मल्लियामंडवगा णोमालिया मंडवगा वासंतीमंडवगा दधिवासुयामंडवगा सूरिल्लिमंडवगा तंबोलीमंडवगा णागलयामंडवगा अतिमुत्तयमंडवगा आफोआमंडवगा मालुआमंड-

वगा सव्वरयणामया जाव णिच्चं कुसुमिया जावपडिरूवा ॥ अत्रव्याख्या ॥ तस्येत्यादि पदयोजना सुगमा । जातिर्मालती तन्मया मंडपकाः जातिमंडपकाः, एवं उत्तरत्रापि पदयोजना कार्या । यूथिका प्रतीता । मल्लिका विचकिलः । वनमालिकावासंती रूपंष्टे । एते च तुक्रप्रधाना वनस्पतयः, दधिवासुकानाम वनस्पति विशेषः सूरिल्लि रपिसएव तंबूली नागवल्ली नागो द्रुमविशेषः सएवलता नागलता इहयस्य तिर्यक् तथाविधाशाखावा प्रसृता सालतेत्यभिधीयते ,, अतिमुक्तकः पुष्पप्रधान वनस्पतिः अप्फोआ वनस्पतिविशेषः मालुका एकास्थिकफला वृक्षविशेषा स्तद्युक्त मंडपका मालुकामंडपका । एतेच कथंभूता इत्याह सव्वरयणामया इत्यादि प्राग्वत् । तेसुणं जाइमंडवगेसु जाव मालूआ मंडवगेसु बहवे पुढवीशिलावट्टगा पण्णत्ता ? अप्पेगइया हंसासणसंठिआ अप्पेगइया क्रौंचासणसंठिआ अप्पेगइया गरुडासण संठिया अप्पेगइया उण्णयासणसंठिया अप्पेगइया पणयासणसंठिया अप्पेगइया दीहासणसंठिया अप्पेगइया भद्दासणसंठिया अप्पेगइया पक्खासण संठिया अप्पेगइया मगरासणसंठिया अप्पेगइया पउमासणसंठिया अप्पेगइया सीहासणसंठिया अप्पेगइया दिसासोवत्थियासणसंठिया अण्णे बहवे वरसयणासणविसिठसंठाणसंठिया पण्णत्ता ? समणाउ सो आईसगरू अबूरणवणीयरूलफा समऊआ सव्वरयणामया आच्छा जाव पडिरूवा । अत्रव्याख्या । तेषु जातिमंडपकेषु यावत् मालुका मंडपकेषु यावत्करणात् यूथिका मंडपकादि परिग्रहः, बहवः शिलापट्टकाः प्रज्ञप्ताः । तद्यथा-अपिर्बाढार्थे एकके शिलापट्टका, हंसासनवत् संस्थितं भावेक्तप्रत्ययविधानात् संस्थानं येषांते तथा । एवं क्रौंचासन संस्थितादिविशिष्टमपि वाच्यं । अन्येच बहवः शिलापट्टकाः यानिविशिष्टचिक्कानि विशिष्टनामानिचवराणि प्रधानानि शयनानि आसनानि च तद्वत् संस्थिता वरशयनासनविशिष्टसंस्थान संस्थिताः । क्वचित् मांसलसुघट्टविसिठसंठाठणसंठिया इतिपाठः । तत्रान्येच बहवः शिलापट्टकाः मांसला इव मांसला अकठिना इत्यर्थः सुघृष्टा इव सुघृष्टा अतिशयेन मसृणा इतिभावः । विशिष्टसंस्थान संस्थिताश्च प्रज्ञप्ताः ? हेश्रमण ? हेआयुष्मन् ? आईसगेत्यादि सुगमिति ॥ अथ प्रस्तुतसूत्र मनुश्रियते तत्थणमिति ॥ अत्रव्याख्या ॥ तत्रैतेषु उत्पात पर्वतादि गत हंसासनादिषु यावन्नाना रूपसंस्थान संस्थित पृथिवी शिलापट्टकेषु णमितिपूर्ववत् । बहवो वनानामन्तरेषुभवाः पृषोदरादित्वान्मागमेवानमंतरादेवा देव्यश्च यथा सुखमासते आश्रयंतिवा श्रयणीयं स्तंभादि, शेरते दीर्घकाय प्रसारणेन वर्त्तते नतु निद्रां कुर्वंति । तेषां देवयोनिकतया निद्राया अभावात् ।

॥ टीका ॥

अत्रोपलक्षणात् चिट्ठंतीत्यादिकउपांगे जीवाभिगमोक्तोलिखितोस्ति, तिष्टंति ऊर्द्धस्थानेन वर्त्तंते, निषीदंति उपविशंति। तुअट्टंतितिर्यग्वर्त्तनं कुर्वंति वामपार्श्वतः परावृत्य दक्षिण पार्श्वेनावतिष्टंते। दक्षिण पार्श्वतो वा परावृत्य वामपार्श्वेनाव तिष्टंते इति। रमंते रतिमाबध्नंति तथा ललंति मन ईप्सितं यथा भवति तथा वर्त्तंत इतिभावः। तथा क्रीडंति यथा सुख मितस्ततोगमन विनोदेन गीतनृत्यादिविनोदेन वा ऽवतिष्टंते। तथा मोहंति मैथुन सेवां कुर्वंति। इत्येवं पुरापोराणाणं मित्यादि, पुरा पूर्वं प्राग्भवे इतिभावः। कृतानां कर्मणा मितियोगः। अतएव पौराणानां सुचीर्णानां सुचरितानां इह सुचरित जनितं कर्मोपिकार्ये कारणोपचारात् सुचरित मिति विवक्षितं। ततोयंभावार्थः विशिष्ट तथाविध धर्मानुष्ठान विषया ऽप्रमादकरणक्षांत्याहि सुचरितानामिति। तथा सुपरा क्रांतानां अत्रापि कार्ये कारणोपचारात् सुपरा क्रांत जनितानि सुपरा क्रांतानि इत्युक्तं भवति। सकल सत्वमैत्री सत्यभा शुभानां शुभफलानां, इह किंचिद शुभफल मपि इन्द्रिय मति विपर्यासात् शुभफलमाभाति तत स्तात्विक शुभफल प्रतिप-

॥ मूल ॥

तत्थणं बहवे वाणमंतरा देवा देवीउय आसयंति सयंति चिट्ठंति णिसिअंति तुअट्टंति रमंति ललंति कीलंति मोहंति पुरापोराणाणं सुपरिक्कंताणं सुभाणं कल्लाणाणं कडाणं कम्माणं

अनु०

तत्र बहवो वानवान्तरा देवा देव्यश्च आश्रयन्ति शेरते तिष्टन्ति निषीदन्ति तुअट्टन्ति (तिर्यग्वर्तनंकुर्वन्तीत्यर्थः)
रमन्ते-ललन्ति क्रिडन्ति मोहन्ति पुरापोराणानाम् सुपराक्रान्तानाम्। शुभानाम् कल्याणानाम् कृतानाम् कर्मणाम्

॥ भाषा ॥

तत्थ० तिहां सम रमणीक भूमी भाग ने विषें॥ बाण० बाण विन्तर देवता अनें देवी आ० आश्रयछे। स० सूइ छे। चि० उभा रह्या छे। णि० बैंसेंछे। तु० पासोपालटे छे। र० रमें छ इ। ल० मनइच्छाइं वर्त्तै छें। की० क्रीडा विनोद करें छे। मो० मैथुन सेवा करें छें। पू० पूर्वे पूर्वे भवें भला। सु० भली परें आक्रस्या कस्यां एहवा। सु० सुभकारीआ। क० कल्याणकारीआ। क० कीधा एहवा कर्म, पुण्यरूप क० सुभ कर्म ते हनों।

त्यर्थमस्यैव पर्याय माह । कल्याणानां तत्ववृत्या तथाविध विशिष्ट फलदायिनां,, अथवा कल्याणाना मनर्थोपशमकारिणां कल्याणं कल्याणरूपं फलविपाकं पद्मणुभवमाणा प्रत्येकमनुभवंतो विहरंति । आसते तदेवं पद्मवर वेदिकाया बहिस्थित वनषंड वक्तव्यतोक्ता ॥ संप्रतितस्या एवा वाक्स्थित वनषंड वक्तव्यतामभिधित्सु राह । तीसेणं जगईए इत्यादि । तस्या जगत्या उपरि पद्मवर वेदिकाया अंतर्मध्ये यः प्रदेशः एतस्मिन् महानेको वन खंडः प्रज्ञप्तः ? देशोने द्वेयोजने विष्कंभेन वेदिका पद्म वर वेदिका तस्याः समकस्तुल्यः परिक्षेपेण । अयंभावः । पद्म वर वेदिकाया यावान् अस्यापि, अत्र पद्म वर वेदिका बहिः प्रदेशात् अन्तः पंचधनुः शतागमनेयत्परिक्षेपन्यूनत्वं तन्न विवक्षित मल्पत्वादिति । किल्लेत्ति कृष्णोयावदिति पदेन च बहिर्वनषंडवद् विशेषेण वनखंड वर्णकोग्राह्यः । नवरं तृणविहीनो ज्ञातव्यः । अत्र तृणजन्य शब्दोपि तृणशब्देनाभिधीयते उपचारादत स्तृण

॥ मूल ॥

कल्लाणं फलवित्तिविसिसे पच्चणुब्भवमाणा विहरंति तीसेणं जगईए उप्पिं अंतो पउमवरवेईआए एत्थणं एगे महं वणसंडे पन्नत्ते ? देसूणाइं दोजोअणाइं विक्कं भेणं वेइयासमए परिक्खेवेणं किण्हे जाव तणविहूणो णेअव्वो, जंबुद्दीवस्सणं

अनु०

कल्याणं फलवित्तिविशेषम् प्रत्येकमनुभवन्तो विहरन्ति, तस्या जगत्या उपर्यन्तः पद्मवरवेदिकायाः अत्र एकोमहान् वनखण्डःप्रज्ञप्तः ? देशान द्वेयोजने विष्कम्भेन, वेदिकासमः, परिक्षेपेण कृष्णो यावत् (अनेनच बहिर्वन खण्डव दविशेषेण वनखण्डवर्णको ग्राह्यः) तृणविहिनो नेतव्यः, जम्बूद्वीपस्य

॥ भाषा ॥

कल्याण कारी फल विपाक वि० वृति विशेषें ते प्रते प० प्रतेकइं भोगवतां वि० विचरइंछइं ती० ते जगतीनइं उ० उपरइं अ० पद्मवरवेदिका न माहले पासइं ए० इहां एक मोटो व० वनषंड वृक्ष समूह प० कह्यो तीर्थं करइं ? दे० काइंकऊणां दो० बें योजन वि० पीहुलपणइं बे० पद्मवरवेदिका सरीषो प० परिधिपणे कि० कालोइंवर्ण यावत् तृणविना जांणवा इहां तृण नही हवें ॥ जम्बूद्वीपना द्वार संख्या कहें छइं ॥ जं० जम्बूद्वीप-

शष्ट विहीनो ज्ञातव्यः । उपलक्षणत्वादस्य मणिशष्ट विहीनोपि पद्म वर वेदिकांतरिततया तथाविध वाता भावतो मणीनां तृणानांवा चलनेन परस्परं संघर्षाभावात् शष्टाभावः,, उपपन्न श्चायमर्थः जीवाभिगम सूत्र वृत्योस्तथैव दर्शनादिति ॥ संप्रति जंबूद्वीपस्य द्वारसंख्या प्ररूपणार्थं माह । जंबुद्दीवस्स ण मित्यादि ॥ अत्र सूत्रे प्रश्न निर्वचने उभे अपि सुगमे । नवरं पूर्वतः प्रादक्षिण्येन विजयादीनिद्वाराणि ज्ञेयानि , द्वाराणामेव स्थान विशेष नियमनायाह । कहिणं भंते इत्यादि । क्व भदंत । जंबूद्वीपस्य द्वीपस्य विजयमिति प्रसिद्धं नामेति प्राकृतत्वात् विभक्ति विपरिणामेन नाम्ना द्वारं प्रज्ञप्तं भगवानाह । गौतम ! जंबूद्वीपे द्वीपे यो मंदर पर्वतो मेरुगिरिः तस्य पुरत्थिमेणंति पूर्वस्यां दिशि पंचचत्वारिंशत् योजनसहस्राणिव्यतिव्रज्याति क्रम्य जंबूद्वीप द्वीपपौरस्त्य पर्यन्ते लवणसमुद्रपूर्वार्द्धस्य पश्चत्थिमेणंति पाश्चात्येभागे शीताया महानद्या उपरि सः प्रदेश इति गम्यं । एतस्मिन् जंबूद्वी-

जंबुद्दीवस्स कइ दारा पन्नत्ता? गोयमा! चत्तारि दारा पन्नत्ता? तंजहा—विजए १ वै जयंते २ जयंते ३ अपराजिते ४ कहिणं भंतेजंबुद्दीवस्स दीवस्स विजएणामं दारे पन्नत्ते ? गोयमा! जंबुद्दीवे दीवे, मंदरस्स पव्वयस्स पुरित्थिमेणं पणयालीसं जोयणसहस्साइं

भदन्त! द्वीपस्य कति द्वाराणि प्रज्ञप्तानि ? गौतम! चत्वारि द्वाराणि प्रज्ञप्तानि ? तद्यथा-विजयम् १ वैजयन्तम् २ जयन्तम् ३ अपराजितम् ४ क्वभदन्त ! जम्बूद्वीपस्य द्वीपस्य, विजयं नाम्ना द्वारम् प्रज्ञप्तम्? गौतम! जम्बूद्वीपे द्वीपे, मन्दरस्य पर्वतस्य (मेरुपर्वतस्य) पूर्वस्याम् पञ्चचत्वारिंशद्योजनसहस्राणि

नामा द्वीपनें हेभगवन् ! केतलांद्वारकह्या तीर्थंकरइं ? भगवन्तकहइछइं, हेगोतम ! च० च्यारद्वार कह्या ? तेकहइछइ, विजयद्वार पूर्वदिसि १ वैजयन्तद्वार दक्षिणदिसि २ जयंतद्वार पश्चिमदिसि ३ अपराजितद्वार उत्तरदिसि ४ क० किहांछें भगवन् ! जंबूद्वीपनामाद्वीपम्, विजयनामें द्वारकह्यो भगवंत कहइं, हेगौतम ! जंबूद्वीपने विषें, मं० मेरुपरवत्तनें पु० पूर्वदिशिने विषइं प० पचतालीसहजार जोयन ४५००० जईइं तिवारइं

पस्य द्वीपस्य विजयं नाम्ना द्वारं प्रज्ञप्तं ? अष्टौयोजनान्यूर्द्धोच्चत्वेन चत्वारियोजनानि विष्कंभेन विस्तारेण । इदं च द्वारविष्कम्भमानं स्थूलन्यायेनोक्तं,, सूक्ष्मेक्षिकयातु विभाव्यमानं द्वारशाखाद्वयविष्कम्भसत्कक्रोशद्वयप्रक्षेपे सार्द्धयोजनप्रमाणं भवति, तत्र विवक्षितमिति ॥ तावइयं चेव पवेसेणंति ॥ तावंत्येव चत्वारीत्यर्थः । योजनानि प्रवेशेन भित्तिबाहुल्यलक्षणेन। कथंभूत मित्याह । श्वेतं श्वेतवर्णोपेतं बाहुल्येनां करत्नमयत्वात्, वरकनकस्तूपिकाकं, वरकनका वरकनकमयी स्तूपिका शिखरं यस्य तत् । अथ शेषं द्वारवर्णकं राजधानीवर्णकं चातिदेशेनाह ॥ जावेत्यादि ॥ यावद्द्वारस्य वर्णको वर्णनग्रंथो जाव रायहाणीति, यावद्राजधानी वर्णकश्च जीवाभिगमोपांगोक्तो निरवशेषो वक्तव्य, स्तत्र प्रथमं द्वारवर्णको यथा- ईहामिग उसभ तुरग णर मगर विहग वालग किंनर रुरु सरभ चमर कुंजर वणलय पउमलय भत्ति चित्ते, खंभुग्गय वर वेइया परिगयाभिरामे, विज्जाहर जमल जुअल

जीवइत्ता जंबुद्दीवदीव, पुरत्थिमपेरंते लवणसमुद्दस्स पुरत्थिमद्धस्स पच्चत्थिमेणं सीआए महाणईए उप्पिं एत्थणं जंबुद्दीवस्स विजए णामं दारे पण्णत्ते ? अठ जोयणाइं उद्धं उच्चत्तेणं चत्तारि जोयणाइं विक्कंभेणं तावइयंचेव पवेसेणं सेए वरकणगथूभियाए जाव दारस्स वण्णओ जाव रायहाणी

व्यतिव्रज्य जम्बूद्वीपद्वीपपौरस्त्यपर्यन्तम् लवणसमुद्रस्य पूर्वार्द्धस्य पाश्चात्ये सीताया महानद्या उपरि, अत्र जम्बूद्वीपस्य विजयं नाम्ना द्वारं प्रज्ञप्तम्?अष्टौयोजनान्यूर्द्धमुच्चत्वेन चत्वारियोजनानि विष्कम्भेन तावदेव प्रवेशेन श्वेतंवरकनकस्तूपिकाकम्यावत् द्वारस्य वर्णको,यावत् राजधानी(वर्णकश्चजीवाभिगमोपाङ्गोक्तोद्रष्टव्यः)

जंबूद्वीपनें पू० पूर्वदिशिनें परिअंत ल० लवण समुद्रना पु० पूर्वार्द्धनइं पश्चिमदिशि सी० शीता महानदीनइं ऊपरइं ए० इहां जंबूद्वीपनामाद्वीपनू वि० बिजयनामेंद्वार बारणुं पं० कह्यो ? अठयोजन उ ऊं० ऊंचपणइं च० च्यारियोजन वि० पोहलपणइं ता० तेतलुंज निश्चइं पं० प्रवेसपणें से० श्वेत धोली व० प्रधान क० सुवर्णनी थू० थूभिकाइं चोतरइं करीने यावत् द्वारनंवर्णन जीवाभिगम सूत्रथी जाणवुं यावत् राजधानी जांणवी

जंबुजुत्ते, इव अच्ची सहस्स मालणीए, रूवगसहस्स कलिए भिसमाणे भिब्भिसमाणे चक्खुल्लो अणालेसे सुहफासे सस्सिरीयरूवे वण्णं ? दारस्स तस्सि-मोहोइ तंजहा-वइरामया णेमा रिट्ठामया पइट्ठाणा वेरुलिअरुइलखंभे जायरूवोवचिय पवर पंचवण्ण मणि रयण कोट्टिमतले, हंसगब्भमए लुए गोमेज्जमए इंदकीले लोहिअक्खमइअं दारपिंडाउ जोईरसामए उत्तरंगे वेरुलिआमया कवाडा वइरामया संधी लोहिअक्खमईओ सुईओ णाणामणिमया समुग्गया वइरामया अग्गला अग्गलपासाया रययामया अवेत्तणपेढिया अंकुत्तरपासए निरंतरियघणकवाडे भित्तीसुचेव भित्तिगुलिआ च्छप्पण्णा तिण्णि होंति गोमाणसीउं तत्तिआउं णाणामणिरयणवालरूव गलीलट्ठि असालभंजिआगे, वइरामए कूडे रययामए उस्सेहे सव्वतवणिज्जमए उ-च्छोए णाणामणिरयणजालपंजरमणिवंसगलोहिअक्खपडिवंसगरययभोम्मे अंकामयापक्खा पक्खबाहाउं जोईरसामयावंसा वंसकवेल्लुयाय रययामइं पट्टिआउं जायरूवमईउं उहाडणीउं वइरामईउं उवरिं पुंछणीउं सव्वसेए रययामच्छाणे अंकामयकणगकूडतवणिज्जथूभिआए सेए संख-तलविमलनिम्मलदधिघणगोखीरफेणरययणिगरप्पगासे तिलगरयणद्धचंदचित्ते णाणामणिदामालंकिए अंतोबहिंचसण्हे तवणिज्जवालुआपत्थडे सु-हफासे सस्सिरीअरूवे पासाईए ॥ ४ ॥ इति ॥ अत्रव्याख्या ॥ ईहामिगेत्यादि विशेषणदशकं पट्टवरवेदिकागतवापीतोरणाधिकारे व्याख्या तार्थमिति ततो ऽवसेयं । वण्णोदारस्स तस्सिमोहोइ इति । वर्णो वर्णकनिवेशो द्वारस्य विजयाभिधानस्यायं वक्ष्यमाणो भवति, तमेवाह ॥ तंजहेत्या-दि ॥ तद्यथा-वयरामयाणेमा इत्यादि । अत्र च द्वारवर्णनाधिकारे यत्र केवलं विशेषणं, तत्र साक्षात् द्वारस्य विशेषणता, यत्र तु विशेष्यसहितं तत्र त-स्येति गम्यं,, तेन तस्य विजयद्वारस्य वज्रमया नेमा भूमिभागा दूर्द्धं निःक्रामंतः प्रदेशाः, रिष्टरत्नमयानि प्रतिष्ठानानि मूलपादाः, वैदूर्याः वैदूर्यरत्न मयाः रुचिराः स्तंभाः यस्य तत्तथा । तथा जातरूपेण सुवर्णेनोपचितै र्युक्तैः प्रवरपंचवर्णमणिरत्नैः कुट्टिमतलं बद्धभूमितलंयस्य तत्तथा-तथा तस्य विजयद्वारस्य हंसगर्भरत्नमय एलुको देहली, गोमेदकरत्नमय इंद्रकीलो गोपुरकपाटयुगसंधिनिवेशस्थानं, लोहिताख्यं पद्मरागाख्यं रत्नं तन्मयौ द्वार पिंडौ द्वारशाखे, सूत्रे स्त्रीत्वनिर्देश आर्षत्वात् , ज्योतीरसमयं उत्तरंगं द्वारस्योपरि तिर्यग्व्यवस्थितं काष्ठं, वैदूर्यमयौ कपाटौ, लोहिताक्षमय्यो लो-हित क्षरत्नात्मिकाः सूचयः फलकद्वयसंबंधविघटनाभावहेतुपादुकास्थानीयाः , तत्र वज्रमयाः सन्धयः सन्धिमेलाः फलकानां, किमुक्तं भवति ।

वज्ररत्नापूरिताः फलकानां सन्धयः । तथा नानामणिमया समुग्गया इति, समुद्गका इव समुद्गका धूलिकागृहाणि तानि नानामणिमयानि । यत्रन्य स्तौकपाटौ निश्चलतया तिष्ठतः, वज्रमया आर्गलाः प्रासादा, स्तत्रार्गलाः प्रतीताः आर्गलाः प्रासादा, यत्रार्गला नियम्यन्ते रजतमयी आवर्तन पीठिका आवर्त्तनपीठिकाच यत्रेन्द्रकीलोभवति । तथा अंका अंकरत्नमया उत्तरपार्श्वायस्य तत्तथा-निरंतरितघनकपाटमिति । निर्गता अंतरिका लघ्वंतर रूपाययो स्तौ निरंतरिकौ अतएव घनौकपाटौ यस्य तत्तथा-॥ भित्तीसुचेवभित्तीगुलिया छप्पण्णा तिण्णि होंति इति॥ तस्य द्वारस्योभयोः पार्श्वयो र्निं त्तिषु भित्तिषु गता भित्तिगुलिकाः पीठकसंस्थानीयाः तिस्रः षट् पंचाशतः, षट् पंचाशत्त्रिकप्रमिता भवंति । अष्टषष्ट्यधिकं शत मित्यर्थः । तथा गो मानस्यः शय्याः तावन्मात्राः, षट्पंचाशत्त्रिकप्रमिताः "नानामणिरत्नमयानि व्यालरूपाणि फणिरूपकाणि लीलास्थितशालिभंजिकाश्च लीलास्थित पुत्रिका यत्र तत्तथा । तथा तस्यद्वारस्य वज्रमयः कूटो माठभागः, रजतमय उत्सेधः शिखरं, केवलं शिखर मत्र तस्यैव माठभागस्य सम्बन्धि द्रष्टव्यं त- द्वारस्य तस्य प्रागेवोक्तत्वात् । सर्वात्मना तपनीयमय उल्लोकः उपरिभागः, नानामणिरयण जाल पंजरमणिवंसग लोहिअक्ख पडिवंसग रयय भोम्मे इति । मणयो मणिमया वंशा येषांतानि मणिवंशकानि, तथा लोहिताक्षा लोहिताक्षमयाः प्रतिवंशाः येषां तानि लोहिताक्षप्रतिवंशकानि, तथा रजतमयी भूमि र्येषांतानि रजतभूमानि, प्राकृतत्वात् समासांतो मकारस्य च द्वित्वं मणिवंशकानि लोहिताक्षप्रतिवंशकानि रजतभूमानि नानाम- णिरत्नानि नानामणिरत्नमयानि जालपंजराणि गवाक्षापरपर्यायाणि यस्मिन् द्वारे तत्तथा, पदानामन्यथोपनिपातः प्राकृतत्वात् । अंकामया पक्खा इत्यत आरभ्य रययामए त्याणे इत्यंतानि पद्मवरवेदिकावद्भावनीयानि । अंकामय कणग कूडतवणिज्जथूभियागे इति ॥ अंकमयं बाहुल्येनांकरत्न मयं पक्षबाह्वादीनामंकरत्नात्मकत्वात्, कनकं कनकमयं कूटं महत् शिखरं यस्य तत्तथा, तपनीया तपनीयमयी स्तूपिका लघुशिखररूपायस्य तत्त- था, ततः पदत्रयस्य पदद्वये मीलनेन कर्मधारयः, एतेन यत् प्राक् सामान्येनोत्क्षिप्तं सेए वर कणग थूभियागे इति । तदेव प्रपंचतो भावित मिति ॥ संप्रति तदेव श्वेतत्व मुपसंहारव्याजेन भूय उपदर्शयति, श्वेतं, श्वेतत्वमेवोपमया द्रढयति । विमलं निर्मलं यत् शंखतलं शंखस्योपरितनो भागो यश्च निर्मलोदधिघनो घनीभूतं दधि गोक्षीरफेनो रजतनिकरश्च रूप्यराशि स्तद्वत् प्रकाशः प्रतिमतो यस्य तत्तथा॥ तिलगरयणद्ध चन्दचित्ते इति ॥ तिल

करत्नानि पुंड्रविशेषाः तैरर्द्धचन्द्रै श्चार्धचन्द्राकारैः सोपानविशेषै श्चित्रं चित्रकारि तिलकरत्नार्द्धचन्द्रचित्रं, तथा नानामणयो नानामणिमयानि दामानि माला स्तैरलंकृतं नानामणिदामालंकृतं, तथा अन्तर्बहिश्च श्लक्ष्णं श्लक्ष्णपुद्गलस्कंधनिर्मापितं, तपनीया स्तपनीयमय्यो वालुकाः सिकता स्तासां प्रस्तटः प्रस्तारो यत्र तत् तपनीयवालुकाप्रस्तटं । सुहफासे इत्यादि प्राग्वत् । विजयस्सणं दारस्स उभओ पासिं दुहओ णिसीहियाए दोदो चन्दणकलसा पण्णत्ता ? ते चन्दण कलसा वरकमल पइट्ठाणा सुरभिवरवारिपडिपुण्णा चन्दणकयचच्चागा आविद्धकंठेगुणा पउमप्पलपिहाणा सव्वरयणा मया अच्छा सण्हा जाव पडिरूवा महया महयामहिंदकुंभसमाणा पण्णत्ता ? समणाओसो ॥ अत्रव्याख्या ॥ विजयस्य द्वारस्योभयोः पार्श्वयो रेकैक निषेधिकीभावेन दुह उत्ति प्राकृतत्वात् ह्रस्वत्वे द्विधातो द्विप्रकारायां नैषेधिक्यां निषेधिकीचात्र निषदनस्थानं तत्र प्रत्येकं द्वौद्वौ चन्दनाय कलशौ चन्दनकलशौ माङ्गल्यघटौ प्रज्ञप्तौ ? तेच चंदनकलशा वरकलशं प्रतिष्ठान माधारो येषां ते तथा, सुरभिवरवारिपरिपूर्णाः चन्दनकृतचर्चाकाः चन्दन कृतोपरागाः । आविद्धकंठे गुणा इति ॥ आविद्ध आरोपितः कंठेगुणो रक्तसूत्ररूपो येषांते तथा, कंठे कालवत् सप्तम्या अलुप् तथा पद्म मुत्पलंच यथा योगंच पिधानं येषां ते तथा ॥ सव्वरयणामया इत्यादि प्राग्वत् ॥ महयामहया इति । अतिशयेन महांतो महेन्द्रकुंभसमानाः कुंभानामिन्द्र इंद्रकुंभो राजदंतादिदर्शनादिंद्रशब्दस्य पूर्वनिपातः, महांश्चासा विंद्रकुंभश्च तस्य समाना महेन्द्रकुंभसमाना महाकलशप्रमाणाः ,, यद्वा महीन्द्रो राजा तदर्थं तस्य सम्बन्धिनोवा कुम्भा अभिषेककलशाः तत्समानाः प्रज्ञप्ताः ? हेश्रमण ! आयुष्मन् ! विजयस्सणं दारस्स उभओपासिं दुहओ णिसीहियाए दो दो णागदंतगा पण्णत्ता ? तेणं णागदंतगा मुत्ताजाल तरूसिअ हेमजाल गवक्खजाल खिंखिणीघंटाजाल परिक्खित्ता, अब्भुग्गया अभिनिसिट्ठा तिरिअं सुसंपग्गहिया, अहे पण्णगद्धरूवा, पण्णगद्ध संठाण संठिया सव्ववइरामया अच्छा जाव पडिरूवा महया महया गयदंतसमाना पण्णत्ता ? समणा ओसो विजयस्य द्वारस्ये त्यादि पदयोजना प्राग्वत् ॥ द्वौ द्वौ नागदन्तकौ न कुटकौ अकुटका वित्यर्थः, प्रज्ञप्तौ ? तेच नागदन्तका मुक्ताजालाना मन्तरेषु यान्यूच्छ्रितानि लम्बमानानि हेमजालानि हेममयदामसमूहा, यानिच गवाक्षजालानि गवाक्षाकृतिरत्नविशेषा दामसमूहाः, यानि च किंकिणीघंटाजालानि क्षुद्रघंटासमूहा स्तैः परिक्षिप्ताः सर्वतोव्याप्ताः,, अभिमुख मुद्गता अभ्युद्गता अग्रिमभागे मना गुन्नता

इति भावः । येन तेषु मात्यदामानि सुस्थितानि भवन्ति, अभिमुखं बहिर्भागाभिमुखं निसृष्टा निर्गताः अभिनिसृष्टाः ' तिर्यग्भित्तिप्रदेशैः सुष्ठु-अतिशयेन सम्यग् मनागप्यचलनेन परिगृहीताः „ आह । पन्नगद्ध रूवा इति ॥ अधोऽधस्तनं यत् पन्नगस्य सर्पस्यार्द्धं तस्येव रूप माकारो येषां ते तथा, अधःपन्नगार्द्धवदतिसरला दीर्घाश्चेति भावः, एतदेवाचष्टे ॥ पन्नगार्द्धसंस्थानसंस्थिताः अधःपन्नगार्द्धसंस्थानसंस्थिताः सर्वात्मना व-ज्रमया अच्छा इत्यादि प्राग्वत् ॥ महया महया इति ॥ अति शयेन महांतो गजदन्तसमाना गजदन्ताकाराः प्रज्ञप्ताः ? हेश्रमण ! हे आयु-ष्मन् ! तेसुणं णागदन्तए सुबहवे, किल्लसुत्तबद्ध वग्घारिअ मल्लदाम कलावा, एवं नील लोहिअ हालिद्द सुक्किल्ल सुत्तबद्ध वग्घारिअ मल्लदाम कलावा, तेणं दामा तवणिज्जलंबूसगा सुवण्णपयरगमंडिया णाणामणि रयण विविह हारद्धहार उवसोभिय समुदया, जाव सिरीइअईउवसोभे माणा २ चिठंति ॥ अत्रव्याख्या ॥ तेषुच नागदन्तकेषु बहवः कृष्णसूत्रबद्धा वग्घारिअत्ति, अवलंबिता मात्यदामकलापाः, पुष्पमालासमूहाः „ एवं नीललोहितहारिद्रशुक्लसूत्रबद्धा अपि मात्यदामकलापा वाच्याः । तेणं दामा इत्यादि ॥ तानि दामानि ॥ तवणिज्जलंबूसगा इति ॥ तपनीय स्तपनीयमयो लंबूसगो दाम्ना मग्रिमभागे प्रांगणे लंबमानो मण्डनविशेषो गोलकाकृति र्येषां तानि तपनीयलंबूसकानि „ तथा पार्श्वतः सामस्त्येन सुवर्णप्रतरेण सुवर्णपत्रकेण मंडितानि सुवर्णप्रतरकमंडितानि „ तथा नानारूपाणां मणीनां रत्नानां च ये विविधा विचित्रवर्णा हारा अ ष्टादशसरिका स्तै रूपशोभितः समुदायो येषांतानि „ तथा जाव सिरीए अईव उवसोभे चिठंति „ अत्र यावत्करणात् एवं परिपूर्णः पाठो द्रष्टव्यः । ईसिमणणमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं मंदायं मंदायं पइज्जमाणा पलम्बमाणा पलंबमाणा पभंझमाणा पभंझमाणा उरालेणं मणुण्णेणं मणहरेणं कण्णमण निव्वुइकरेणं सद्देणं तेपएसे सव्वउ समंता आपूरेमाणा आपूरेमाणा सिरीए अतीव उवसोभेमाणा २ चिठंति „ एतच्च पूर्वं पद्मवरवेदिका वर्णने व्याख्यात मिति न भूयो व्याख्यायते । तेसिणं णागदन्तगाणं उवरि दो दो णागदन्तगा पण्णत्ता ? तेणं णागदन्तगा मुत्ताजालतरूसिया त-हेव जाव समणाओसो, तेसुणं णागदन्तएसु बहवे रययामया सिक्कया पण्णत्ता ? तेसुणं रययामएसु सिक्कएसु बहूईउ वेरुलियामईउ धूवघडीउ प-ण्णत्ता ? ताउणं धूवघडीउ, कालागुरु पवर कुंदुरुक्कतुरक्क धूवमघमघेंतगंधुद्धुआभिरामाउ, सुगन्धवर गंधिआउ गंधवट्टिभूयाउ, उरालेणं मणुण्णेणं

घाणमणनिव्वुई करेणं, गंधेणं तेपएसे सव्वतो समंता आपूरेमाणाउं २ सिरीए अईव उवसोभेमाणाओवसोभेमाणो चिट्ठन्ति ॥ अत्र व्याख्या ॥ तेषां नागदन्तानां मुपरि अन्यौ द्वौ द्वौ नागदन्तकौ प्रज्ञप्तौ ? तेच नागदन्तका मुक्ताजालतरूसिअहेमजालगवक्खजाल इत्यादि, प्रागुक्तं सर्वं द्रष्टव्यं । याव द्गजदन्तसमानाः प्रज्ञप्ताः ? हेअमण ! हे आयुष्मन् ! तेसुणं मित्यादि ॥ तेषु नागदन्तकेषु बहूनि रजतमयानि सिक्कानि प्रज्ञप्तानि ? तेषु रजत मयेषु सिक्ककेषु बहव्यो वैदूर्य्यमय्यो धूपघट्यः धूपघटिकाः प्रज्ञप्ताः ? ताश्च धूपघटिकाः, कालागुरुश्च कृष्णागुरुः प्रवरकुंदुरुक्कं चचीडाभिधानो गन्ध-द्रव्यविशेषः, तुरुष्कंच सिल्हकं, धूपश्च दशांगादिः, गन्धद्रव्यसंयोगज इति द्वंद्वे तेषां सम्बन्धी यो, मघमघेंतत्ति, मघमघायमानो ऽतिशयवान् उद्धुत इतस्ततो विस्तृतो गंध स्तेनाभिरामाः । उद्धुतशब्दस्य परनिपात आर्षत्वात् सुष्ठु शोभनो गन्धो येषां ते तथा, समासांतविधेरनित्यत्वाद त्रेरूपस्य समासांतस्याभावो, यथा सुरभिगंधेन वायिणेति, तेच ते वरगन्धाश्च प्रधानवासा स्तेषां गन्धः सन्त्रासु अस्तीति सुगन्धवरगन्धगन्धिकाः, अतो ऽनेकस्वरादितीकप्रत्ययः । अतएव गन्धवर्त्तिभूताः सौरभ्यातिशया द्गन्धद्रव्यगुटिकाकल्पाः, उदारेण स्फारेण मनोज्ञेन मनोनुकूलेन । कथंमनो नुकूलत्व मत आह ॥ घ्राणमनोनिर्वृतिकरेण गन्धेन तान् प्रत्यासन्नान् प्रदेशान् आपूरयन्त्यः २ श्रिया अतीव शोभमानाः २ तिष्ठन्ति, विजयस्सणं दारस्स उभओपासिं दुहओ निसीहियाए दोदो सालभंजियाओ पण्णत्ताओ ? ताउणं सालभंजियाओ लीलट्ठियाओ सुपइट्ठियाओ सुअलंकिया ओ णाणाविहरागवसणाओ रत्तावंगाओ असियकेसीओ, मिउविसयपसच्छलक्खणसंवेल्लियग्गा सिरयाओ, णाणामल्लपिणद्धाओ मुद्दीगेज्झसुगज्झाओ आमेलगजमलजुअलवट्टिअ अप्फुन्नयपीणरइअसंठिअपयोहराओ ईसिं आसोगवरपायवसमुट्ठियाओ वामहच्छगहियग्ग सालाओ ईसिं अहुत्ति क-डक्ख चिट्ठिएहिं लूसेमाणीओ विवचक्खुल्लो अणलेसेहिं अणणमणखिज्जमाणाओ विवपुठवीपरिणामाओ सासयभावसुवगयाओ चंदाणणाओ चन्द-विलासिणीओ चन्दद्धसमणिडालाओं चन्दाहियसोमदंसणाओ उक्काइव उज्जीए माणीओ विज्जुघणमरीचिसूरदिप्पंततेअअहिअरसणिगासाओ सिंगा-रागारचारुवेसाओ पासादीयाओ तेअसाअईव उवसोभेमाणाओ चिठंति ॥ अत्र व्याख्या ॥ विजयस्य द्वारस्योभयोः पार्श्वयो रेकैकनैषेधिकीभावेन द्विधातो द्विप्रकारायां नैषेधिक्यां द्वंद्वे शालभंजिके पञ्चाल्यौ प्रज्ञप्ते । ताश्चशालभंजिका लीलया ललिताङ्गनिवेशरूपयास्थिताः लीलास्थिताः सुष्ठु

मनोज्ञतया प्रतिष्ठिताः सुप्रतिष्ठिताः, सुष्ठु अतिशयेन रमणीयतया अलंकृताः स्वलंकृताः तथा । नानाविहरागवसणाओइति । नानाविधो नानाप्रकारो रागो रंजनं येषांतानि तादृशानि वसनानि वस्त्राणि संवृततया यासांता स्तथा, रक्तो ऽपांगो नयनप्रान्तो यासांताः रक्तापांगाः, असिताः श्यामाः केशाः यासांता असितकेश्यः, मृदवः कोमला विशदा निर्मलाः, प्रशस्तानि शोभनान्य स्फुटिताग्रत्वप्रभृतीनि लक्षणानि येषांते प्रशस्तलक्षणाः, सौवेल्लितं संवृतं किंचि दाकुंचितं अग्रं येषां शेखरककरणात् ते संवेल्लिताग्राः शिरोजाः केशाः यासांता, मृदुविशद प्रशस्तलक्षणसंवेल्लिताग्रशिरोजाः, नानारूपाणि माल्यानि पुष्पाणि पिनद्धान्याविद्धानि यथोचितस्थानेषु स्थापितानि यासांता नानामाल्यपिनद्धाः निष्ठांतस्य परनिपातो भार्यादिदर्शनात् मुष्टिग्राह्यं तनुतरत्वात् सुष्ठु मध्यं मध्यभागो यासां ता मुष्टिग्राह्यसुमध्याः, आमेलगजलजुअलवट्टि अअञ्जुणायपीणरइअसंठिअपयोहराओ । आपीडः शेखरक स्तस्य यमलं समश्रेणीकं युगलं तद्व द्वर्त्तितौ बदुस्वभावा वुपचितकठिनभावा विति भावः, अतएवा भ्युन्नतौ तुंगौ पीनरतिदसंस्थितौ पीवरसुखदसंस्थानौ पयोधरौ स्तनौ यासांता स्तथा । तथा ईसिंअसोगपायवसमुठियाओ इति । ईषन्मनाक् अशोकवरपादपे समवस्थिता आश्रिताः, तथो वामहस्तेन गृहीत मग्रं यस्याः शाखाया अर्थो दशोकपादपस्ययाभिस्ताः वामहस्तगृहीताग्रशाखाः, ईसिं अद्धुव्विकडक्खचिठिएहिंलूसेमाणीओविवेति । ईषन्मनाक् अर्द्धं तिर्यग्वलितं अक्षि चक्षु र्येषु कटाक्षरूपेषु चेष्टितेषु शृंगाराविर्भावक्रियाविशेषेष्वित्यर्थः । तैर्मुग्धांत्य इव सुरजनमनांसीति गम्यं,-तथा चक्खुल्लोअणालेसेहिंति । अन्नमन्नं परस्परं चक्षुषां लोचनेना ऽवलोकनेन लेशास्संश्लेषास्तैः खिद्यमाना इव, किमुक्तं भवति एवं नाम ताः तिर्यग्वलिताक्षिकटाक्षैः परस्पर मवलोकमानाः अवतिष्ठंते यथानूनं परस्परसौभाग्यासहनतः तिर्यग्वलिताक्षिकटाक्षैः परस्परं खिद्यन्त इवेति तथा । पुढवीपरिणामाओ इति । पृथिवीपरिणामरूपाः शाश्वतभाव मुपगता विजयद्वारवत् चन्द्रानना श्चन्द्रमुख्यः चन्द्रव न्मनोहरं विलसंती त्येवंशीला श्चन्द्रविलासिन्यः चन्द्रार्द्धेना ष्टमीचन्द्रेण समं सदृशं ललाटं यासांताः चन्द्रार्द्धसमललाटाः चन्द्रा दप्यधिकं सोमं सुभगं कांतिमद्दर्शन माकारो यासांताः, तथा उल्का इव गगनाग्निज्वाला इवोद्योतमानाः विद्युतो मेघवक्षय स्तासां घना निबिडा मरीचयस्तेभ्यो यच्च सूर्यस्य दीप्यमानं घनाद्यनावृतं तेज स्तस्मा दधिकतरः सन्निकाशः प्रकाशो यासांता,

स्तथा शृंगारो मंडनभूषणाटोप स्तत्प्रधानआकारो यासां ता स्तथा चारुवेषाः मनोहरनेपथ्याः पश्चात्कर्मधारयः अथवा शृङ्गारस्य प्रथमरसस्या-गारमिव गृहमिव चारुवेषो यासां ता स्तथा । प्रासादीया इत्यादि पद चतुष्टयं प्राग्वत् , विजयस्सणं दारस्स उभओपासिं दुहओ णिसीहियाए दो दो जालकडगा पण्णत्ता ? तेणं जालकडगा सव्वरयणामया अच्छा सल्हा जाव पडिरूवा, विजयस्येत्यादि प्राग्वत् । द्वौ द्वौ जालकटकौ जालकाकीर्णौ रम्यसंस्थानौ प्रदेशविशेषौ प्रज्ञप्तौ, तेच जालकटकाः सर्वरत्नमयाः अच्छा इत्यादि प्राग्वत् । विजयस्सणं दारस्स उभओ पासिं दुहओ णिसीहियाए दो दो घंटाओ पण्णत्ताओ ? तासिणं घंटाणं अयमेयारूवे वण्णावासे पण्णत्ते । तंजहा जंबूणयामईओ घंटाओ वइरामईओ लालाओ णाणामणिमया घंटापासगा तवणिज्जमईओ संकलाओ रययामईओ रज्जूओ ताउणं घंटाओ उरहस्सराओ हंसस्सराओ कोंचस्सराओ सीहस्सराओ दुंदुभिस्सराओ णंदिस्सराओ णंदिघोसाओ मंजुस्सराओ मंजुघोसाओ सुस्सराओ सुस्सरघोसाओ ओरालेणं मणुण्णेणं मणहरेणं कण्णमणनिव्वुइकरेणं सद्देणं जाव चिट्ठन्ति, अत्तर गमनिका प्राग्वत् „ द्वे द्वे घंटे प्रज्ञप्ते ? तासां च घंटाना मयमेतद्रूपो वर्णावासः प्रज्ञप्तः ? तद्यथा-जांबूनदमय्यो घंटाः वज्रमय्यो ला-लाः नानामणिमया घंटापार्श्वाः घंटैकदेशविशेषाः तपनीयमय्यः शृंखला यासुता अवलंबिता स्तिष्ठंति, रजतमय्यो रज्जवः प्रतीताः, ताश्च घंटाओ घेन प्रवाहेण स्वरो यासां ता स्तथा, मेघस्येवातिदीर्घः स्वरो यासां ता स्तथा हंसस्येव मधुरः स्वरो यासान्ता स्तथा एवं क्रौंचस्वराः सिंहस्येव प्र-भूतदेशव्यापी स्वरो यासां ता स्तथा, एवं दुंदुभिस्वराः नंदिर्द्वादशतूर्यसंघात स्तद्व त्स्वरो यासां ता स्तथा नंदिवत् घोषो निनादो यासां ता स्तथा मंजुः प्रियः कर्णमनःसुखदायी स्वरो यासां ता स्तथा, एवं मंजुघोषाः किं बहुना सुस्वराः सुस्वरघोषाः अथवा सुष्ठु यत् स्वं स्वकीयं अनंतरोक्तं वर्ण शृंखलादिकं तेन राजंते इति सुस्वराः तथा शोभनौ स्वरघोषौ यासां ताः, ओरालेण मित्यादि प्राग्वत् „ विजयस्सणं दारस्स उभओ पासिं दुहओ णिसीहियाए दो दो वनमालाओ पण्णत्ताओ ? ताओणं वनमालाओ णाणादुमलयकिसलयपल्लवसमाउलाओ छप्पयपरिभुज्जमाणसोभंतसस्सिरीया ओ पासादीयाओ ४ । अत्र व्याख्या । पदयोजना प्राग्वत् द्वे द्वे वनमाले प्रज्ञप्ते ? ताश्च वनमाला नानाद्रुमाणां नानालतानांच ये किशलयरूपा अ-तिकोमला इत्यर्थः, पल्लवा स्तैः समाकुलाः संमिश्राः षट्पदैः परिभुज्यमानाः सत्यः शोभमानाः षट्पदपरिभुज्यमानशोभमानाः अतएव सश्रीकाः ततः

अथवा महांत मलयगिरिपर्वत तथा मेरूपर्वतनीपरइ यावत् राज्यपालतायका (॥ ९७ ॥ अथग्रंथांतरानुसारेण किंचिद्विनीतावर्णनं दर्श्यते । श्रीविष्णोराज्यसमये शक्रादेशान्नवांपुरीं । धनदःस्थापयामास रत्नचामीकरोत्करैः ॥ १ ॥ द्वादशयोजनायामा नवयोजनविस्तृता । अष्टधारामहा

॥ टीका ॥

पादेयधीः संस्थानंयथास्थानमंगोपांगविन्यासः शीलमाचारः प्रकृतिः सहजं ततो द्वंद्वे प्रशस्तावर्णादयोऽर्था यस्य सतथा भवन्तिच विशिष्टाः वर्ण स्वरादयः आज्ञैश्वर्यादिप्रधानफलदाः प्रधाना अनन्यवर्तिनो गौरवाद्योऽर्था यस्य सतथा तत्र गौरवं महासामन्तादिकृताभ्युत्थानादिप्रतिपत्तिः छायाशरीरशोभा गतिः संचरणमिति । अनेकेषु विविधप्रकारेषु वचनेषु वक्तव्येषु प्रधानोमुख्यः अनेकधावचनप्रकारश्चायं निजशासनप्रवर्त्तनादौ आदौ तावन्मधुरं मध्येरूक्षं ततः परं कटुकं । भोजनविधिमिव विबुधाः स्वकार्यसिद्धैवदन्तिवचः १ अथवा सत्यं मित्रैः प्रियं स्त्रीभि रलीकमधुरं द्विषा । अनुकूलंच सत्यञ्च वक्तव्यं स्वामिनासह २ इति तेजःपरासहनीयःप्रतापः अभेदोपचारेण तद्वान् तेजसां हिनवयःसमीक्ष्यते इत्यादिवत्, आयुर्बलं पुरुषायुषं तद्यावद्वीर्यंतेन युक्तःतेन जरारोगादिनोपहतवीर्यत्वं नास्येति भावः । पुरुषायुषंच तदानींतनकालेप्राकृतजनानां पूर्व्वकोटिसङ्ख्येयस्य त्रुटितांगप्रमाणं वोद्वव्यं । नरदेवस्यैतावतएवायुषः सिद्धान्ते भणनात् । एतेन भेदःपूर्वविशेषणादस्येति अशुषिरं मनश्छिद्रं घनतएव घनचिचितंनिर्झुरभृतं यल्लोहशृंखलं तदिव नाराचवज्रऋषभं प्रसिद्धा वज्रऋषभनाराचसंहननं यत्र तंतथाविधं देहं धरतीत्येवंशीलो ऋषोमीनः युगंशकटांगविशेषः २ शृंगारोजलभाजनविशेषः ३ वर्द्धमानक ४ भद्रासन ५ शङ्खोदक्षिणावर्त्तः ६ छत्रंप्रतीतं ७ व्यजनंपदैकदेशेपदसमुदायोपचाराद् बालव्यजनं अथवा तेलुगवाइत्यनेन बालपदलोपः चामरं आर्षत्वात् स्त्रीत्वं तेनव्यजनीति निर्देशः ८ पताका ९ चक्र १० लांगल ११ मुशल १२ रथ १३ स्वस्तिकां १४ अंकुश १५ चंद्रा १६

॥ मूल ॥

रघणणिचिग्गलोहसंकलणारायवयइरनसहसंघयणदेहधारीऊस?जुग २ भिंगार ३ वद्धमाणग ४ भद्दासण ५ सं

॥ अनु० ॥

रूषयुगशृङ्गारवर्धमानकभद्रासनशङ्खछत्रव्यजनपताकाचक्रलाङ्गलमुसलरथस्वौवस्तिकां कुशचन्द्रादित्याग्नि यूपसागरेन्द्रध्वजपृथिवी पद्मकुञ्जरसिंहास

॥ भाषा ॥

शालासाभवतोरणोज्वला ॥ २ ॥ धनुषांद्वादशशतान्युच्चैरष्टशतंतले आयामशतमेकंस व्यधाद्वप्रसखातिकं ॥ ३ ॥ सौवर्ण्यस्यचतस्योर्ध्वं कपिशीर्षावलिर्बभौ । मणिजामरशैलस्य नक्षत्रालिरिवोद्गता ॥ ४ ॥ चतुरस्राश्चत्र्यस्राश्च वृत्ताश्चस्वस्तिकास्तथा । मंदराःसर्वतोभद्रा एकभूमिद्विभूमिकाः ॥ ५ ॥ त्रिभूमाद्याःसप्तभूमाया दृतांमान्यभूभुजां । प्रासादाकोटिशस्तत्रा भूवन्रत्नसुवर्णजाः ॥ ६ ॥ युग्मं । दिश्यैशान्यांसप्तभूमं चतुरस्रंहिरण्मयं ।

सर्वप्रखातिकंचक्रे प्रासादंनाभिभूपतेः ॥ ७ ॥ दिश्यैद्र्यांसर्वतोभद्रं सप्तभूमं महोन्नतं । वर्तुलं भरतेशस्य प्रासादंधनदोकरोत् ॥ ८ ॥ आग्नेय्यां भरतस्येव सौधंवाहुबलेरभूत् । शेषाणांच कुमाराणा मंतराह्यभवन्द्वयोः ९ ॥ तस्यांतरादिदेवस्य चैकविंशतिभूमिकं त्रैलोक्यविजयंनाम प्रासादंरत्न राजिभिः ॥ १० ॥ सवप्रखातिकंरम्यंसुवर्णकलशावृतं । चंचद्ध्वज पटव्याजा न्नृत्यंतंनिर्ममेहरिः ॥ ११ ॥ युग्मं । अष्टोत्तरसहस्रेण मणिजालैरसौ बभौ । तावत्संख्यमुखैर्भूरि द्युवाणमिवतद्यशः ॥ १२ ॥ कल्पद्रुमैर्वृताःसर्वे भ्रूवन्सेभहयौकसः । सप्राकारावृहद्वासः पताकामालभारिणः ॥ १३ ॥ सुधर्मसदृशोचारुरत्नमय्यभवत्पुरः । युगादिदेवप्रासादात् सज्ञासर्वप्रभाभिधा ॥ १४ ॥ चतुर्दिक्षुव्यराजंत मणितोरणमालिकाः । पंचवर्णप्रभांकूर पूरझंबरितांवराः ॥ १५ ॥ अष्टोत्तरसहस्रेण मणिरत्नैर्विभूषितं । गव्युतिद्वयमुत्तुंगं मणिरत्नहिरण्मयं ॥ १६ ॥ नानाभूमिगवाक्षाढ्यं विचित्रमणि वेदिकं । प्रासादंजगदीशस्य व्यधात्प्रीदः पुरांतरा ॥ १७ ॥ युग्मं । सामंतमंडलीकानां नंद्यावर्त्तादयःशुभाः । प्रासादानिर्मितास्तत्र विचित्रा विश्वकर्मणा ॥ १८ ॥ अष्टोत्तरसहस्रंतु जिनानांभवनान्यभूत् । उच्चैर्ध्वजाग्रसंलुब्ध तीक्ष्णांशुतुरगाण्यधः ॥ १९ ॥ चतुष्यथप्रतिबद्धा चतुरशीति रुच्चकैः । प्रासादाशार्हतांरम्या हिरण्यकलशैर्वभुः ॥ २० ॥ सौधानिहिरण्यरत्न मयान्युच्चैः सुमेरुवत् । कौबेर्यांसपताकानि चक्रेसव्यवहारिणां ॥ २१ ॥ दक्षिणस्यांक्षत्रियाणां सौधानिविविधानिच । अभूवन्सारवागाराणि तेजांसीवनिवासिनां ॥ २२ ॥ षड्प्रांतश्चतुर्दिक्षु पौराणां सौधकोटयः । व्यराजंतद्युसद्यान समानविशदश्रियः ॥ २३ ॥ सामान्यकारुकाणांच बहिःप्राकारतोभवन् । कोटिसंख्याश्चतुर्दिक्षु गृहाःसर्वधनाश्रयाः ॥ २४ ॥ अपाच्यांचप्रतीच्यांच कारुकाणांबभुर्गृहाः । एकभूमिमुखास्त्र्यस्रा स्त्रिभूमिंयावदुच्छ्रिताः ॥ २५ ॥ अहोरात्रेणनिर्माय तांपुरीधनदोकरोत् । हिरण्यरत्नधान्यानि वासांस्याभरणानिच ॥ २६ ॥ सरांसिवापीकूपादीन् दीर्घिकादेवतालयान् । अन्यच्चसर्वंतत्राहो रात्रेणधनदोकरोत् ॥ २७ ॥ विपिनानिचतुर्दिक्षु सिद्धार्थश्रीनिवासके । पुष्काकारंनंदनंवा भवन्भूयांहिचान्ततः ॥ २८ ॥ प्रत्येकहेमचैत्यानि जिनानांतत्ररेजिरे । पवनाहृतपु ष्पाणि पूजितानिद्रुमैरपि ॥ २९ ॥ प्राच्यामष्टापदोपाच्यां महाशैलोमहोन्नतः । प्रतीच्यांसुरशैलस्तु कौवेर्यांमुदयाचलः ॥ ३० ॥ तत्रैवमभवन् शैलाः कल्पवृक्षालिमालिनः । मणिरत्नाकरा प्रोच्चै र्जिनावासपवित्रिताः ॥ ३१ ॥ शक्रास्त्रयारत्नमयी मयोध्यांपरनामतः । विनीतांसुरराजस्य ।

दित्या १७ ग्नयःप्रतीताः १८ यूपोयज्ञस्तंभः १९ सागरःसमुद्रः २० इंद्रध्वज २१ पृथ्वी २२ पद्म २३ कुञ्जराः २४ कंठ्याः सिंहासनं सिंहांकितं नृपासनं २५ दंश २६ कूर्म्म २७ गिरिवर २८ तुरगवर २९ मुकुट ३० कुंडलानि ३१ व्यक्तानि नंद्यावर्त्तःप्रतिदिग्नवकोणकः स्वस्तिकः ३२ धनुः ३३ कुंतौव्यक्तौ ३४ गागरः स्त्रीपरिधानविशेषः ३५ भवनं भवनपतिदेवावासः विमानं वैमानिकदेवावासः ३६ एतेषांद्वंद्वः तत्एतानि प्रशस्तानि मङ्गल्यानि सुविभक्तानि अतिशयेनविविक्तानि यान्यनेकान्यष्टाधिकसहस्रप्रमाणानि लक्षणानि तैश्चित्रो विस्मयकरः करचरणयो र्देशभागो यस्य सतथा अत्रपदव्यत्ययः

ख ६ छत्त ७ वीअणि ८ पडाग ९ चक्क १० णंगल ११ मुसल १२ रह १३ सोत्थिअ १४ अंकुस १५ चंदा १६ इन्द्र १७ अग्गि १८ जूअ १९ सागर २० इंदज्झय २१ पुहवि २२ पउम २३ कुंजर २४ सीहासण २५ दंश २६ कुम्म २८ गिरिवर २८ तुरंगवर २९ वरमउड ३० कुंडल ३१ णंदावत्त ३२ धणु ३३

नदण्डकूर्मगिरिवरतुरगवरमुकुटकुण्डलनन्द्यावर्तधनुःकुन्तगागरभवनविमानानेकलक्षणप्रशस्तसुविभक्तचित्रकरचरणदेशभागः ऊर्ध्वमुखलोमजालसु कुमारस्निग्धमृदुआवर्तप्रशस्तलोमविरचितश्रीवत्सलक्ष्मविपुलवक्षाः देशक्षेत्रसुविभक्तदेहधारी तरुणरविरश्मिबोधितवरकमलविबुद्धगर्भवर्णः हयपो

पुरीमिवसनिर्ममे ॥ ३२ ॥ यद्वास्तव्यजनादेवे गुरौधर्मेवसादराः स्थैर्यादिभिर्गुणैर्युक्ताः सत्यशौचपवित्रिताः ॥ ३३ ॥ कलाकलापकुशलाः सत्संगतिरताः सदा । विशदाः शांतसद्भावा अहमिंद्रामिहोदयाः ॥ ३४ ॥ युग्मं । तत्पुर्यामृषभःस्वामी सुरासुरनरार्चितः । जगत्सृष्टिकरोराज्यं पातिविश्वस्यरंजनात् ॥ ३५ ॥ अन्वयोध्यामिहक्षेत्र पुराण्यासन्नमंततः । विश्वस्रष्टृशिल्पिवृंद घटितानितदुक्तिभिः ॥ ३६ ॥ इतिविनताबर्णनं विचरलें बीजोगमो राजानावर्णननो एहपाठजाणवो तेपाठकहइंछइं तेवीनीताइं असंख्याताबरसनइं अंतरइं छेटें ऊपजइं भरतनामइं चक्रवर्त्तियशवंत उत्तमप्रधान अभिजात उत्तमकुलवंत सत्वसाहसपणुं वीर्य प्राक्रम तेहनें गुणेंकरीसहित प्रसस्त उत्तम बर्णशरीरनो स्वर सार ते शरीरनुं दृढपणुं संघ

प्राकृतत्वात् । तीर्थकृतामिव चक्रिणामप्यष्टाकधिसहस्रलक्षणानि सिद्धांतसिद्धानि । यदाह । निशीथचूर्णौ पागयमणुआणं बत्तीसंलरकणाणि अठसयं बलदेववासुदेवाणं अठसहस्सं चक्कवट्टितित्थगराणंति । ऊर्ध्वमुखं भूमेरुद्गच्छतामांकुराणामिव येषांतानि ऊर्ध्वमुखानियानिलोमानि तेषांजालं समूहो यत्र सतथा अनेनच श्रीवत्सकारव्यक्तिर्दर्शिता अन्यथा ऽधोमुखैस्तैः श्रीवत्सकारानुद्भवः स्यात् । सुकुमालस्निग्धानि नवनीतपिंडादिद्रव्याणि तानीव मृदुकानि आवर्तैर्भिकुरसंस्थानविशेषैः प्रशस्तानि मङ्गल्यानि दक्षिणावर्तानीत्यर्थः यानिलोमानि तैर्विरचितोयः श्रीवत्सो महापुरुषाणां वक्षोंतर्वर्ती अभ्युन्नतो ऽवयव स्ततःपूर्वपदेनकर्मधारय स्तेनोन्नतमाह्लादितं विपुलं वक्षो यस्य सतथा देशेकोशलदेशादौ क्षेत्रेतदेकदेशभूतविनीतानगर्य्यादौ सुविभक्तो यथास्थानविनिविष्टावयवो योदेह स्तंधरतीत्येवंशीलः तत्कालावस्थेन भरतक्षेत्रेनृत्तरतचक्रितोऽपरः सुन्दरांगइत्यर्थः । तरुणस्योद्गच्छतो रवे र्यैरंशवः किरणा स्तैर्बोधितं विकासितं यद्रक्तकमलंप्रधानसरोजं हेमांबुजमित्यर्थस्तस्य विबुधोविकस्वरो योगर्भोमध्यभाग स्तद्वद्गर्भः शरीरद्रव्यवर्यस्य सतथा हयपोसनं युसउत्सर्गे इतिधातो रनटिहयापातंतदेवकोशइवकोशः सुगुप्तत्वा त्तत्सन्निभः प्रशस्तःपृष्टस्य पृष्टभागस्यांत श्चरमभागो ऽपानं तत्र निरुपलेपो लेपरहितपुरीषकत्वात्, पद्मंप्रतीतं उत्पलंकृष्टं कुन्दजातियूथिकाःप्रतीताः वरचम्पकोराजचंपकः नागपुष्पंनागकेसरकुसुमं सारङ्गानि प्रधानदलानि अ

कोंत ३४ गागर ३५ भत्रण ३६ विमाण ३७ णेगलक्खणपसत्थ सुविभत्तचित्तकरचरणदेसभागेउहामुहलोम जालसुकुमालणिद्धमउअणावत्तपसत्थलोमविरइअसरिवत्थलच्छसविउलवच्छे देसखेत्तसुविभत्तदेहधारी तरु

सनकोशसन्निभप्रशस्तपृष्ठान्तनिरुपलेपः पद्मोत्पलकुन्दजातियूथिकावरचम्पकनागपुष्पसारङ्गतुल्यगन्धिः षट्त्रिंशलदधिकप्रशस्तपार्थिवगुणैर्युक्तः, अ व्यवच्छिन्नातपत्रः प्रकटोभययोनिः विशुद्धनिजककुलगगनपूर्णचन्द्रः चन्द्रइव सौम्यतया नयनमनोनिर्वृतिकरः अक्षोभः सागरइवस्तिमितः

यण अस्तिसमूह त०शरीर वु०वुद्विउत्पातादिक प्रमुष धारणा मे०पंडित पशु सं०सरीरनोआकार सी०आचार प्रकृति स्वभाव प्रशस्त उत्तमछें प्रधानअंष्ट गौरव अनइं छायासरीरनीसोभा तेणे सहित अनेक बचनइंकरी प्रधान उत्तमसहितछइ (आदौतावत्समधुरंमध्येरुक्षं ततः परंकटुकं ॥ जोजनविधि

अथवा पदैकदेशेपदसमुदायग्रहणात् सारङ्गशब्देनसारङ्गमदःकस्तूरी द्वंद्वैकृते एतेषां तुल्योगन्धः शरीरपरिमलो यस्य सतथा, तद्धितलक्षणादिप्रत्ययात् रूपसिद्धिः षट्त्रिंशता अधिकप्रशस्तैः पार्थिवगुणै र्युक्तः । तेचेमे, अव्यङ्ग १ लक्षणपूर्णः २ रूपसंपन्न ३ नृतनुः अमदो ४ जगदोजस्वी ५ यशस्वी ६ चक्रपालुहृत् ७ १ कलासुकृतकर्माच ८ शुद्धराजकुलोद्भवः ९ वृद्धानुग १० स्त्रिशक्ति ११ श्च प्रजारागी १२ प्रजागुरुः १३ ॥२॥ समर्थनः पुमर्थानां त्रयाणांस समात्रया १४ कोशवान् १५ सत्यसंधश्च १६ चारदृग् १७ दूरमंत्रदृग् १८॥३ आसिद्धिकर्मोद्योगी १९ च प्रवीणः शस्त्र २० शास्त्रयोः २१ निग्रहा २२ ऽनुग्रहपरो २३ निर्ह्रेचंदुष्टशिष्टयोः २४॥४ उपायार्जितराज्यश्री २५ र्दानशौंडो २६ ध्रुवंजयी २७ न्यायप्रियो २८ न्यायवेत्ता २९ व्यसनानांव्यपासकः ३०॥ ५ अवार्यवीर्यो ३१ गांभीर्यो ३२ दार्य ३३ चातुर्यभूषितः ३४ प्रणामावधिकक्रोध ३५ स्तात्त्विकःसात्त्विको ३६ नृपः ६ एते पाठसिद्धार्थाः ॥ नवरमौदार्यंदाक्षिण्यं तेन दानशौंडतागुणादस्यभेदः यद्यप्येतेषामेव मध्यवर्त्तिनः केचनगुणाः सूत्रकृता साक्षात्पूर्वसूत्रे उक्ता उत्तरसूत्रेचवक्ष्यंते, तथापि षट्त्रिंशत्संख्यामेलनार्थं मत्रते उक्ताइति सदोषः । उपलक्षणाच्चमानोन्मानादिवृद्धिकत्वभक्तवत्सलत्वादयोऽन्येपि उक्तातिरिक्ताग्राह्याइति । अव्यवच्छिन्नमखंडित मातपत्रंछत्रं यस्य सतथा एतेन पितृपितामहक्रमागतराज्यभोक्तेति सूचितं । अथवा संयमकालादर्वाग् नकेनापि बलीयसारिपुणा तस्य प्रभुत्वमाच्छिन्नमिति, प्रकटे विशदावदाततया जगत्प्रतीते उभययोन्यौ मातृपितृरूपे यस्य स तथा अतएव विशुद्धं निष्कलंकं यन्निजककुलं तदेवगगनं तत्र पूर्णचन्द्रः चन्द्रइव

णरविरस्मिबोहिअवरकमलविबुहगुणवसे हयपोसिणकोससंमिन्नपहत्थपिहंतणिरुबलेवे पउमप्पलकुंदजाइ
जूहिअवरचंपगणागपुप्फसारंगतुल्लगंधी बत्तीसअहिअपसत्थपत्थिवगुणेहिं जुत्ते अवोच्छिन्नसायवत्ते पा

धनपतिरिव भोगसमुदयसद्द्रव्यः समरे अपराजितः परमविक्रमगुणः अमरपतिसमानसदृशरूपः मनुजपति र्भरतचक्रवर्ती (उत्पद्यते), नरतं

मित्रबिबुधाःस्वकार्यसिध्यैवदंतिवचः १ सत्यंमित्रेप्रियं स्त्रीभिरलीकं नधुरंद्विषा।। अनुकूलंचसत्यंच वक्तव्यंस्वामिनासह २) तेजो आनुषो बल वीर्य शरीरनु
तेणेसहित अठ्ठिदूरहित घठ्ठनिविड खिठ्पुट एहवी लोहनीं साकल तेहनीपरइ नाराच ऋषभ वज्र एतलइं वज्रऋषभनाराचनामइं संघयणवंत

सोमतया मृदुस्वभावेन नयनमनसो निर्वृतिकरः आह्लादक इत्यर्थः अक्षोभो भयरहितः सागरःप्रस्तावात् क्षीरसमुद्रादिः सइव स्तिमितः स्थिरश्चि न्ताकल्लोलवर्जितो नपुनर्वेलावसरवर्द्धिष्णुकल्लोलो लवणोदइवा स्थिरस्वभाव इत्यर्थः । धनपतिरिव कुबेरइव भोगस्य समुदयः सम्यगुदय स्तेन सहस द्विद्यमानं द्रव्यं यस्य सभोगसमुदयसद्द्रव्य स्तस्यभाव स्तत्ता तया भोगोपयोगिभोगांगसमृद्ध इत्यर्थः, समरे संग्रामे अपराजितो जंगमप्राप्तः परमविक्रम गुणः व्यक्तं, अमरपतेः समानंसदृश मत्यर्थतुल्यं रूपं यस्य सतथा मनुजपतिर्नरपति र्भरतचक्रवर्त्ती उत्पद्यतेइतितु प्राग्योजितमेव । अथोत्पन्नः सन् किंकुरुतेइत्याह । भरहमित्यादि । अनंतरसूत्रेणवदर्शितस्वरूपोऽरतचक्रवर्त्ती भरतंभुंक्ते शास्तीति । प्रनष्टशत्रु रितिव्यक्तं अतइदं भरतक्षेत्रमुच्यतेइति निगमनमग्रेवक्ष्यते । अथप्रस्तुतभरतस्य दिग्विजयादिवक्तव्यतामाह । तएणमित्यादि । ततोमांडलिकत्वप्राप्तेरनंतरं तस्य भरतस्य राज्ञो ऽन्यदाकदा चि न्मांडलिकत्वं भुंजानस्य वर्षसहस्रेगते इत्यर्थः आयुधगृहशालायांदिव्यं चक्ररत्नं समुदपद्यत । तएणंसेइत्यादि । ततश्चक्ररत्नोत्पत्तेरनंतरं स आयुध गृहिकोयो भरतेन राज्ञा आयुधाध्यक्षः कृतोस्तीति गम्यं । भरतस्यराज्ञः आयुधगृहशालायां दिव्यंचक्ररत्नं समुत्पन्नं पश्यति, दृष्ट्वाच हृष्टतुष्टमत्यर्थंतु ष्टं हृष्टंवा अहो मया इदमपूर्वंदृष्टमिति विस्मितं तुष्टं सुष्ठुजातं यन्मयैव प्रथममिदमपूर्वंदृष्टं यन्निवेदनेनस्वस्वामीप्रीतिपात्रं करिष्यतेइति संतोषमाप न्नं चित्तंयत्र तद्यथाभवति तथा आनंदितः प्रमोदंप्राप्तः यद्वा हृष्टतुष्टोऽतीव तुष्ट स्तथाचित्तेनआनंदितः सकारः प्राकृतत्वादलाक्षणिकः ततः कर्मधा

गहउभयजोणी विसुद्धगिच्चुगकुलगयणपुन्नचंदे चंदइवसोमयाए णयणमणाणिव्वुइकरे अक्खोभे सागरोव्वथिमिए धणवइव्वभोगसमुदयसद्दव्वयाए समरेअपराइए परमविक्कमगुणे अमरवइसमाणसरिसरूवे मणुअत्ताए भर

जुद्धक्के, प्रनष्टशत्रुः । ततस्तस्य भरतस्य राज्ञोऽन्यदा कदाचित् आयुधगृहशालायां दिव्यं चक्ररत्नं समुदपद्यत । ततः स आयुधगृहिको भरतस्य

एहवा सरीरनोधरणाहारछइं ऋषभछ १ युगधुंसरुं २ भृंगारलोटो ३ वर्द्धमान ४ भद्रासन ५ संख ६ छत्र ७ चामर ८ पताकाध्वजा ९ चक्र १० णांगुल १ मुंसलुं २२ रथ १३ सारथि १४ अंकुस १५ चंद्रमा १६ सूर्य १७ अग्नि १८ यज्ञस्यंभ १९ समुद्र २० इंद्रध्वज २१ पृथवी २२ कमल २३ हस्ती २४ सीहा-

॥ टीका॥

रयः नंदितो मुखसोमतादिभावैः समृद्धिमुपागतः प्रीतिःप्रीणनं मनसि यस्य सतथा चक्ररत्ने बहुमानपरायण इत्यर्थः परमं सौमनस्यंसौमनस्कत्वं जा तमस्येति परमसौमनस्यितः एतदेवव्यनक्ति । हर्षवशेन विसर्प्यदुल्लसद्हृदयं यस्य सतथा प्रमोदप्रकर्षप्रतिपादनार्थत्वात्कैतानि विशेषणानि पुनरुक्तता या दुष्टानि । यतः वक्ताहर्षेति यत्रैव तद्दिव्यं चक्ररत्नं तत्रैवोपागच्छति उपागत्यच त्रिकृत्वस्त्रीन्वारान आदक्षिणप्रदक्षिणं दक्षिणहस्तादारभ्य प्रद क्षिणंकरोति त्रिःप्रदक्षिणयती त्यर्थः । तथाकृत्वाच करतलेति अत्रयावत्पदात् करयलपरिग्गहिअंदसणहंसिरसावत्तं मत्थए अंजलिंति । अत्रव्याख्या । करतलाभ्यां परिगृहीतआत्तस्तंदशकरट्ठयसंबंधिनोनखा समुदिता यत्रतं शिरसिमस्तकेआवर्त्तः आवर्त्तनंप्रादक्षिण्येनपरिभ्रमणंयस्यतं शिरसाऽप्राप्तमित्य न्ये मस्तकेअंजलिं मुकुलितकमलाकारकरट्ठयरूपंकृत्वा चक्ररत्नस्यप्रणामंकरोति, कृत्वाच आयुधगृहशालातः प्रतिनिष्क्रामति निर्याति, प्रतिनिष्क्रम्यच यत्रै व बाहिरिकाआभ्यंतरिकापेक्षया बाह्या उपस्थानशाला आस्थानमंडपो यत्रैवच भरतोराजा तत्रैवोपागच्छति, उपागत्यच करतलजावंति पूर्ववत् जये

॥ मूल॥

हचक्करयणे नरहं नुंजइ । पणठसन्नू । तएणं तस्सभरहस्स रन्नो आउहयाकयाइं आउहघरसालाए दिव्वे चक्करय णे समुप्पज्जित्था। तएणंसे आउहघरिए भरहस्सरन्नो आउहघरसालाए दिव्वंचक्करयणं समुप्पन्नं पासइ पासि त्ता हठतुठचित्तमाणंदीए नंदिए पीइमणे परमसोमणसिए हरिसवसविसप्पमाणहिअए जेणामेव दिव्वे चक्

॥ अनु०॥

राज्ञो आयुधगृहशालायां दिव्यं चक्ररत्नं समुत्पन्नं पश्यति । दृष्ट्वा हृष्टतुष्टचित्तानन्दितो नन्दितः प्रीतिमनाः परमसौमनस्थितः हर्षवशविसर्प- द्धृदयः, यत्रैवदिव्यं चक्ररत्नं तत्रैवोपागच्छति । उपागत्यत्रिकृत्व आदक्षिणाप्रदक्षिणं करोति । कृत्वा करतल (यावत्पदात् परिगृहीतदशनखंशिर

॥ भाषा ॥

सन २५ दंड २६ काछबो २७ पर्वत २८ प्रधानअश्व २९ मुकट ३० कुंडल ३१ नंदावर्त्त ३२ धनुष ३३ कुंतभालो ३४ गागरो स्त्रीनोपहरिवानोबस्त्र ३५ भवतपतीदेवतानो भवन परिभासणीउपदमा मंडलिबंधमिहो(इवाहाय चारगछविछेआइं भरहस्स चउव्विहानाइं) वैमानिकदेवतानोविमान ३६

इत्यादिक अनेकहजारअर्में आठ १०००८ लक्षणप्रशस्तभलां सु०जूजूआ वि०आश्चर्यनांकरणहार एहवा क०हाथ च०पगना दैसभागलेजेहना (अव्यंगो १ लक्षणैः पूर्णो २ रूपसंपत्तिनृत्तनुः ३ अमहो ४ जगदोजस्वी ६ यशस्वीचदकृपालु हृत् ७।१। कलासुकृतकर्माच ८ शुद्धराजकुलोद्भवः ९ बृद्धानुग १० स्त्रिशक्तिश्च ११ प्रजारागी १२ प्रजागुरुः १३ । २ । समर्थनःपुमर्थानां त्रयाणांसममात्रया १४ कोशवान् १५ सत्यसंधश्च १६ चारदृग् १७ दूरमंत्रदृग् १८ । ३ आसिद्धिक मौद्योगीच १९ प्रवीणःशस्त्र २० शास्त्रयोः २१ निग्रहा २२ नुग्रहपरो २३ तिर्लुचोदुष्टशिष्टयोः २४ । ४ उपायार्जितराजश्री २५ ।५। नित्यंशौंडो २६ ध्रुवंजयी २७ न्यायप्रियो २८ न्यायवेत्ता २९ व्यसनानांव्यपासकः ३० । ६ । अवार्यवीर्यो ३१ गांभीर्यो ६२ दार्ये ३३ चातुर्यभुषितः ३४ प्रमाणावधिकक्रोध ३५ स्तात्विकःसात्विकोनृपः ३६ । ७ इति ३६ राजानां गुणजाणवा उर्द्धमुषएहवा लो०रोमनाजाल घणु सु०सुकमालगि०स्निग्धस्वे हवंत म०मृदुमाषणनीपरिकोमल आवर्त्त प०प्रसस्त वषाणावायोग्य एहवादक्षिणावर्त्त एहवाला०रोमरायकरी वि०निपजायो सि०श्रीवत्स तेणेकरी सहितलइं वि०मोटाहृदयजेहनो देसक्षेत्रनेयोग्यविशिष्ट एहवादे०सरीरनोधरणहार त०कुगतो र०सूर्यतेहनें र०किरणाकरी वो०विकस्वरे व०प्रधान कमलहेमांबुजतेहनो ज विकस्वरगर्भयराग तेहसरीषो सरीरनोवर्णलें ह०घोडानां पोसनगुदप्रदेशतेहज को०गुह्यपणामाटें प्रशस्तप०पूठिनोअंत अपानभा गपूरीषमलनेलेपेकरीं रहितलें जेहनो पद्मउत्पलकुंदजाइजूई व०प्रधानचंपके गा०तेकेसरनुंफुल सा०हिरणनोमदतेकस्तूरी तेहसरीषो शरीर नोउत्तमगंधलइं व०बत्रीस संख्याइं अत्यंत प०प्रशस्त एहवा प०पार्थिवराजाना गु०गुण तेणेंकरी जु०सहितलें अ०अखंडितपणें लक्षजेहनो पा०प्रगट लोकमेविष्यातलें जोगिमातापीतानी वि०निर्मल गि०पोताको कुल रूप ग०आकास तेहनें विषइपूर्ण चंद्रमासरीषो चंद्रमानीपरइं सौम्यताइंकरी ग०आखि अनें मननें गि०आह्लादनोकरणहार अ०भयरहित सा०क्षीरसमुद्रनीपरें निश्चलथिरचित्तेलइं धनदतानीपरइं भोगनाउदयनेंविषें द्रव्यतेव्ययेंसद्रव्यलइं एतलइं जोगने विषइं द्रव्यनोव्ययलें जेहनें स०संग्रामनेंविषें किणहीजीतोनथी प०उत्कृष्टा प्राक्रमना गुणलइ जेहना अ०इंद्रनइं सरीषो रूपलें जेहनउं मनूष्यनो अधिपति भरतनामाचक्रवर्त्ति भरतक्षेत्र प्रते भोगवेपालइ प्रनष्ट माठालें शत्रु जेहथी तिवारपछी तेभरतराजामंडलीकराजपदवी भोगवता एकदासमयनेंविषइ आयुधनी शालानइं विषइं देवसंबंधी चक्ररत्नउपनो। तिवारपछी तेआउधघरनो रखवाला भरतराजाना आयुधनो घरनी शालानइं विषें देवसंबंधी चक्ररत्न उपनुं। देषइं देषीनें

न परानभिभवनीयत्वरूपेण विजयेन परेषामसह्यानामभिभावकत्वरूपेण वर्द्धयति जयविजयाभ्यां त्वंवर्द्धयस्वेत्याशिषं प्रयुंक्ते वर्द्धयित्वा चैवमवादीत् । किंतदित्याह । एवंखलुइत्यादि । इत्यमेव यदुच्यतेमया नयविपर्ययादिना यदन्यथाभवति यद्देवानुप्रियाणांराजपादानां आयुधगृहशालायांदिव्यं चक्ररत्नंसमुत्पन्नं तदेव तत्तथेति प्राग्वत् देवानुप्रियाणांप्रियार्थंतायैप्रीत्यर्थंप्रियमिष्टंनिवेदयामः एतत्प्रियनिवेदनंप्रियंभवतांभवतु ततोभरतः किं चक्रेइत्याह । ततेणमित्यादि । ततः सभरतोराजातस्यायुधगृहिकस्य समीपे एनमर्थंश्रुत्वाआकर्ण्य कर्णाभ्यांनिशम्या वधार्य हृदयेनतुष्टो यावत्सौमनस्थितः प्राग्वत् प्रमोदातिरेकाद्येयेभवाभरतस्य संवृता स्तान् विशेषणद्वारेणाह । विकसितकमलवल्नयनवदने यस्य सतथा प्रचलितानि चक्ररत्नोत्पत्ति

॥ मूल ॥

क्करयणे तेणामेव उवागच्छइ २ त्ता तिक्खुत्तो आयाहिणपयाहिणंकरेइ २ त्ता करयलजावकट्टु चक्करयणस्स पणामं करेइ २ त्ता आउहघरसालाउ पडिणिक्कमई २त्ता जेणामेव बाहिरिआ उवट्ठाणसाला जेणामेव भरहेराया तेणामेव उवागच्छइ २ त्ता करयलजाव जएणंविजएणं वद्धावेइ २ एवंवयासी। एवंखलु देवाणुप्पि

॥ अनु० ॥

सावर्तमस्तकेअञ्जलिं) कृत्वायावत् चक्ररत्नस्य प्रणामं करोति कृत्वा आयुधगृहशालायाः परिनिष्क्रामति, प्रतिनिष्क्रम्यच यत्रैव बाह्योपस्थान शाला यत्रैवचभरतो राजा तत्रैवोपागच्छति,, उपागत्यकरतल (पूर्ववत्) यावत् जयेन विजयेन वर्द्धयति वर्द्धयित्वाचैव मवादीत् । एवं खलु

॥ भाषा ॥

हर्षपाम्यो तु०संतोषपाम्यो चि०चिन्तनें विषइ आणंदहुनं सोम्यतापणोपाम्यो प्रीतकारीमनथयो प०उत्कृष्टा सो०आनंदवंतहुनं हर्षनेंवसेकरी उलासं थयाछें हृदयजेहनो एहावोथको ॥ जिहांतेदिव्यचक्करत्नछें तिहांआवइं आवीनें त्रिणवारजिमणापासाथी प्रदक्षिणाकरें करीनें हाथनोतलायावत् एकठाकरीनइं चक्ररत्ननइं प्रणामकरइं करीनें आउधघरशालाथी बाहिरी नीकलें निकलीने जिहांभरतराजाछें जिहांबेंसवानीशालाछइ बेंसबानासाला तेउवठाणसाला जिहांभरत राजाछइं तिहांआवइं आवीनें हाथजोडीनइं यावत्स्वदेशसंबंधीजयेंकरी परदेशसंबंधी विजयकरीनें वधावानें एहवनुं कहतोथकुं इसनिश्चें

श्रवणजनितसंभ्रमातिरेकात् कंपितानि वरकटकेप्रधानवलयेभ्रुटिकेबाहुरक्षकौ केयूरे बाह्वोरेवभूषणविशेषौ मुकुटंकुंडले च यस्य सतथा सिंहावलोकनन्या येन प्रचलितशब्दोग्राह्यः तेन प्रचलितहारेणविराजद्वृतिदंचवक्षो यस्य सतथा पश्चात् पदद्वयस्यकर्मधारयः प्रलंबमानः संभ्रमादेवप्रालंबोभुंबनकंयस्य सतथा घोलद्दोलायमानं भूषणमुक्तातिरिक्तंधरति यः सतथा ततःपदद्वयस्य कर्मधारयः अत्रपदविपर्यय आर्षत्वात् ससंभ्रमंसादरंत्वरितमानसौत्सुक्यं यथास्यात्तथा चपलंकायौत्सुक्यं यथास्या त्तथा नरेंद्रो भरतः सिंहासनाद्भ्युत्तिष्ठति । अभ्युत्थायच पादपीठात् पदासनात् प्रत्यवरोहति अवतरति, प्रत्यव रुह्य यावतीर्यपादुके पादत्राणे वमुंचति भक्त्यतिशयात् अवमुच्यच एकःशाटकोयत्र सतथा तद्वितलक्षण इकप्रत्ययः अखंडशाटकमयइत्यर्थः एतादृशमुत्त रासंगोवक्षसि तिर्यग्विस्तारितवस्त्रविशेष स्तंकरोति (सविशेषणेविधिनिषेधौविशेषणमुपसंक्रामतः) कृत्वाच अंजलिनामुकुलितौकुड्मलाकारीकृतावग्रह

आणं आउहघरसालाए दिव्वेचक्करयणे समुप्पन्ने ॥ तएणं अहंदेवाणुप्पियाणं पिअट्ठयाए पिअं णिवेएमो पि अंभवउ । तएणं सेभरहेराया तस्स आउहघरिअस्स अंतिए एअमठं सोच्चा णिसम्म हट्ठे जावसोमणसिए विअसिअवरकमलणयणवयणे पयलिअवरकडगतुडिअकेऊरमउडकुंडलहारविरायंतरइअवच्छे पालंबपलं

देवानुप्रियानां आयुधगृहशालायां दिव्यं चक्ररत्नं समुत्पन्नम् । तदेव देवानुप्रियानां प्रियार्थतायै प्रियं निवेदयामः, प्रियं भवतां भवतु ॥ ततः सभरतोराजातस्य आयुधगृहिकस्य अन्तिकेएनमर्थं श्रुत्वा, निशम्यहृष्टोयावत् सौमनस्यितः । विकसितवरकमलनयनवदनः प्रचलितवरकटकत्रु

देवानुं प्रिअनी तुम्हारी आयुधघरशालानेंविषें देवसंबंधीचक्ररत्न उपनुंछें । तिवारइं हुं देवानुंप्रिय तुमनइं प्रीतिनइं अर्थइं प्रीतकारी ! वचन कहुंछु । प्रीतकारी तुमनइ थाउं एवचन । तिवारेते भरतनामइ राजा तेआयुध घरनें पासेंथी एहवोअर्थ साभलीनें हीयामा धारीनें हर्षपाम्यो यावत् मनमा आणंदपाम्यो विकस्वरथयुंएहवो व०प्रधानकमल तेहनीपरइं ग०आपि अनेंवदनमुष जेहनो हर्षइंकरी प०प्रचलतथयाछें व०प्रधान क०तेबलयावीर बलय

॥ टीका ॥

स्तौ हस्ताग्रजानौ येनसतथा चक्ररत्नाभिमुखः सप्तवाअष्टौवा पदानि अनुपसर्गस्य सन्निधिवाचकत्वादनुगच्छति आसन्नोभवति । दृष्टश्चानुशब्दप्रयोगः, सन्निधौयथा अनुनदिशुश्रुविरेचिरुरुतानिइति । पदानां संख्याविकल्पदर्शन मेतादृशभाषाव्यवहारस्य लोकेदृश्यमानत्वात्, अनुगत्यच वामंजानुं आकुंचयति ऊर्ध्वंकरोतीत्यर्थः । दक्षिणंजानुं धरणीतले निहृत्य निवेश्य करतलेत्यादि विशेषणजातं प्राग्वत् । अंजलिंकृत्वा चक्ररत्नस्य प्रणामंकरोति कृत्वा च तथायुधगृहिकस्य यथामालितं यथाधारितं यथापरिहित मित्यर्थः । इदंच विशेषणंदानरसातिशयाद्दानंनिर्विलंबेनदेयमिति ख्यापनार्थं । यदाह । सव्यपाणिगतमप्यपसव्यप्रापणावधिनदेयविलंबः ॥ नध्रुवत्वनियमःकिललक्ष्म्या स्तद्विलंबनविधौनविवेकः १ अविलंबितदानगुणात् समुज्वलंमानवोयशो लभते ॥ प्रथमं प्रकाशदानाद्विशदः पश्चोऽपरःकृष्णः २ अवमुच्यते परिधीयते यस्सोऽवमोचक आभरणं मुकुटवर्जं मुकुटमंतरेणेत्यर्थः । अत्रउतोमुकुला दित्युकारस्याकारः, तस्य राजचिन्हालंकारत्वेनादेयत्वा ऋकार्प्यंण्यादिना नददातीति । एतेनान्यमनुष्याणां मौलिवेष्टनस्य राजचिह्नत्वमभ्युपगच्छंतो

॥ मूल ॥

बमाणघोलंतनूसणधरे ससंभ्रमं तुरिअं चवलं णरिंदे सीहासणाउ अब्भूठेइ २त्ता पायपीढाउ पच्चोरुहइ २ त्ता पाउआउ उमुअइ २ त्ता एगसाडिअं उत्तरासंगं करेइ २ त्ता अंजलिमउलिअग्गहत्थे चक्करयणाभि मुहे सत्तठपयाइं अणुगच्छइ २ त्ता वामंजाणुं अंचेइ २ त्ता दाहिणंजाणुंधरणितलंसि णिहट्टु करयल

॥ अनु० ॥

टिककंयूरमुकुटकुण्डलहारविराजद्वृतिदवक्षाः प्रालम्बप्रलम्बमानघोलन्तभूषणधरस्ससंभ्रमं त्वरितं चपलं नरेन्द्रः सिंहासनादभ्युत्तिष्ठति । अभ्युत्थाय पादपीठात् प्रत्यवरोहति प्रत्यवरुह्य पादुकेवमुञ्चति, अवमुच्य एकशाटिक मुत्तरासङ्गं करोति, कृत्वा अञ्जलिमुकुलिताग्रहस्तः चक्ररत्नाभि-

॥ भाषा ॥

प्रमुषत०बहिरिया केऊरना मैं वाहनाआभरण मुकटमाथानां कुंडलकाननां हारइंकरी विराजितछेर०सुषदाई चक्षु हीयो जेहनो प्रालंबडुमणुं प्रलंबायमांन हालता एहवा भूषणनो धरणहार ससंभ्रमपणें तु०उतावलो चपल शीघ्रथको, नरमनुष्यनो इंद्र सिंहासनथी उठइ ऊंठीनइं पादपीठ थाजोठोथी हेठो

येकेचनजिमगृहाद्यभिगमविधौमौलिवेष्टनमपाकुर्वंति तेऽशुभदर्शनत्वादपशकुनमितीवाभ्युपगच्छता आगमोक्तविध्यनुष्ठानजन्यफलेन दूरतोमुक्ताइति बोध्यं । दत्वाचान्यत् किंकरोती त्याह । विपुलंजीवितार्हंमाजीविकायोग्यं प्रीतिदानं ददातिसत्कारयति वस्त्रादिना संमानयति, वचनबहुमानेन सत्कृत्य सन्मान्यच प्रतिविसर्ज्जयति स्वस्थानगमनतो ज्ञापयति, प्रतिविसर्ज्यच सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः उपविष्टइति । अथभरतोयत् कृतवान् तदाह । तएणमित्यादि । निगदसिद्धं, किमवादीदित्याह । खिप्पामेवत्ति । क्षिप्रमेव भोदेवानुप्रिया! विनीतां राजधानीं सहाभ्यन्तरेण नगर मध्यभागेन बाहिरिकानगरबहिर्भागो यत्र तत्तथा क्रियाविशेषणं । आसिक्ता ईषत्सिक्ता गन्धोदकच्छटकदानात संमार्जिता कचवरशोधनात् सिक्ता जले

॥ टीका ॥

जावञ्जलिंकट्टु चक्करयणस्स पणामं करेइ २ त्ता तस्स आउहघरिअस्स जहामालिअंमउअवज्जंउमाअं द लइ २ त्ता विउलजीविअारिहपीइदाणं दलइ २ त्ता सक्कारेइ सम्माणेइ २ त्ता पडिविसज्जेइ २ त्ता सी हासणवरगए पुरत्थाभिमुहे सन्निसन्ने ॥ तएणंसेभरहेराया कोडुंबिअपुरिसे सद्दावेइ २ त्ता एवंवयासी । खिप्पा

॥ मूल ॥

मुखः सप्ताष्टपदानि । अनुगच्छति. अनुगत्यवामं जानुं आकुञ्चयति । आकुञ्च्यदक्षिणं जानुं धरणितलंनिर्हृत्य करतल (परिगृहीतदशनखंशिरसावर्तं मस्तके अञ्जलिंकृत्वेत्यादि) यावत् अञ्जलिंकृत्वा चक्करत्नस्य प्रणामं करोति, कृत्वा तस्य आयुधगृहिकस्य यथामालितं मुकुटवर्ज्जं

॥ अनु० ॥

पःकत्तरें उत्तरीनें पादुकानोजोडी उतारइं पगथी उतारीनें एकपनानुं अषंड एहवो वस्त्र बंधइं नाषइं उत्तरासंगकरे करीनइ अंजेहाथएकठाकरइ कमलनाडोहानीपरि हाथ एकठाकरीनइं चक्करत्नसाहमनु सात आठ पगसाहमो जाइं जाईनइ डावो ढीचण अंजंचोकरे करीनें जीमणो ढीचण धरती नेंबिषें थापीनें हाथजोडीनें यावत् अंजलीकरीनें चक्करत्ननइं । प्रणामकरइं करीनें तेआउध घरिकपुरुषनें यथापहिस्यो होइं तेहवो मुकटवर्जीनें उमोद हर्षदानदीइं देईनें विःघणों जी०आजीविकायोग्य पी०प्रीतदान द०दीइं देइनें सत्कारकरें वस्त्रादिकें सन्मानें वचनेंकरी करीनइ पःस्वस्थानकइं जावा

॥ भाषा ॥

ना ऽतएव शुचिका संमृष्टा विषमभूमिभंजना दृष्यारा जमार्गोऽन्तरवीथीच अवांतरमार्गो यस्यांसातथा, इदंचविशेषणं योजनाया विचित्रत्वात् संमृष्ट संमार्जितसिक्तासिक्तशुचिकरथ्यान्तरवीथिकमित्येवं दृश्यं, संमृष्टाद्यनन्तरभावित्वा च्छुचिकत्वस्य मंचामालकाः प्रेक्षणकद्रष्टृजनोपवेशननिमित्तं अतिमंचा स्तेषा मप्युपरिये तैः कलितानां नानाविधो रागो रंजनं येषु तानि कौसुंभमांजिष्ठादिरूपाणि वसनानि वस्त्राणि येषु तादृशा ये ऊर्ध्वीकृता उच्छ्रि ताध्वजाः सिंहगरुडादिरूपकोपलक्षितावृहत्पटरूपाः पताकाश्चा तितरूपा अतिपताकास्तदुपरिवर्त्तिन्य स्ताभिर्मंडितां । अत्रच लाउल्लोइअइत्या

मेव भो देवाणुप्पिया विणीयं रायहाणिं सब्भिंतर बाहिरियं आसित्तसंमज्जिओसित्तसुइगरत्थंतरवी हियं मंचाइमंचकलियं णाणाविहरागवसणऊसियजयपडागाइपडागमंडियं लाउल्लोइयमहियं गोसीसस रसरत्तचंदणदद्दरदिन्नपंचंगुलितलं उवचियचंदणकलसं चंदणघडसुकय जाव गंधट्टुआभिरामं सुगंधवर

मवमोचकं (आभरणं) ददाति । दत्वाविपुलं जीविकार्हं प्रीतिदानं ददाति, दत्वा सत्कारयति, संमानयति,, सत्कृत्य संमान्य प्रतिविसर्ज्जयति, प्रतिविसर्ज्य सिंहासनवरगतः पूर्वाभिमुखं संनिषण्णः । ततः सभरतो राजा कौटुम्बिकपुरुषं शब्दापयति । शब्दायित्वाएवमवादीत् । क्षिप्रमेव भोदेवानुप्रिया ! विनीतां राजधानीं साभ्यन्तरबाहिरिकां आसिक्तसंमार्जितसिक्तशुचिकरथ्यान्तर्वीथिकां मंचातिमंचकलितां नानाविधरागवसनो

नीआज्ञादिइं देइनइ सिंहासननेविषें ब०जाईनें पुर्वदिसिं साहमो बइसइं । तिवारपछी तेऋरतनामें राजा चाकरपुरुषनें तेऋावइ तेऋाबीनें एहवोकहइं क्षिप्रउतावलो हो देवानुप्रिय ! विनीतानामें राजधानीप्रतें मांहि बाहिरथोपषेर आ०गंधोदकादिके लगारेकछाटो स०कचराप्रमुषनें काढनेकरी सिक्त जलेंकरी सु०शुचि पवित्र एहवो र०रथ्यंतरराजमार्ग वी०एकंतरमार्गछें जिहां एहवी मं०मांचा योबानामाला मं०उपरिमालाइंकरी अनेकप्रकारनां रा०रं गना व०वस्त्रतेहनो उ०ऊचीकीधी ध्व०मोटीध्वजा प०पताका जेहनी तेध्वजा ऽतिप०तेध्व,जामा,थेंध्वजाइ तेणेकरीसहित लिंपवें गोपवेंकरी म०पूजित

दिको गन्धवट्टिभूअमित्यंतो विनीतासमारचनवर्णकः प्रागाज्ञियोग्यदेवच्छंदवर्णके व्याख्यातइति मव्याख्यायते, ईदृशविशेषणविशिष्टां कुरुत स्वयं कारयत परैः कृत्वाकारयित्वाच एतामाज्ञप्तिमाज्ञां प्रत्यर्प्पयत । ततस्ते किंकुर्वंती त्याह । तएणमित्यादि । ततो भरताज्ञानन्तरं कौटुंबिकाअधिकारिणःपुरुषाः भरतेन राज्ञा एवमुक्ताः सन्तो हृष्टाः करतलेत्यारभ्य यावत्पदग्राह्यं पूर्ववत् । एवंस्वामिन् यथायुष्मत्पादाआदिशंति तथेत्यर्थः । इति कृत्वा इतिप्रतिवचनेनेत्यर्थः आज्ञायाः स्वामिशासनस्योक्तलक्षणेन नियमेन । अत्रच आणाएविणएणमिति एकदेशग्रहणेन पूर्णोभ्युपगमालापको ग्रा-

॥ टीका ॥

गंधिअं गंधवट्टिभूअं करेह कारवेह करेत्ता कारवित्ताय एअमाणत्तिअं पच्चप्पिणह तएणं । तेकोडुंबिअ पुरिसा भरहेणं रण्णा एवंवुत्तासमाणा हट्ठा करयल जावकट्टु एवंसामिति आणाए विणएणं वयणं पडिसुणंति २ त्ता भरहस्स अंतिआओ पडिणिक्कमंति २ त्ता विणिअं रायहाणिंजाव करित्ता कारवेत्ताय तमाण

॥ मूल ॥

ष्क्रितध्वजपताकातिपताकांमंडितां लाइयउल्लोइयमहितां गोशीर्षसरसरक्तचन्दनदर्दरदपञ्चाङ्गुलितलां उपचितचन्दनकलशां चन्दनघटसुकृत (तोरणप्रविरलद्वारदेशभागां) यावत् गंधद्रुवाभिरामां सुगन्धवरगन्धिकां गन्धवर्तिभूतां कुरुत, कारयत,, कृत्वाकारयित्वाच एतामाज्ञप्तिं प्रत्यर्पयत ॥ ततस्तेकौटुम्बिकपुरुषाभरतेनराज्ञा एवमुक्ताः हृष्टाः करतल० यावत् कृत्वाएवंस्वामिन् (यथायुष्मत्पादा आदिशंति तथा) आज्ञायाविनयेनवचनं प्रतिश

॥ अनु० ॥

गोशीर्षनामेंचदन स०रससहितएहवु र०रक्तचंदन दर्दरनामइ तेणेंकरी दि०दीधाछें पंचागुलितलहाथजिहां एहवीउ०ज्ञस्याछें चंदननांकलसजिहा चंदननें घटेंकरी सोभायमानछइं बारणाघरना जावत् सुंगधवस्तुनें धूपकरी आज्ञिरामछइं सुगंध प्रधान गंधेकरीसहीत गंधनी बाटिसरीषीसुगंधएहवीमगरी करो तुम्हे पोते करावो अनेरायासें करावीनइं एमाहारीआज्ञा पाछीसोपो । तिवारइं तेआज्ञाकारीपुरुष भरतराजाइं एहवो कह्येथकइं हर्षवंतथया हाथजोडी यावत् माथे अंजलीकरीनइ इस्वामी ! जिमतुम्हे कहोछे तिमकरसु एहवी आज्ञाविनइं करीनइं वचन प०साभले साभलीनें भरतराजाना अं०पासाथी

॥ भाषा ॥

ह्यः । अंशेनांशीगृह्यतेइति । वयणंपडिसुणंतित्ति । वचनं प्रतिशृण्वंति अङ्गीकुर्वंतीति । ततस्तेकिंकुर्वंतीत्याह । पडिसुणित्ता इत्यादि । प्रतिश्रुत्यतस्यां तिकात् प्रतिनिष्क्रामन्ति प्रतिनिष्क्रम्यच विनीतांराजधानींयावत्पदेनानन्तरोक्तसकलविशेषणविशिष्टां कृत्वा कारयित्वाच तामाज्ञप्तिं भरतस्यप्रत्यर्पयंति । अथ भरतःकिंचक्रे इत्याह । तएणंसेभरहेइत्यादि । ततः सभरतोराजा यत्रैव मज्जनघरं तत्रैवोपागच्छति । उपागत्यच मज्जनगृहं अनुप्रविशति । अनुप्रविश्यच समुक्तेन मुक्ताफलयुतेन जालेन गवाक्षेणाकुलोव्याप्तोऽभिरामश्च यस्तस्मिन् विचित्रमणिरत्नमयं कुट्टिमतलंबद्धभूमिकायत्र सतथा तस्मिन् अतएवसमभूमिकत्वात् रमणीयेस्नानमंडपे नानाप्रकाराणां मणीनां रत्नानांच भक्तयो यथौचित्येन रचनास्तासु विचित्रे स्नानपीठेस्नानयोग्ये आसने सुखेन निषण्ण उपविष्टस्सन् शुभोदकै स्तीर्थोदकैः सुखोदकैर्वा नात्युष्णै र्नातिशीतैरित्यर्थः, गन्धोदकै श्चन्दनादिरसमिश्रैः पुष्पोदकैः कुसुमवा

॥ टीका ॥

त्तिअं पच्चप्पिणंति। तएणं से भरहेराया जेणेव मज्जणघरे तेणेव उवागच्छइ २ त्ता मज्जणघरं अणुप्पविसइ २ त्ता समुत्ताजालाकुलाभिरामे विचित्तमणिरयणकुट्टिमतले रमणिज्जे ण्हाणमंडवंसि णाणामणिरयणभत्ति चित्तंसि ण्हाणपीढंसि सुहणिसण्णे सुहोदएहिं गंधोदएहिं पुप्फोदएहिं सुद्धोदएहिंअ पुणो २ कल्लाणगपवर

॥ मूल ॥

ण्वन्ति । प्रतिश्रुत्यभरतस्यान्तिकात् प्रतिनिष्क्रामन्ति ॥ प्रतिनिष्क्रम्य विनीतां राजधानीं यावत् कृत्वा कारयित्वाचतामाज्ञां प्रत्यर्पयन्ति ततः स भरतोराजा यत्रैवमज्जन गृहं, तत्रैवोपागच्छति । उपागत्यमज्जनगृहमनुप्रविशति, अनुप्रविश्य समुक्ताजालाभिरामे विचित्रमणिरत्नकुट्टिमतलेरमणीय

॥ अनु० ॥

प०नीकलइं नीकलीनें विनीतानांमइं राजधानीप्रतें यावत्राजाइं कहयुं तिमकरीनें अनेरापासेकराबीनें तेआज्ञा पाछी सोपइं तिवारेपछी तेभरतराजा जिहां स्नान मज्जनकरवानुंघरछइ तिहां आवइ आवीनइं मज्जनकरवा घरमाहिपइसइ पईसीनें मुक्ताफलेंकरीसहित एहवें जालिएकरी आकुल व्याप्त तेणेंकरी अभिराम विचित्रप्रकारनां मणिरत्नेंकरी बांध्युछें धरतीनो तलो जिहा र०मनोहरएहवा स्नानकरवानां मंडपनेविषइ अनेकप्रकारनां मणिरत्न

॥ भाषा ॥

सितैः शुद्धोदकैश्च स्वाभाविकैस्तीर्थान्यजलाशयैरित्यर्थः । मज्जिएत्ति । उत्तरसूत्रस्थपदेनसहसंबन्धः । एतेन कांतिजननश्रमजननादिगुणार्थं मज्जनमुक्तं । अथारिष्टविघातार्थमाह । पुनःकल्याणकारिप्रवरमज्जनस्याविरुद्धग्रहपीडानिवृत्त्यर्थकविहितौषध्यादिस्नानस्य विधिना दुमज्जोशुद्धौ इत्यस्य शुध्यर्थकत्वेन स्नानार्थकत्वा न्मज्जितः स्नपितोऽतः पुरवृद्धाभिरितिगम्यं । कैर्मज्जितइत्याह । तत्र स्नानावसरेकौतुकानां रक्षादीनां शतैर्यद्वाकौतूहलिकजनैः स्वमेवासम्यक्प्रयोगार्थं दर्श्यमानैः कौतुकशतैर्भांडचेष्टादिकुतूहलै र्बहुविधै रनेकप्रकारैः । अत्रकरणेतृतीयेति । अथस्नातोत्तरविधिमाह । क

॥ टीका ॥

मज्जणविहिए मज्जिए तत्थ कोउअसएहिं बहुविहेहिं कल्लाणगपवरमज्जणावसाणे पम्हलसुकुमालगंधकासाइअलूहिअंगे सरससुरहिगोसीसचंदणाणुलित्तगत्ते अहयसुमहग्घदूसरयणसुसंवुडे सुइमालावण्णगविलेवणे आविद्धमणिसुवण्णे कप्पिअहारद्धहारतिसरयपालंबलंबपमाणे कडिसुत्त सुकयसोहे पिणद्धगे विज्जोग अंगु

॥ मूल ॥

स्नानमण्डपेनानामणिरत्नभक्तिचित्रस्नानपीठेशुभान्निसंषण्णः शुभोदकैर्गन्धोदकैः पुष्पोदकैः शुद्धोदकैश्चपुनः कल्याणकप्रवरमज्जनविधिनामज्जितः तत्र कौतुकशतैः बहुविधैरिति, कल्याणकप्रवरमज्जनावसाने पद्मलसुकुमालगन्धकषायोषित लूषिताङ्गः सरससुरभिगोशीर्षचन्दनानुलिप्तगात्रः अहतसु

॥ अनु० ॥

करी भातिकरी चित्र्यो एहवो णा०स्नानकरवाना पीठनेविषें सुषइंकरी वेंसेंशुभोदिक तीर्थप्रमुषनां पाणी सुगंधमिश्रितपाणी इंकरी फुलवासी पांणी इंकरी शुद्धपाणीइंकरी बारंबार कल्याणकारी प्रवरउत्तम स्नान मज्जन विधेंकरीनें मज्जनकरइ त०तिहां कौतूहलना सोगमेकरी बहुविधअनेकप्रकारें करी कल्याणकारी परधान मज्जननेंछेहडइं प०रोमसहित सु०अत्यंतसुकुत्माल सुगंधवंत० एहवा लगरे करावो वस्त्र लेणेकरी लूहयूअंग सरीररसर सहित सुगंधएहवो गोशीर्षनामें चंदनकरी गात्रसरीर लेपइं अ०मुषादिके अणकरयुं अषंडएहवो दूष्यवस्त्रसारगसरीषोवस्त्रपहिर पवित्र मालाफुलप्रमुषनी ब०कुंकुमप्रमुष वि०विलेपनकरइं आ०पहिरइं मणिसुवर्णादिकें कल्पितयथास्थानइ पहिरइं अ०अद्धाहारसरिनो अर्द्धहारते नवसरिनो

॥ भाषा ॥

॥ टीका ॥

ह्लाणगइत्यादि । कल्पके प्रवरमज्जनावसाने स्नानानन्तरमित्यर्थः । पक्ष्मलया पक्ष्मवत्या अतएव सुकुमालया गन्धप्रधानया कषायेण पीतरक्तवर्णोत्पादकरंजनीयवस्तुना रक्ता कस्षायिकी तया कषायरक्तया शाटिकयेत्यर्थः रूढितं निर्लेपनामापादितं अंगं यस्य सतथा सरससुरभिगोशीर्षचन्दनानुलिप्तगात्रः अहतं मलमूषिकादिभिरनुपद्रुतं प्रत्यग्रमित्यर्थः सुमहार्घं बहुमूल्यं यद्दूष्यरत्नं प्रधानवस्त्रं तत्सुसंवृतं सुष्ठुपरिहितं येन सतथा अनेनादौ वस्त्रालंकारउक्तः अत्रचवस्त्रसूत्रंपूर्वं योजनीयं । चंदनसूत्रंपश्चात् । क्रमप्राधान्याद्व्याख्यानस्य नहिस्नातोत्थितएव चंदनेन वपुर्विलिंपतीति विधिक्रमः शुचिनीपवित्रे मालावर्सकविलेपने पुष्पस्रग्मंडनकारिकुंकुमादिविलेपने यस्य सतथा । अनेन पुष्पालंकारमाह । अधस्तनसूत्रे वपुःसौगन्ध्यार्थमेवाविलेपनमभिहितं अत्रतु वपुर्मंडनायेति विशेषः आविद्धानि परिहितानि मणिसुवर्णानि येन सतथा एतेना स्यरजतरीतीमयाद्यलंकारानिषेधः सूचितः मणिस्वर्णालंकारानेव विशेषत आह । कल्पितो यथास्थानं विन्यस्तो हारो ऽष्टादशसरिको ऽर्द्धहारो नवसरिकः त्रिसरिकंच प्रतीतं येन सतथा प्रलंबमानः प्रालंबो हुंबनकं यस्य सतथा सूत्रेच पदव्यत्ययः प्राकृतत्वात् कटिसूत्रेण कट्याभरणेन सुष्ठुकृता शोभा यस्य सतथा अत्रपदत्रयंस्यकर्मधारयः । अथवा क

॥ मूल ॥

लिज्जुगललिञ्चुकयाभरणे णाणामणि कणगतुडिञ्चुथंभिञ्चभूए अहिञ्चसस्सिरीए कुंडलउज्जोइआणण मउडदित्तसिरए हारोत्थयसुकयरइञ्चवच्छे पालंबपलंबमाणे सुकयपडउत्तरिज्जे मुद्दिञ्चापिंगलंगुलीए णाणामणिकणगवि

॥ अनु० ॥

महार्घदूष्यरत्नसुसंवृतः शुचिमालावर्णकविलेपनश्च आविद्धमणि सुवर्णःकल्पितहारार्द्धहारत्रिसरिकप्रालम्बप्रलम्बमानकटिसूत्रसुकृतशोभःपिनद्धग्रैवेयकाङ्गुलीयकललिताङ्गकललिताङ्गाभरणः । नानामणिकटकत्रुटितस्तम्भितभुजो अधिकसश्रीकः कुण्डलोद्द्योतिताननो मुकुटदीप्तशिरस्को हारावस्त

॥ भाषा ॥

ति०त्रिसरीकनामइं भूषन प्रलंबायमान मोटाझूमणो तेणेंकरी क०कडिदोरेंकरी सुभलीकरीसोभाजेणइ पहस्याळें गे०कंठनाआभरणजेणइ आंगुलीनां आभर्ण ललित मनोहर पहिस्याळें आभरणजेणइ नानाप्रकारनामणिमयएहवां कटक त्रूटिकनामइं हस्ताभरणइं करीयभिळें भूजा अत्यन्त सोभावंतळें हारेंकरीने ढांक्याळें अत्यन्त शोभावंत हृदयजेणइं । लंबायमांनलांबो भलूरयुं एहवो वस्त्रळें जेहने मुद्रिकाइंकरी पीलीळें आंगुली जेणइ अनेक प्र-

॥ टीका ॥

लिप्तहारादिभिः सुकृता शोभा यस्य सतथा पिनद्धानि बद्धानि ग्रैवेयकादीनि कंठोभरणानि अंगुलीयकानि अंगुल्याभरणानि येन सतथा । अनेनाभरणा लंकार उक्तः तथा ललितेसुकुमालेंऽगके मूर्द्धादौललितानि शोभावंति कथानां केशानां आभरणानि पुष्पादीनि यस्य सतथा । अनेन केशालंकार उक्तः । अथसिंहावलोकनन्यायेन पुनरप्याभरणालंकारवर्णाय माह । नानामणीनां कटकत्रुटिकै र्हस्तबाह्वाभरणविशेषै र्बहुत्वात् स्तंभिता विवस्तंभितौ भुजौ यस्य सतथा अधिकसश्रीकइति स्पष्टं । कुंडलाभ्या मुद्द्योतितं आननं मुखं यस्य सतथा मुकुटदीप्तशिरस्कः स्पष्टं हारेणावस्तृतमाच्छादितं तेनै वहेतुना प्रेक्षकजनानां सुकृतरतिकं वक्षो यस्य सतथा प्रलंबेन दीर्घेण प्रलंबमानेन दोलायमानेन सुकृतेन सुष्टु निर्मितेन पटेन वस्त्रेण उत्तरीयं उत्त

॥ मूल ॥

मलमहरिहणिउणोचिअ मिसिमिसंतविरईअ सुसिलिठ विसिठ लठ सठिअ पसत्थ आविद्धवीरवलये किंबहुणा कप्परुक्खए विव अलंकिअ विभूसिए णरिंदे सकोरंट जाव चउचामरवालवीइ अंगे मंगलजयजयसद्द कयालोए अणेगगणनायगे दंडनायगेजावदूअसंधिवालसठि संपरिवुडे धवलमहामेहणिग्गए इवजाव

॥ अनु० ॥

तसुकृतरतिदवक्षाः प्रालम्बप्रलम्बमानः सुकृतपटोत्तरीयोमुद्रिकापिङ्गलाङ्गुलिकोनानामणिकनकविमलमहार्हनिपुण (नेबियत्ति) परिकर्मित (मिसिमिसंतत्ति) दीप्यमानविरचितसुश्लिष्टविशिष्टलष्टसंस्थितप्रशस्ताविद्धवीरबलयः किंबहुना कल्पवृक्षइव अलङ्कृतविभूषितोनरेन्द्रः सकोरण्ट (माल्य

॥ भाषा ॥

कारना मणि सुवर्णकरी निर्मल मोटानें पहरिबायोग्य निपुणकारीगर निपजाव्यो देदीपतो कर्यो संधेसधिमेला मनोहर संस्थानें रच्यु एहवो भलो पहर्योछइं वीरबला जेणइं रयुंघणो बषाणइं कल्पवृषनो परि अलंकृत भूषणेकरी पुष्पादिक करी मनुष्यनो इन्द्र फूलकीमाला सहित यावत् छत्रध रावतो थको च्यार चामरइं करी वीजानुंछइं सरीर जेहनों मङ्गलीकना जय २ एहवा शब्दइं करी कीधोछे आलोकदर्शन जेहनो घणां समुदायना दंडना नायक कोटवाल प्रमुष यावत् दूत कासीद राजनी संधिनां रक्षक ते साथइं परिवर्यो थको शरत्कालनो धोलो महामेघ तेहमांहिथी नीक

रासंगी यस्य सतथा प्राकृतत्वात् पूर्वपदस्य दीर्घत्वं मुद्रिकाभिः साक्षरांगुलीयकैः पिंगला अंगुल्यो यस्य सतथा बहुव्रीहिलक्षणः कःप्रत्ययः नानामणिमयं विमलं महार्थैबहुमूल्यं निपुणेन शिल्पिना उज्ज्वलश्लक्ष्ण परिकर्मितं मिसिमिसेंतत्ति दीप्यमानं विरचितं निर्मितं सुश्लिष्टं सुसंधिविशिष्ट मन्ये ग्रोविशेषवत् लक्ष्यं मनोहरं संस्थितं संस्थानं यस्य तत् पश्चात् पूर्वपदैः कर्मधारयः एवंविधं प्रशास्तं आविद्धं परिहितं वीरवलयं येन सतथा अन्योपि यःकश्चि द्वीरव्रतधारी तदासौमांविजित्य मोचयत्वेतद्वलयमिति स्पर्द्धयन् परिदधाति तद्वीरवलयमित्युच्यते किंबहुना वर्णितेनेति शेषः । कप्य रुक्खएचेवत्ति । अत्र चेवशब्दइवार्थे तेन कल्पवृक्षकइवालंकृतो विभूषितश्च तत्रालंकृतोदलादिभि र्विभूषितः फलपुष्पादिभिः कल्पवृक्षे राजातुमुकुटादिभिरलंकृतो विभूषितस्तुवस्त्रादिभिरिति । नरेंद्रः सकोरंटजावत्ति । अत्र यावत्करणात् सकोरंटमल्लदामेणं छत्तेणं धरिज्जमाणेणमिति ग्राह्यं । तत्र सकोरंटानि कोरंटाभिधानकुसुमस्तबकवंति कोरंटपुष्पाणिहि पीतवर्णानि मालांते शोभार्थंदीयंते मालायैहितानि माल्यानि पुष्पाणीत्यर्थः, तेषां दामानि माला यत्र तत्तथा एवंविधेन छत्रेण ध्रियमाणेन शिरसिविराजमानइति गम्यं चतुर्णामग्रतः पृष्टतः पार्श्वयोश्च वीज्यमानत्वा च्चतुःसंख्यकानां चामराणां वालैर्वीजित मङ्गल्यस्येति मङ्गलभूतो जयशब्दोजनेन कृत आलोके दर्शने यस्य सतथा अनेके गणनायका मल्लादिगणमुख्या दंडनायका स्तंत्र

ससिव्व पियदंसणे णरवई धूवपुप्फगंधमल्लहत्थगे मज्जणघराउ पडिणिक्खमइ २ त्ता जेणेव ज्झाउहघरसाला जेणेव चक्करयणे तेणामेव पहारेत्थगमणाए ॥ तएणं तस्स भरहस्स रण्णो बहवे ईसरपभिई ज्झप्पेगईज्झा

दास्नालछत्रेणध्रियमाणेन शिरसिविराजमानः) यावत् चतुर्भ्यामरबालवीजिताङ्गः मङ्गलजयशब्दकृतालोकः अनेकगणनायकदंडनायकः यावत् दूतसंधिपालैः सार्द्धं संपरिवृतः धवलमहामेघनिर्गत इव यावत् शशीव प्रियदर्शनोनरपतिः धूपपुष्पगन्धमाल्यहस्तगतः मज्जनगृहात् प्रतिनिष्क्रामति, प्रति

लतो यहवो यावत् चन्द्रमानी परें प्रीतिकारी छें दर्शनजेहनुं नरपति राजा फूल गन्धवास पुडी फूलमाला प्रमुष हाथनें विषइं छे यहवोयको मज्जण घरमांहिथी नीकलेनीकलीनइं जिहां आउध घरसालाछें जिहां चक्करत्नछें तिहां प्रवर्त्तइं पधारें जावानेकाजइं । तिवारपछी ते भरत राजानां

पालाः यावत्पदात् ईसरतलवरमाडंबिअकोडंबिअमंतिमहामंति गणगदोवारिअ अमच्चचेडपीठमद्दणगरणिगमसेट्ठसेणावइ सत्थवाह इति द्रष्टव्यं । अत्रव्याख्या ॥ तत्र राजानो मांडलिकाः ईश्वरा युवराजानो मतांतरेण अणिमाद्यैश्वर्ययुक्ताः तलवराः परितुष्टनृपप्रदत्तपट्टबंधविभूषितारा जस्थानीयाः मांडंबिकाश्छिन्नकुटंपाधिपाः कौटुंबिकाःकतिपयकुटंबप्रभवोऽथगलकाः मंत्रिणःप्रतीताः महामंत्रिणो मंत्रिमंडलप्रधानाःगणकागणितज्ञा भांडागारिका वा दौवारिकाः प्रतीहाराः अमात्याराज्याधिष्ठायकाः चेटाःपादमूलिका दासावा पीठमर्दा आस्थानेआसन्नासन्नसेवकाः वयस्या इत्यर्थः, वैश्याचार्या वा नगरंतरव्यात्तद्व्यपदेशेन नगरनिवासिप्रकृतयः निगमाः कारणिका वणिजोवा श्रेष्ठिनः श्रीदेवताध्यासितसौवर्णपट्टविभूषितोन्नमांगाः अथवा नगरा णां निगमानांच वणिग्वासानां श्रेष्ठिनो महत्तराः सेनापतय चतुरङ्गसैन्यनायकाः सार्थवाहाः सार्थनायकाः दूता अन्येषां राज्यंगत्वा राजादेशनिवेद काः संधिपाला राज्यसंधिरक्षकाः एषां द्वन्द्वस्ततस्तैः अत्र तृतीयाबहुवचनलोपो द्रष्टव्यः साद्धं सह सकेवलंतत्सहितत्वमेवापितु तैःसमितिसमंतात्प रिवृतः परिकरितइति । नरपतिर्मज्जनगृहात् प्रतिनिष्क्रामतीति सम्बन्धः ॥ किंभूतः प्रियदर्शनः कइव धवलमहामेघः शरन्मेघ स्तस्मान्निर्गतइव अत्र यावत्पदात् गहगणदिप्यन्तरिरक्कं तारागणाणंमज्झेइति संग्रहः, तेन शशिपदाग्रस्यइवशष्टो ग्रहगणेतिविशेषणेन योज्यः ततो ऽयमर्थः संपन्न उपमानिर्वा

॥ टीका ॥

पउमहत्थगया, अप्पेगइआ उप्पलहत्थगया, जाव अप्पेगइआ सयसहस्सपत्तहत्थगया भरहं रायाणं पिट्ठओ २ अणुगच्छंति ॥ तएणं भरहस्स रण्णो बहुईओ खुज्जा चिलाइ वामणि वडभीओ बब्बरी वउसिआओ ॥ जोणिअ पल्ल

॥ मूल ॥

निष्क्रम्य यत्रैव आयुधगृहशाला, यत्रैव चक्ररत्नं, तत्रैव प्रधारितवान् गमनाय । ततस्तस्य भरतस्य राज्ञो बहवो ईश्वरप्रभृतयो, अप्येककेपद्महस्त गता अप्येकके उत्पलहस्तगतायावत् अप्येककेशतसहस्रपत्रहस्तगता भरतं राजानं पृष्टतोनुगच्छन्तीति । ततस्तस्य भरतस्य राज्ञो बह्व्यः कुब्जाः

॥ अनु० ॥

घणा ईश्वर प्रमुष केतलाइक पद्मकमल हाथनेविषे छे एहवा केतलाऐक उत्पलनामइं कमलहाथने विषे छइ यावत् केतलाइक लक्षपत्रकमल हाथमांछे एहवाथका भरतराजानें पूहुइं २ जाइं । तिवारपछी ते भरतराजानी घणी कुब्जा कूबडी चिलातदेसनी उपनी १ अत्यंतठीमणी २ वाकीकायवंत ३

॥ भाषा ॥

॥ टीका॥

हाय„ यथा चन्द्रः शरदभ्रपटलनिर्गतइव ग्रहगणानां दीप्यमानऋक्षाणां शोभमाननक्षत्राणां तारागणस्यच मध्येवर्त्तमानइव प्रियदर्शनो भवति । तथा भरतोपि सुधाधवलान्मज्जनगृहान्निर्गतो ऽनेकगणनायकादिपरिवारमध्ये वर्त्तमानप्रियदर्शनो ऽभवत् ॥ पुनःकीदृशो नृपतिः प्रतिनिष्क्रामतीत्याह । धूपपुष्पगन्धमाल्यानि पूजोपकरणानि हस्तगतानि यस्य सतथा तत्र धूपोदशांगादिः पुष्पाणिप्रकीर्णककुसुमानि गन्धावासाः माल्यानि ग्रथितपुष्पाणीति । प्रतिनिष्क्रम्यच किंकृतवानित्याह । जेणेवइत्यादि । यत्रैवायुधगृहशाला यत्रैवच चक्ररत्नं तत्रैवप्रधारितवान् गमनाय गन्तुंप्रावर्त्तत इत्यर्थः । अथ भरतगमनानन्तरं यथा तदनुचराश्चक्रु स्तथाह । तएणमित्यादि । ततो भरतगमनादनु तस्यभरतस्य राज्ञो बहव ईश्वरप्रभृतयः यावत्पदसंग्राह्या स्तलवरप्रभृतयः पूर्ववत् । अपिचार्थे एकेकेचन पद्महस्तगताः एकेकेचन उत्पलहस्तगताः एवं सर्वोपयपिविशेषणानि वाच्यानि यावत्पदात् अप्पेग

॥ मूल ॥

विअ्राउ इसिणिआ वारुकिणिआउ १ लासिअ लउसिअ हमिली सिंहलली तह आरवी पुलिंदीओ पक्कणि वहलिमुरंडी सबरी पारसीउअ २ अप्पेगईआउ चंदणकलसहत्थगयाउ चंगेरीपुप्फपडलहत्थगयाउ भिंगार आयंसथालपाईसुपइठग वायकरग रयण करंडग पुप्फचंगेरी मल्ल वण्णचुणगंधहत्थगयाउ बत्थआभरण

॥ अनु० ॥

चिलात्यः वामनिकाः वडभिकाः बर्बर्य्यो बकुशिकाः योनिक्योपल्हविकाइसिणिकाबारुकिणिकाः १ लासिकीलकुशिकीद्राविड्यः सिंहल्य स्तथा आरब्यः पुलिन्द्यश्च पक्कण्योबहल्यः मुरुंड्योशबर्य्यो पारसिक्य । (अ । १ । अप्येकिका चन्दनकलशहस्तगताः चङ्गेरीपुष्पपटलहस्तगताः भृङ्गारादर्शस्था

॥ भाषा ॥

बावरदेशनी उपनीबउक सदेसनी ५ जोनकदेसनी ६ पल्लवदेसनी ७ इसिनिकदेसनी ८ वारुकन देसनी ९ लासिक देसनी १० लकुस देसनी ११ द्रविडदेसनी १२ सींहलदेसनी १३ आरबदेशनी १४ पुलिंद्रदेसनी १५ पक्कणदेसनी १६ बहलदेसनी १७ मुरंडदेसनी १८ सबरदेसनी १९ पारसदेसनी २० केत लीक बावन चन्दनना कलस हाथमांहें एइबी लोटा„ आरीसा थालिणनुका सुप्रतिष्टक बीजणा रत्ननां करंडीया फूलनी चंगेरी मालानी, वानाचुर्ण

ईओ कुमुअहत्थगया अप्पेगइआ नलिणहत्थगया अप्पेगइआ सोगंधिअहत्थगया अप्पेगइआ पुंडरीयहत्थगया अप्पेगइआ सयवत्तहत्थगया अप्पेग इआ सहस्सपत्तहत्थगया इति संग्रहः । अत्रव्याख्याप्राग्वत् । नवरं भरतंराजानं पृष्टतःपृष्टतो ऽनुगच्छन्ति । पृष्टे २ परिपाट्याचलंतीत्यर्थः । सर्वेषाम पि सांमन्ताना मेकैववैनयिकीगतिरितिख्यापनार्थं वीप्सायां द्विर्वचनं ॥ नकेवलं सामंतनृपाएव भरतमनुजग्मुः किंतु किंकरीजनोपी त्याह । तएणमि त्यादि ॥ ततः सामन्तनृपानुगमनानन्तरं तस्य भरतस्यराज्ञः संबंधिन्यो बव्ह्यो दास्यो भरतं राजानं पृष्टतोऽनुगच्छन्तीति संबंधः । कास्ताइत्याह । कुब्जाः कुब्जिका वक्रजंघाइत्यर्थः चिलात्य श्चिलातदेशोत्पन्नाः वामनिका अत्यंतह्रस्वदेहाः ह्रस्वोन्नतहृदयकोष्ठावा वक्रभिक्कामहहकोष्ठा वक्राधःकायो वा इत्यर्थः बर्बर्य्यो बर्बरदेशोत्पन्नाः बकुशिकाः बकुशदेशजाः जोनिक्यो जोनकनामकदेशजाः पल्हविकाः पल्हवदेशजाः । इंसिणिआयारुकिणि आजोत्ति । देशद्वयभवाः इंसिनिकाः यारुकिनिकाः लासिक्यो लासिकदेशजाः लकुशिक्यो लकुशदेशजाः द्रविड्यो द्रविडदेशजाः सिंहल्यः सिंहलदेश जाः आरब्यः आरबदेशजाः पुलिंद्र्यः पुलिंद्रदेशजाः पक्कण्यः पक्कणदेशजाः बहल्यो बहलिदेशजाः मुरुंड्यो मुरुण्डदेशजाः शबर्यः शबरदेशजाः पार सीकाःपारसदेशजा अन्नचिलात्यादयोष्टादश पूर्वोक्तरीत्या तत्तद्देशोद्भवत्वेन तत्तन्नामिका ज्ञेयाः कुब्जादयस्तु तिस्रो विशेषणभूताः ॥ अथ यथाप्रकारे

॥ टीका ॥

लोमहत्थय चंगेरीपुप्फ पडल हत्थगयाउ जाव लोमहत्थगयाउ अप्पेगइआउ सीहासणहत्थगयाउ छत्त चामर हत्थगयाउ तिलसमुग्गयहत्थगयाउ । तेल्लकोट्ठसमुग्गोपत्ते चोएणु तगर मेलाय ॥ हरिआले हिंगुलए म

॥ मूल ॥

लपात्रीसुप्रतिष्ठकवातकरणड करत्नकरण्डकपुष्पचङ्गेरीकामाल्यवर्णचूर्णगन्धहस्तगताः वस्त्राभरणलोमहस्तक चङ्गेरीपुष्पपटलहस्तगताः । यावत् लोमहस्तहस्तगता अप्येकिकासिंहासन हस्तगताः छत्रचामरहस्तगताः, तैलसमुद्गहस्तगताः तैलंकोष्ट समुद्गः पत्रंचोत्रंतगरमेलाच ॥ हरितालंहिं

॥ अनु० ॥

नीचंगेरी गंन्धपूडानी चंगेरी तेहाथमांछइ वस्त्र आभर्ण पूंजणीनी चंगेरी फूलनो समोह हाथने विषेंछे यावत् केतली दासीनुं सिंहासन हाथमांछें छत्र चामर हाथमांछें एहवी तेलना कुप्पो दाबडा पांन चूआ तगरप्रमुष हरियाल हिंगुलु मणशिल सासगरत्नना दाबडा १ केतलीक बीजणा हाथ

॥ भाषा ॥

णोपकरणेन ताश्चनुययु स्तथाचाह ॥ अप्येकिकाचंदनकलशा मंगल्यघटा हस्तगता यासांता स्तथा एवं शृंगारादिहस्तगताअपि वाच्याः । तद्व्याख्यानंतुप्राग्वत् । नवरं पुष्पचंगेरीत आरभ्य मालादिपदविशेषिता स्तत्तच्चंगेर्यो ज्ञातव्याः, लोमहस्तकचंगेरीतु साक्षादुपात्तास्ति अन्यास्तु लाघवार्थकत्वेन सूत्रे साक्षान्नोक्ता आद्यंतग्रहणेन मध्यग्रहणस्य स्वयमेवलभ्यमानत्वात्, एवं पुष्पपटलहस्तगता माल्यादिपटलहस्तगता श्च वाच्याः अप्येकिकाः सिंहासन हस्तगताः अप्येकिकाः छत्रचामरहस्तगताः तथा अप्येकिकाः तैलसमुद्गकस्तैलभाजनविशेष स्तद्धस्तगताः एवं कोष्टसमुद्गकहस्तगता यावत्सर्षपसमुद्ग हस्तगताः । अत्र समुद्गसंग्रहगाथा । तेल्लेकोठसमुग्गाइति सूत्रोक्ताः एतदर्थंस्तु राजप्रश्नीयवृत्तितो ऽवगंतव्यः अप्येकिका स्तालवृंतहस्तगताः व्यजनपाणयः अप्येकिका धूपकडुच्छुकहस्तगता इति । अथ ययासमृद्धा भरतआयुधशालागृहं प्राप तामाह । तएणमित्यादि । ततः सभरतोराजा यत्रैवा युधगृहशाला तत्रैवोपागच्छतीति संबंधः । किंभूत इत्याह । सर्वर्द्धा समस्तयाआज्ञरणादिरूपया लक्ष्म्या युक्तइति गम्यं । एव मन्यान्यपि पदानि योजनीयानि । नवरं युतिर्मेलःपरस्परमुचितपदार्थानां तया बलेन सैन्येन समुदयेन परिवारादिसमुदयेनआदरेण प्रयत्नेन आयुधरत्नभक्त्यु

॥ टीका ॥

णोसिलासासग समुग्गे १ अप्पेगइआउ तोलियपुडहत्थगयाउ अप्पेगइआउ धूवकडुच्छुय हत्थगयाउ भरहं रायाणंपिठउं २ अणुगलंति ॥ तएणं से भरहेराया सव्विड्ढीए सव्वजुईए सव्वबलेणं सव्वसमुदएणं सव्वायरेणं सव्व विभूसाए सव्वविभूईए सव्ववत्थ पुप्फ गंध मल्लालंकार विभूसाए सव्व तुडिय सद्द संणिणाएणं महया इड्ढीए

॥ मूल ॥

कुलकमनः शिलासर्षपसमुद्गः १ अप्येकिकास्तालवृन्तहस्तगताः अप्ये किकाधूपकुडुच्यकहस्तगता भरतं राजानं पृष्ठतोऽनुगच्छन्ति । ततः सभर

॥ अनु० ॥

सां एहवी केतलीक धूपकडुछुक हाथमांहें एहवी दासी भरतराजानइं पूठइं २ जाइं तिवारपछी तेभरतराजा सर्वऋद्धि करी सर्वबल सैन्यइ करी सर्वसंपदाक सर्वसमुदाय परिवार करी सर्वआदर बहुमाने करी सर्वसोभाइं करी सर्ववस्त्र फूल गन्ध माल्य अलंकारनी सोभाइं करी सर्व वाजित्रना

॥ भाषा ॥

त्सवबहुमानेन विभूषया उचितनेपथ्यादिशोभया विभूत्या विभूतिदर्शनेन एवंविधविस्तारेण । उक्तामेव विभूषां व्यक्त्याह । सव्वपुप्फेत्यादि । अत्र पुष्पादिपदानि प्राग्वत्, नवरं अलंकारो मुकुटादिरेतद्रूपया सर्वेषां त्रुटितानां तूर्याणां यःशब्दो ध्वनि र्यश्च ससंगतो निनादः प्रतिध्वनिस्तेन । अत्र शब्दसन्निनादयोः समाहारद्वंद्वः अथ सर्वमतेन भाजनस्थंघृतं पीतमिति लोकोक्तेः प्रसिद्धत्वात् सर्वशब्देनाल्पीयोपि निर्दिष्टं भवे त्ततश्च नतथाविभू तिर्वर्णिता भवतीत्याशंक्यमानं प्रत्याह । महया इद्धीए इत्यादि । योजनातु प्राग्वदेव यावत्शब्दात् महायुत्यादिपरिग्रहः, महता वृहता वरत्रुटिता नां निःस्वानादीनो तूर्याणां यमकसमकं युगपत् प्रवादितं भावेक्तप्रत्ययविधानात् प्रवादनं ध्वनितमित्यर्थ स्तेन शङ्खःप्रतीतः पणवोभांडपटहो लघु पटहइत्यन्ये पटहस्त्वेतद्विपरीतः भेरीढक्का झल्लरीचतुरंगुलनालिः करटिसदृशी वलयाकारा खरमुहीकाहली मुरजोमहामर्दलः मृदङ्गोलघुमर्दलः दुंदुभिर्देववाद्यं एषां निर्घोषनादितेन तत्र निर्घोषोमहाध्वनि र्नादितंचप्रतिरवः एकवद्भावादेकवचनं पूर्वविशेषणं तूर्यसामान्यविषयमिदन्तु तद्व क्तिसूचक मित्यनयोर्भेदः । आयुधगृहशालाप्राप्त्यनन्तरविधिमाह । उवागच्छित्ता इत्यादि । तत्रोपागत्य आलोकेदर्शनमात्रएव चक्ररत्नस्य प्रणामङ्करो ति क्षत्रियै रायुधवरस्य प्रत्यक्षदेवतात्वेन सङ्कल्पनात् यत्रैव चक्ररत्नं तत्रैवोपागच्छति लोमहस्तकं प्रमार्जनिकां परामृशति हस्तेनस्पृशति गृह्णातीत्यर्थः ।

जावमहया वर तुडिअ जमग समग प्पवाईएणं संख पणव पडह भेरि झल्लरि खरमुहिमुरजमुइंग दुंदुहि निग्घोसणाएणं जेणेव आउहघरसालातेणेवतेउवागच्छइ २ त्ता आलोए चक्करयणस्य पणामंकरेइ २ त्तो जेणेव

तो राजा सर्वर्द्धा सर्वद्युत्या सर्वबलेन सर्वसमुदयेन सर्वादरेण सर्वविभूष । सर्वविभूया सर्वपुष्पगन्धमाल्यालङ्कारविभूषया सर्वत्रुटितशब्दसन्निना देन महर्द्धा यावत् महता वरत्रुटितयमकसमक प्रवादनेन शङ्ख पणवपटह भेरीझल्लरीखरमुखीमूरजमृदङ्गदुंदुभीनिर्घोषनादितेन यत्रैव आयुधगृ

शब्दनें निनादइं करीनें मोटी विस्तीर्ण ऋद्धिइं करी यावत् मोटा प्रधान वाजित्र जमक समकनामें वाजा तेहनां शब्दें करीनें शंख पणवनामें प डह भेरि झालरी काहली मोटोमांदल दुन्दुभी एहनां शब्दें करीनइं सहित जिहां आयुध घरशालाछें तिहां आवइं आवीनें दीठाथकाज चक्ररत्न

परामृश्यच चक्ररत्नं प्रमार्जयति। यद्यपि नतादृशेरत्ने रजःसंभव स्तथापि भक्तजनस्यविनयप्रक्रियाज्ञापनार्थमयमुपन्यासः। प्रमार्ज्यच दिव्यया दक धारया अभ्युक्षतिसिञ्चति स्नपयतीत्यर्थः। अभ्युक्ष्यच सरसेन गोशीर्षचन्दनेनाऽनुलिम्पति। अनुलिप्यच अग्रैरपरिभुक्तै रभिनवै र्वरै गंन्धै र्माल्यैश्चार्चयति, एत देवव्यक्त्यादर्शयति। पुष्पारोपणं माल्यारोपणं वर्णारोपणं चूर्णारोपणंवस्त्रारोपणं आभरणारोपणंकरोति कृत्वाच अक्षैरमलैश्चक्षुर्हरैतिप्रतलैःश्वेतैः रजत मयै रजतएवअक्षतैरसांयेषांते ऽक्षतरसाःप्रत्यासन्नवस्तुप्रतिबिम्बाधारभूताइति वाअतिनिर्मलाइति भावः, एतादृशैस्तंडुलैः अत्रपूर्वपदस्यदीर्घातता प्राकृत त्वात् स्वस्तिकादयोऽष्टाष्टमङ्गलकानिमङ्गलवस्तूनि आलिखतिविन्यस्यति। अत्रचाष्टाष्टेति वीप्सावचनात् प्रत्येकमष्टाविति ज्ञेयं। यद्वा अष्टेतिसंख्याशष्टः अष्टमङ्गलकानीतिचाखण्डः संज्ञाशब्दः अष्टानामपिमङ्गलकानां। अथोक्तानामेव मङ्गलकानांव्यक्तितो नामानिकथयन् पुनर्विध्यन्तरमाह ॥ तद्यथा-स्वस्ति कमित्यादि व्याख्यातुप्रागवत अत्रद्वितीयालोपः प्राकृतत्वात्, इमान्यष्टमङ्गलकानि आलिख्याकारकरणेन कृत्वाऽन्तर्वर्सकादिन्नरणेन पूर्णानि कृत्वेत्य र्थः। करोति उपचारमुचितसेवामिति। तमेवव्यनक्ति। किंतेइति तद्यथेत्यर्थे तेन विवक्षितउपचारः उपन्यस्यत इत्यर्थः। पाटलं पाटलापुष्पं मल्लि कावि चकिलपुष्पं यल्लोकेवेलिइतिप्रसिद्धं चंपकाशोकपुन्नागाः प्रतीताः चूतमञ्जरी आम्रमञ्जरी वकुलःकेसरो यः स्त्रीमुखसीधुसिक्तोविकसति तत्पुष्पं

चक्करयणे तेणेव उवागच्छइ २ त्ता लोमहत्थयं परामुसइ २ त्ता चक्करयणं पमज्जइ २ त्ता दिव्वाए दगधाराए अब्भुक्खेइ २ त्ता सरसेणं गोसीसचंदणेणं अणुलिंपइ २ त्ता अग्गेहिं वरेहिं गंधेहिं मल्लेहिंच अच्चिणइ पुप्फारुहणं

इशाला, तत्रैवोपागच्छति। उपागत्य, आलोके चक्ररत्नस्य प्रणामंकरोति। कृत्वा यत्रैवचक्ररत्नं तत्रैवोपागच्छति उपागत्य लोमहस्तकं परामृश ति। परामृश्य, चक्ररत्नं प्रमार्ज्जयति। प्रमार्ज्य दिव्ययोदकधारया अभ्युक्षति। अभ्युक्ष्य सरसेन गोशीर्षचन्दनेनानुलिम्पति। अनुलिप्य अग्रैर्व

नें प्रणामकरइं करीनें जिहां चक्ररत्नछइं तिहां आवइं आवीनें पूजणी लीइं लेईनें चक्ररत्ननइं पूजइ पूजीनें दिव्यपाणीनी धाराइं करी सींचइ सींचीनें रससहित गोशीर्ष चंदणनइं लीपइं लीपने उत्तमप्रधान सुगन्धवस्तूइं करी फूलनी मालाइं करीनें आर्चा पूजाइंकरी फूलनां आरोपण च

तिलको यःस्त्रीकटाक्षनिरीक्षितो विकसति तत्पुष्पं कणवीरं कुंदंच प्रतीते कुब्जकं कूबोइतिनाम्ना वृक्षविशेष स्तत्पुष्पं कोरंटकंप्राग्वत् पत्राणि मरु बकपत्रादीनि दमनकःस्पष्टः एतै वंरसरभिरत्यंतसुरभिः तथासुगन्धाः शोभनचूर्णा स्तेषांगन्धो यत्र सतथा तद्वितलक्षण इकप्रत्ययः पश्चाद्विशेषणद्वय

मल्ल गंध वस्त्र चुन्न वत्थारुहणं आभरणा रुहणं करेइ २ त्ता अच्छेहिं सण्हेहिं सेएहिं रययामएहिं अक्खरसा तंदुलेहिं चक्करयणस्स पुरतो अट्ठमंगलए आलिहइ ॥ तं० ॥ सोत्थिअ सिरिवच्छ णंदिआवत्त वद्धमाणग भद्दा सण मच्छ कलस दप्पण अट्ठमंगलए आलिहि त्ता काऊण करेइ उवयारं किंतेपाडल मल्लिअ चंपग असोग पुन्ना गचूअमंजरिणवमालिअ वउल तिलग कणवीर कुंद कोज्जय कोरंट पत्त दमणय वरसुरहिसुगंधगंधिअस्स कय

रैर्गन्धैर्माल्यैश्चार्चयति । पुष्पारोपणं माल्यगन्धवर्णचूर्णवस्त्रारोपणं आभरणारोपणं करोति कृत्वा, अच्छैः श्लक्ष्णैः श्वेतैः रजतमयैः अच्छरसतंडुलैः चक्ररत्नस्य पुरतोऽष्टाष्टमङ्गलिकानि आलिखति । तद्यथा-स्वस्तिकश्रीवत्सनंद्यावर्त वर्द्धमानकभद्रासनमत्स्यकलशदर्पणाष्टमङ्गलैरालिख्याकारकरणे न करोति) । कृत्वा, उपचारमिति । किन्तत् । पाटलमल्लिका चम्पकाशोकपुन्नागयूथिकाचूतमञ्जरीनवमालिकावकुलतिलककनवीरकुन्दकुब्जककोर

ढाबवत्त फूलनीमाल सुगन्धद्रव्य बानांचूर्ण गन्धपूडा वस्त्र लुंगडा तेहनुं आरोपण ग्रहणांनुं आरोपण करें करीनें आत्मा निर्मल श्लक्ष्ण सुकोमल स्वेत उजला रजत रूपामय अत्यन्त स्वच्छ फटिकिनीपरें तंदुलेकरी एहवा चक्ररत्ननें आगलि आठ २ मंगलीक आगलइषे करइ ! ते केहा । साथीउ १ श्रीवत्स २ नंदावर्त्त ३ वर्द्धमांन शरावसंपूट ४ भद्रासन ५ मत्स्य ६ कलस ७ दर्पण ८ ए८ मंगलीक करीनें करीने करइ उपचार, तेस्यो उपचार पाड लवृक्षनां फूल मालतीना चंपानां अशोकवृक्षना पुन्नागना आंबानी मांजरी नवी मालतीनां फूल बउलसरीना तिलकवृक्षना कणयरनां फूल कुंदवृष नां कुब्ज कुबानां फूल कोरंट वृक्षनां फूल दमणांनां फल प्रधान सुरभी सुगन्धइं गंधित एहवो हार्थेकरी ग्रहवामांडा अनेग्रह्यां नही अथवा कर

॥ टीका ॥

दित्यर्थः ॥ तस्सणमित्यादि । व्यक्तंतेसिणमित्यादि । सर्वंप्राग्वत् । नवरं णाणामणिमयेति । वर्णकैकदेशेन पूर्णस्तोरणवर्णको ग्राह्यः । अथात्रपद्मस्व रूपमाह । तस्सणमित्यादि । तस्यपद्मद्रहस्य बहुमध्यदेशभागे अत्रांतरे महदेकंपद्मं प्रज्ञप्तं ? एकंयोजनमायामतो विष्कम्भतश्च अर्द्धयोजनं बाहुल्येन पिंडेन दशयोजनान्युद्वेधेन जलावगाहेन द्वौक्रोशावुच्छ्रितं जलांताज्जलपर्यंतात् एवं सातिरेकाणि दशयोजनानि सर्वाग्रेण प्रज्ञप्तानि ? जलावगाहोपरित नजलागसत्ककमलमानमीलने एतावतएव संजवात् । सेणमित्यादि । तत्पद्मनेकया जगत्या प्राकारकल्पया सर्वतःसमन्तात् संपरिक्षिप्तं, साचजगती जं बूद्वीपजगतीप्रमाणा वेदितव्या, एतच्च प्रमाणंजलादुपरिष्टाद् ज्ञेयं, दशयोजनात्मकजलावगाहप्रमाणस्याऽविवक्षितत्वात् । गवाक्षकटकोपिजालकसमूहोपि तथैव प्रमाणेनोच्चत्वेनार्द्धयोजनं पंचधनुःशतानि विष्कम्भेनेत्यर्थः । अथपद्मवर्णकमाह । तस्सति । तस्य पद्मस्यायमेतद्रूपो वर्णव्यासः प्रज्ञप्तः ? तद्य

॥ टीका ॥

ज साईरेगाइं दसजोअणाइं सव्वग्गेणं पं० ? सेणं एगाए जगईए सव्वओ समंतासंपरिक्खित्ते,, जंबूद्दीवजगइ प्पमाणा गवक्खकडएवि तहेचेव पमाणेणं ॥ तस्सणं पउमस्स अयमेआरूवे वण्णावासे पं० ? तं० वइरा मया मूला रिठामएकंदे वेरुलिआमएणाले वेरुलिआमयावाहिरपत्ता जंबूणयामया अब्भिंतरपत्ता तवणि

॥ मूल ॥

क्रोशावुच्छ्रितं जलान्तात्, सातिरेकाणि दशयोजनानि सर्वाग्रेण प्रज्ञप्तम् ? तदेकया जगत्यासर्वतः समन्तात् संपरिक्षिप्तम्, (सा) चजम्बूद्वीपजगतीप्र माणा, गवाक्षकटकोऽपि तथैवप्रमाणेनेति,, ।। तस्य पद्मस्यायमेतद्रूपो वर्णावासः प्रज्ञप्तः,, सयथा वज्रमयानि मूलानि अरिष्टमयः कन्दोवैदूर्यमयं

॥ अनु० ॥

ऊपरथईनें कह्यो । ते कमल १ कोटकरी चोपर्षेर बीह्योछे, जंबूद्वीपनी जगतीने प्रमाण जाणवो, पाणी उपरि गवाक्षकडां गोषपणि तिमज प्रमाण जाणवा । ते कमलनो एहवो वर्ण व्यासछइ, ते केहवाछे वज्ररत्नमय मूलछे जेहनो अरिष्टरत्नमय कंदछइ जेहनो बैडुर्यरत्नमय नालछे जेहनुं वैडूर्य रत्नमय बाहिरला पत्रछे जेहना जांबूनंद लगारेक रातु सुवर्णमय माहिला पांषडीछे रातासुवर्णमयछे केसरा जेहना नानामणिमय कमलना बीजभागछें

॥ भाषा ॥

या । वज्रमयानि मूलानि कन्दादधस्तिर्यग्निर्गतजटासमूहावयवरूपाणि अरिष्टरत्नमयः कन्दो मूलनालमध्यवर्त्ती ग्रंथिः वैडूर्यमयं नालं कन्दोपरिमध्यवर्त्यवयवः वैडूर्यमयानि बाह्यपत्राणि अत्रायंविशेषो बृहत्क्षेत्रविचारवृत्त्यादौ, बाह्यानि चत्वारि पत्राणि वैडूर्यमयानि शेषाणितु रक्तसुवर्णमयानि जांबूनदमीषद्रक्तस्वर्णं तन्मयान्यभ्यंतरपत्राणि, सिरिनिलयमिति क्षेत्रविचारवृत्तौतु पीतस्वर्णमयान्युक्तानि तपनीयमयानि रक्तस्वर्णमयानि केसराणि कर्णिकायाः परितोऽवयवाः नानामणिमयाः पुष्करास्थिभागाः कमलबीजविभागाः कनकमयी कर्णिका बीजकोशः ॥ अथ कर्णिकामानाद्याह । साणमित्यादि । साकर्णिका अर्द्धयोजनमायामेन विष्कंभेनच क्रोशंबाहल्येन पिंडेन सर्वात्मना कनकमयी अतएव कनकमयीति पूर्वविशेषणेनाऽवयवविभागेपिकनकमयत्वंस्यादित्याशङ्का निरस्ता । अच्छाइत्येकदेशेन सल्लाइत्यादि पदान्यपिज्ञेयानि तेषां व्याख्याचप्राग्वत् । तीसेणमित्यादि ।

॥ मूल ॥

जंबूमयाकेसरा णाणामणिमया पोक्करत्थिभाया कणगामई कण्णिआ साणं अद्धजोअणं आयामविक्खंभेणं कोसं बाहल्लेणं सव्वकणगामई अच्छा ॥ तीसेणं कण्णिआए उप्पिं बहुसमरमणिज्जे भूमिभागे पं० ? से जहाणामए आलिंगपुक्करेइ वा । तस्सणं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थणंमहं

॥ अनु० ॥

नालं वैदूर्यमयानिबहिः पत्राणि जाम्बूनदमयान्याभ्यन्तरपत्राणि तपनीयमयानि केसराणि नानामणिमयाः पुष्करास्थिभागाः कनकमयीकर्णिका, साकर्णिकाअर्द्धयोजना आयामविष्कम्भाभ्याम्, क्रोशं बाहुल्येनसर्वकनकमयी अच्छा, तस्याः कर्णिकायाः उपरिबहुसमरमणीयो भूमिभागः प्रज्ञप्तः? स

॥ भाषा ॥

जेहनी कनकमयछे कर्णिका छाछा, तेकर्णिका अर्द्धयोजन लांबपणें पोहलपणे एककोश जाडपणे सर्व कणकमयछें आत्यानिर्मलछइ । तेकर्णिकानइ उपरि घणुं समरमणीक भूमिभागछें जिम कोई दृष्टांते मादलनां पूठा सरीषो । ते भुवननें घनुंमध्यभागें समेविचिं मध्यभागें इहां एक मोटु भवन घरछे । एक कोसलावपणे अर्द्धकोश पोहलपणे उणोक्रोस ऊर्ध्व उंचपणें अनेक सोगमे थाजेकरी सहित यावत् मनोहर, ते भवननें त्रिणिदिशिं त्रिणबार

एतानि सर्वाण्यपि निगदसिद्धानि श्वेतीयवर्षकषायं जीवाभिगमोक्तः । तस्सणंदेवसयणिज्जस्स अयमेआरूवे वण्णावासे पण्णत्ते ? तंजहा-णाणामणिमया पडिपाया सोवण्णिआपाया णाणामणिमयाइं पायसीसगाइं जंबूणयमयाइं गत्ताइं वइरामयासंधी णाणामणिमए बिब्बे रययामईतूली लोहिअरकामया विब्बोअणा तवणिज्जमईउ गंडोवहाणियाउ इति, सेणंसयणिज्जे सालिङ्गणवट्टिए उभओविब्बोअणे उभओउन्नए मज्झेणयगम्भीरे गङ्गापुलिणवालुआउद्दालसालिसए अविअखोमदुगुल्लपट्टपडिच्छयणे आईणगरूअबूरणवणीयतूलउल्लफासे सुविरइअरयत्ताणे रत्तंसुअसंवुडे सुरम्मे पासादी

एगेमहणं पं० ? कोसं आयामेणं अद्धकोसं विक्कंभेणं देसूणगंकोसं उद्धंउच्चत्तेणं, अणेगखंभसयसन्निविट्ठे जाव पासाईए दरिसणिज्जे ॥ ४ ॥ तस्सणं भवणस्स तिदिसंतनं दारा पं० ? तेणंदारा पंचधणुसयाइं उद्धं उच्चत्तेणं अड्ढाइज्जाइं धणुसयाइंविक्कंभेणं तावइअंचेव पवेसेणं सेआ वरकणगथूभिआगा जाव वणमालाउ णेअव्वाउ ॥ तस्सणं भवणस्स अंतो बहुसमरमणिज्जे भूमिभागे पं० ? सेजहाणामए आलिंग० ॥ त

यथानामकः आलिङ्गपुष्करइव०, तस्यबहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्रमहदेकं भवनं प्रज्ञप्तम् ? क्रोशमायामेन अर्द्धक्रोशं विष्कम्भेन, देशोनक्रोशमूर्द्धमुच्चत्वेन, अनेकस्तम्भशतसन्निविष्टम् यावत् प्रासादीयं दर्शनीयं । तस्य भवनस्य त्रिदिशित्रीणिद्वाराणि प्रज्ञप्तानि ? तानिद्वाराणि पञ्चधनुःशतान्यूर्ध्वं मुच्चत्वेन, अष्टाविंशतिधनुःशतानि विष्कंभेन, तावदेवप्रवेशेन, श्वेतावर कनकस्तूभिकाः यावद्वनमालातो नेतव्याः । तस्यभव

णाळे । ते बारणा पाचसे ५०० धनुष ऊर्ध्व ऊंचपणाई अढीसें धनुष पोहलपणें तेतलोज प्रवेसपणाई श्वेत प्रधान कनकमय चोतरा करी सहित यावत् वनमाला जाणवी ॥ ते भवनने माहि घणुं समरमणीय रमणिक भूमिभागछै । ते जथादृष्टांत मादलना पुड़ासरिषो ते भवननें घणुं मध्यभागे समैविचि इहांमोटो एकमणिमय पिठिकाछै, ते मणिपिठिका पांचशे धनुष लांबपणे पोहलपणे आढीसे धनुष जाडपणे सर्वमणिमय निर्मलछै । ते मणिपिठिका ऊप

॥ टीका ॥ ॥ मूल ॥ ॥ अनु० ॥ ॥ भाषा ॥

ए इहइति ॥ अत्रव्याख्या । तस्यदेवशयनीयस्या यमेतद्रूपो वर्णव्यासःप्रज्ञप्तः ? तद्यथा नानामणिमयाः प्रतिपादाः मूलपादानां प्रतिविशिष्टोपष्टंभ करणायपादाः प्रतिपादाः सौवर्णिकाःसुवर्णमयाः पादाः मूलपादाः जांबूनदमयानिगात्राणि ईषादीनि । वज्रमयावज्ररत्नपूरिताःसंधयः नानामणि मएविचित्रइति विचित्रनामव्यूतं विशिष्टंवानमित्यर्थः । रजतमयीतूली लोहिताक्षमयानि विब्बोअणाइति उपधानकानि उच्छीर्षकाणीतियावत् तपनीयम-ध्यो गंडोपधानिकाः गल्लमसुरकाणीत्यर्थः तच्छयनीयं सह आलिङ्गनवर्त्त्याशरीरप्रमाणेनोपधानेन यत्तनथा उभयतःउभौशिरोऽन्तपादालावाश्रित्य वि

॥ टीका ॥

रसणं भवणस्स बहुसमरमणिज्जो भूमिभागःपन्नत्तः ? सयणिज्जवण्णओ भाणियव्वो ॥ तेणंपउमे अण्णेणं अट्ठसएणं पउमाणं तदद्धुच्चत्तप्प माणमित्ताणं सव्वओ समंतासंपरिक्खित्ते ॥ तेणंपउमा अद्धजोअणं आयामविक्खंभेणं कोसं बाहल्लेणं

॥ मूल ॥

नस्यान्ते बहुसमरमणीयो भूमिभागःप्रज्ञप्तः ? सयथानामकः आलिङ्गपुष्करइव० तस्यभवनस्य बहुमध्यदेशभागे अत्रमहत्येकामणिपीठीका प्रज्ञप्ता ? साचमणिपीठिका पञ्चधनुः शतान्यायामविष्कम्भाभ्याम् । अष्टाविंशतिर्धनुःशतानि बाहुल्येन, सर्वमणिमयी अच्छा ॥ तस्यामणिपीठिकायाउप रि महदेकं शयनीयं प्रज्ञप्तम् ? शयनीयवर्णको भणितव्यइति । तत्पद्मन्यूनेषा मष्टशतेत पद्मानां तदर्द्धोच्चत्वप्रमाणमात्राणां सर्वतःसमन्तात्

॥ अनु० ॥

रि इहां एकसोदु सय्याछें. सय्यानु वर्णन जीवाभिगमथी जाणवो। ते कमल प्रथम परिधि अनेरा बीजा एकसो आठ १०८ कमल करीनें. ते मूल कमलनें अर्द्ध ऊंचपणें लांबपणे पोहलपणें करी सहित तेणे करी चोपखरें बीढ्युछें ते कमल १०८ अर्द्ध योजन लांबपणें पोहलपणें तेह कमलनो एककोस जाड पणें दस योजन १० ऊंडपणइं एक कोश पाणीथी ऊचपणइं सवादस १०। योजन ऊचपणइं तेह कमलनो एहवउ वर्णव्यासछेइ, तेकहेछइ । वज्र

॥ भाषा ॥

क्षोभणेउपधाने यत्र तत्तथा उभयत उन्नतं मध्येनतंच तत् नम्रत्वात् गम्भीरत्वं महत्वात् तत्तथा गङ्गापुलिनवालुकाया अवदालोविदलनं पादादि-न्यासे अधोगमनमिति तेन सालिसइति सदृशकं। तथानं अविअत्ति। विशिष्टपरिकर्मितंक्षौमङ्कार्पासिकं दुकूल वस्त्रं तदेवपट्टः सप्रतिच्छदनमाच्छा-दनं यस्य तत्तथा आईणगेत्यादिप्राग्वत्। सुविरचितं रजस्त्राणमात्रादनविशेषोऽपरिभोगावस्थायां यत्र तत्तथा रक्तांशुकेन मशकदंशादिनिवारणा-र्थंकमशकगृहाभिधानवस्त्रविशेषेण संवृतं अतएव सुरम्यं पासादीएइत्यादि पदचतष्कं प्राग्वत्। अथास्यप्रथमपरिक्षेपमाह। सेणमित्यादि। तत्पट्ट मन्येनाष्टशतेन पट्टानां तदर्द्धोच्चत्वप्रमाणमात्राणां तस्य मूलपट्टप्रमाणस्यार्द्धमर्द्धरूपा उच्चत्वे उच्छ्राये प्रमाणे चायामविस्तारबाहल्यरूपे मात्रा प्रमा-णं येषांतानि तथा तेषां सर्वतः समन्तात् संपरिक्षिप्तं। अत्र जलोपरितनभागे उच्चत्वस्य व्यवहारप्राप्तस्य विवक्षणादर्द्धप्रमाणं संभवत्यन्यथाजलावगा-हसहितोच्चत्वविवक्षाया मुत्तरसूत्रे सातिरेकपंचयोजनानि इति वक्तव्यंस्यात्। सामान्यतः उक्तमेव मानं व्यनक्ति। तेणमित्यादि। प्रागुक्तप्राय। एषांव र्णकमाह। तेसिणमित्यादि। व्यक्तं। सेणमित्यादि। इदमपिव्यक्तं, तीसेणमित्यादि व्यक्तं। एषुच श्रीदेव्या भूषणादिवस्तूनि तिष्ठन्ति इतिसूत्रा

॥ टीका ॥

दसजोअणाइं उव्वेहेणं कोसं ऊसिआजलंतातं साइरेगाइं दसजोअणाइं उच्चत्तेणं। तेसिणं पउमाणं अयमे आरूवे वण्णावासे पं० ? तं०—वइरामयामूला जाव कणगामईकण्णिआ सोणंकणिआ कोसंआयामेणं अ द्धकोसंबाहल्लेणं सव्वकणगामई अच्छा॥ तीसेणं कणिआएउप्पिं बहूसमरमणिज्जे जाव मणीहिं उवसो

॥ मूल ॥

संपरिक्षिप्तम्। तानिपट्टान्यर्द्धयोजनान्यायामविष्कम्भाभ्याम्, क्रोशं बाहुल्येन, दशयोजनान्युद्वेधेन क्रोश मुच्छ्रितानिजलान्तात्, सातिरेकाणि दशयो-जनान्युच्चत्वेन तेषांपट्टाना मयमेतद्रूपोवर्णावासः प्रज्ञप्तः ? तद्यथा-वज्रमयानिमूलानि यावत् कनकमय्यः कर्णिकाः, ताः कर्णिकाः क्रोशमाया

॥ अनु० ॥

रत्नमयमूलछे जेहना यावत् कनकमयछे कर्णिका जेहनी तेहकर्णिका एक कोश लांबपणइं अर्द्धकोश जाडपणइं सर्व सुवर्णमय आछी निर्मल, तेह कर्णिकानें ऊपर घणुं समो रमणीक भूमिभागछइ यावत् मणिरत्न करी शोभायमानछइं (एक १०८ कमलनइं विषइं श्रीदेवीनां भूषणादिक वस्तू रहें)

॥ भाषा॥

नुक्तोपि विशेषोबोध्यः । अथ द्वितीयपद्मपरिक्षेपमाह ॥ तस्सणमित्यादि ॥ तस्यमूलपद्मस्यापरोत्तरस्यां वायव्यकोणे उत्तरस्यां उत्तरपूर्वस्यामीशान कोणेच सर्वसंकलनया तिसृषु दिक्षु अत्रांतरे श्रियादेव्या चतुर्णां सामानिकसहस्राणां चत्वारि पद्मसहस्राणि प्रज्ञप्तानि ? तस्य पद्मस्य पूर्वस्यां दिशि अत्रश्रियाश्चतसृणां महत्तरिकाणां चत्वारि पद्मानि प्रज्ञप्तानि ? अत्र प्राग्व्यावर्णितविजयदेवसिंहासनपरिवारानुसारेण पार्षद्यादिपद्मसूत्राणि वक्तव्यानि सुगमत्वान्न लिख्यंते । यावत्पश्चिमायां सप्तानीकाधिपतीनां सप्तपद्मानि । अथतृतीयपद्मपरिक्षेपसमयः । तस्सणमित्यादि । तस्य मु-

हिए ॥ तस्सणं पउमस्स अवरुत्तरेणं उत्तरेणं उत्तरपुरत्थिमेणं एत्थणं सिरीएदेवीए चउण्हं सामाणिअसाहस्सीणं चत्तारि पउमसाहस्सीओ पं० ? तस्सणं पउमस्स पुरत्थिमेणं एत्थणं सिरीएदेवीए चउण्हंमहत्तरिआणं चत्तारि पउमा पं० ? तस्सणं पउमस्स दाहिणपुरत्थिमेणं एत्थणं सिरिएदेवीए अब्भिंतरीआए परिसाए अठण्हं देवसाहस्सीणं अठपउमसाहस्सीओ पं० ? दाहिणेणं मज्झिमपरिसाए दसण्हं देवसाहस्सीणं दसप

मेंनाभेरुच्चत्वेन बाहुल्येन सर्वकनकमय्यः अच्छा इति । तासांकर्णिकानामुपरि बहुसमरमणीया भूमिभागाः यावन्मणीभिरुपशोभिताः, तस्य पद्मस्यापरोत्तरस्यां उत्तरस्यां मुत्तरपूर्वस्यां अत्रश्रियादेव्या चतुर्णांसामानिकसहस्राणां चत्वारि पद्मसहस्राणि प्रज्ञप्तानि ? तस्यपद्मस्य पूर्वस्यां अत्रश्रिया देव्या चतसृणांमहत्तरिकाणां चत्वारिपद्मानि प्रज्ञप्तानि ? तस्यपद्मस्यदक्षिणपूर्वस्यां अत्रश्रियादेव्या आभ्यन्तरिकायाः परिषदो अ-

ते कमलनइ बीजीपरिधि पश्चिम ऊत्तरइं वायूकूणइ १२ उत्तरदिसि २ उत्तरपूर्व ईशानकोणें इहां श्रीदेवीनी च्यार हजार सामानिक देवीना ४००० चारि ४००० हजार कमलछें वलीते मूलकमलनें पूर्वदिसइ इहां श्रीदेवीनी च्यारि महत्तरिका गुरुस्थानिक देवीने च्यारि कमलछइं, ते मुख्य कमलने दक्षिण पूर्व अग्नि कूणे इहा श्रीदेवीने चारमाहिली परिषदाना आठ हजार देवताना आठ हजार कमलछइ दक्षिण दिशि विचली परषदाना दस

॥ टीका॥
॥ मूल ॥
॥ अनु० ॥
॥ भाषा ॥

सपद्मस्य चतसृणां दिशां समाहारश्चतुर्दिक् तस्मिन् चतुर्दिशि सर्वतःसमन्तात् अत्रांतरे श्रियादेव्याः षोडशानामात्मरक्षकदेवसहस्राणां षोडशपद्म सहस्राणि । तथाहि चत्वारिपूर्वस्यां चत्वारि दक्षिणस्यां एवंपश्चिमोत्तरयोः । अथोक्तव्यतिरिक्ताः अन्येपि त्रयः परिवेषाः सन्तीत्याह । सेणंपउमेइ-त्यादि । तत्पद्मं त्रिभिरुक्तव्यतिरिक्तैः पद्मपरिक्षेपैःसर्वतः समन्तात संपरिक्षिप्तं । तद्यथा अभ्यन्तरकेणाभ्यन्तरभवेन मध्यमकेनमध्यभवेन बाहिरके

उमरोहस्सीणं पं० ? दाहिणपच्चत्थिमेणं बाहिरिआए परिसाए बारसण्हं देवसाहस्सीणं बारस पउमसाहस्सी ण पं० ? पच्चत्थिमेणं सत्तण्हं अणिआहिवईणं सत्त पउमा पं० ? तस्सणं पउमस्स चउद्दिसं सव्वओसमंता एत्थणंसिरीएदेवीए सोलसण्हं आयरक्खदेवसाहस्सीणं सोलसपउमसाहस्सीणं पं० ? सेणंपउमे तिहिं पउमवर परिक्खेवेहिं सव्वओसमंता संपरिक्खित्ते तं०—अब्भिंतरएणं मज्झिमएणं बाहिरएणं अब्भिंतरपउमपरिक्खेवे

ष्टानां देवसहस्राणामष्टपद्मसहस्राणि प्रज्ञप्तानि ? दक्षिणाभ्यां मध्यमपरिषदो दशानां देवसहस्राणां दशपद्मसहस्राणि प्रज्ञप्तानि ? दक्षिणाप रस्यां बाह्यायाःपरिषदो द्वादशानां देवसहस्राणां द्वादशपद्मसहस्राणि प्रज्ञप्तानि ? पश्चिमस्यां सप्तानामनीकाधिपतीनां सप्तपद्मानि प्रज्ञप्तानि ? तस्यपद्मस्य चतुर्दिशि सर्वतः समन्तात् अत्रश्रियादेव्याः षोडशानामात्मरक्षदेव सहस्राणां षोडशपद्मसहस्राणि प्रज्ञप्तानि ? तत् पद्मंतिसृभिः

हजार देवताना दशहजार कमलळें दक्षिण पश्चिम नैऋतकूणे बाह्यरली परषदानां बारह हजार देवतानां बारह हजार कमलळें पश्चिमदिशि सातक टकना स्वामीदेवतानां सात ७ कमलळें, ते मुख्य कमलने त्रीजीपरिधि च्यारिदिशि चोपखेर छइं श्रीदेवीनां सोले हजार आत्मारक्ष देवतानां सोले हजार कमलळें ते मुख्य कमलनें त्रिसिअनेरा कमलना परिधि तणेंकरी चोपखेरइ बोळ्युछइ। ते केही माहिली परिधि वीचली परिधि बाहरली परिधि माहिली कमलनी परिधि बत्तीस लाष कमलळें, विचली कमलनी परिधि चालीसलाष कमलळें, बाहिरली कमलनीपरिधि अडयाली सलाष कमल

णबहिर्भवेन । एतदेवव्यनक्ति । आभ्यन्तरपद्मपरिक्षेपे द्वात्रिंशत्पद्मानां शतसहस्राणि लक्षाणि मध्यमके चत्वारिंशत्पद्मलक्षाणि बाह्येऽष्टचत्वारिंश
त्पद्मलक्षाणि प्रज्ञप्तानि ? इदंच पद्मपरिक्षेपत्रिकं आभियोगिकदेवसंबंधिबोध्यं, अतएव भिन्नत्रिकख्यापनपरसूत्र निर्दिष्टं । अन्यथा सूत्रकृतचतुर्थ
पञ्चमषष्टपरिक्षेपाः इत्येवाऽकथयिष्यत । ननु तर्हिआभियोगिकजातीयानामेकएवात्मरक्षकाणामिव वाच्यः । उच्यते उच्चमध्यनीचकार्यनियोज्यत्वेना
भियोगिकानां भिन्नत्वेन परिक्षेपस्यापि भिन्नत्वात् । अथपरिक्षेपत्रिकस्य पद्मसर्वाग्रमाह । एवमेवइत्यादि । एवमेवोक्तन्यायेन सपूर्वापरेण पूर्वापर
समुदायेन त्रिभिः पद्मपरिक्षेपै रेकापद्मकोटी विंशतिश्च पद्मलक्षाणि भवन्तीत्याख्यातं मयाऽन्यैश्च तीर्थकृद्भिः संख्यानयनच स्वयमूह्यं । षण्णांपद्म
परिक्षेपाणां मुख्यपद्मेनसह मीलने सैवसंख्या पंचाशत्सहस्रैकशतविंशत्यधिका ज्ञातव्या । स्थापनायथा । १२०५०१२० ननुकमलानि कमलिन्याः
पुष्परूपाणि भवन्ति मूलकन्दस्य कमलिन्या एव भवतः नतु कमलस्य तत्कथमत्र मूलकन्दावुक्तौ, उच्यते । कमलान्यत्रनवनस्पतिपरिणामानि किंतु
पृथिवीकायपरिणामरूपाः कमलाकारवृक्षा स्तेनैषामिमौ नविरुद्धाविति । अत्राद्यपरिक्षेपपद्मानां मूलपद्मादर्द्धमानं सूत्रकृता साक्षादुक्तं उत्तरोत्तरप
रिक्षेपपद्मानांतु पूर्व २ परिक्षेपपद्मेभ्यो ऽर्द्धार्द्धमानायुक्तितः संगच्छते । विजयप्रासादपंक्तेरिव अन्यथाऽल्पर्द्धिकमहर्द्धिकदेवानामाश्रयतारतम्यं चतुर्थी

॥ टीका ॥

**वत्तीसं पउमसयसाहस्सीओ पं० ? मज्झिमए पउमपरिक्खेवे चत्तालीसं पउमसयसाहस्सीओ पं० ! बाहिरए पउम
परिक्खेवे अडयालीसं पउमसयसाहस्सीओ पं० ! एवामेव सपुव्वावरेणं तेहिं पउमपरिक्खेवेहिं एगापउम**

॥ मूल ॥

पद्मपरिक्षेपाभिः सर्वतः समन्तात् सपरिक्षिप्त ? तद्यथा आभ्यन्तरिकेण बाह्येनमध्यमेनच, आभ्यन्तरपद्मपरिक्षिपे द्वात्रिंशत् पद्मशातसहस्रा
णि प्रज्ञप्तानि ? मध्यमकेपद्मपरिक्षेपे चत्वारिंशत्पद्मशतसहस्राणि ? बाह्येपद्मपरिक्षेपे ऽष्टचत्वारिंशत्पद्मशतसहस्राणि प्रज्ञप्तानि ? एवमेव

॥ अनु० ॥

छट्ठा इणारीत पूर्वला कहला त्रिणकमलना परिधि थइने एक काडिकमल अनें बीस लाष १२०००००० एहवो कह्यो तीर्थंकरे । (मूलकमलं १ प्रथम
परिधि १०८ । परिधि इ४०११२।३ परिधि १६००८।४ परिधि ३२०००।५ परिधि ४०००००,६ परिधि ४८००००० सर्वमेली १२०५०१२० एतली कमल शाश्वता

॥ भाषा ॥

दिमद्दापरिक्षेपपद्मानामवकाशः शोभमानस्थितिकत्वंच नसंभवेत् । अर्द्धार्द्धमानताचैवं । मूलपद्मंयोजनप्रमाणं, आद्येपरिक्षेपे पद्मानिद्विक्रोशमानानि, द्वितीयेक्रोशमानानि, तृतीये ऽर्द्धक्रोशमानानि, चतुर्थेपञ्चधनुःशतमानानि, पञ्चमेसार्द्धद्विशतधनुर्मानानि, षष्ठेसपादशतधनुर्मानानि, तथा मूलपद्मापेक्षयासर्वपरिक्षेपेषु जलादुच्छ्रयप्रमाणोप्यर्द्धार्द्धक्रमेणज्ञेयः । यथा मूलपद्मं जलात् क्रोशद्वयमुच्छ्रयः । आद्येपरिक्षेपे क्रोशउच्छ्रयः, द्वितीये क्रोशार्द्धं, तृतीये क्रोशचतुर्थांशः, पंचमे क्रोशषोडशांशः, षष्टे क्रोशद्वात्रिंशांशइति । एवमेव मूलपद्मापेक्षयापरिक्षेपपद्मानां बाहुल्यमप्यर्द्धार्द्धक्रमेण वाच्यं । ननु षट्परिक्षेपाइति विरुध्यते । योजनात्मनासहस्रत्रयात्मकस्य धनुरात्मनाद्विकोटिद्विषष्टिचत्वारिंशल्लक्षप्रमाणस्य दृढ़परमपरिधेः षष्टपरिक्षेपपद्मानां षष्टिकोटिधनुःक्षेत्रमात्रव्यानां एकापंक्त्या कथमवकाशः संभवति । एवं प्रथमपरिक्षेपवर्जे शेषपरिक्षेपाणामपि तत्तत्परिधिमानपद्ममाने परिभाव्यवाच्यं उच्यते । षटपरिक्षेपाइत्यत्र षट्जातीयाःपरिक्षेपा इति ग्राह्यं । आद्यामूलपद्मार्द्धमानाजातिः, द्वितीयातत्पादमाना, तृतीया तदष्टमभागमाना, चतुर्थी तत्षोढ़शभागमाना पञ्चमी तद्द्वात्रिंशत्तमभागमाना, षष्टीतच्चतुःषष्टितमभागमाना, ततश्चतत्तत्परिधिक्षेत्रपरिक्षेपपद्मसंख्या पद्मविस्तारान् परिभाव्य यत्रयावत्यः पंक्तयः संभवन्ति गणितज्ञेन करणीया स्तत्र तावतीभिः पंक्तिभि रेकएवपरिक्षेपोज्ञेयः पद्मानामेकजातीयत्वात् किमुक्तंभवति महापरिक्षेपएकएकया पंक्त्यानसमाति । दृढ़परिधिक्षेत्रस्याल्पत्वात् पद्मानांचबहुत्वात् ततः पंक्तिभिः पद्मानि पूरणीयानि, एवंपरिक्षेपः पूर्णोभवति दृढ़परिधेश्च प्रतिपरिक्षेपं भिन्नमानकत्वात् सर्वपद्मपरिक्षेपो भिन्नएव लक्ष्यतेइति । नच दृढ़क्षेत्रस्याल्पत्वमितिवाच्यं । अत्र गणितपदक्षेत्रस्य पंचलक्षयोजनप्रमाणत्वात् सहस्रयोजनप्रमाणायामस्य पञ्चशतयोजनविष्कम्भेन गुणने एतावतएवलाभात् पद्मावगाढक्षेत्रंतु सर्वसंख्यया विंशतिःसहस्राणि पञ्चाधिकानि योजनानां षोढ़शभागीकृतस्यैकस्य योजनस्य त्रयोदशभागाः २०००५ १३ ॥ तथाहि । मूलपद्मावगाढो योजनमेकं जगतीच द्वादशयोजनानि मूलेपृथुरिति जगतीपूर्वापरभागःसत्कमूलव्यासमूलपद्मव्या १६ सायामीलनेनपञ्चविंशतिर्योजनानीति । तथा तत्परिधौप्रथमः परिक्षेपो ऽष्टोत्तरशतपद्मानां तदवगाढक्षेत्रं सप्तविंशतिर्योजनानि अर्द्धयोजनप्रमाणत्वेन तेषामेकस्मिन् योजने चतुर्णामवकाशा श्चतुर्भिरष्टोत्तरशते भक्ते एतावतामेवलाभात् । ननु योजनार्द्धमानवतां तावतां चतुः पञ्चाशद्योजनानि संभवेयुरिति । सत्यं क्षेत्रबहुत्वादेकपंक्त्या व्यवस्थितत्वेन प्रत्येकं योजन

चतुर्थांशावगाहकत्वेन च उक्तसंख्यैवसमुचिता । अत्र पद्मरुद्धक्षेत्रस्यैव भजनादिति तथाद्वितीयः परिक्षेपः एकादशाधिकचतुस्त्रिंशत्सहस्राणां तदवगाहक्षेत्रं द्वेसहस्रे पञ्चविंशत्यधिकंशतं च योजनानां एकादशच भागा योजनस्य २१२५ ११ उपपत्तिस्तु योजनपादप्रमाणत्वादिमानि षोडशमांतीति ३४०११ इत्ययंपरिक्षेपपद्मराशिः षोऽशभिर्भज्यते आगच्छत्यनंतरोक्ता १६ राशिः अस्यांचपरिक्षेपजातौ पंक्तयः सूत्रोक्तस्वस्वदिशिनिवेशनीयपद्मनिवेशनेन विषमवृत्ताः सम्भाव्यंते पद्मानां विषमसंख्याकत्वादिति । अथतृतीयपरिक्षेपः षोडशसहस्रपद्मानां तदवगाहक्षेत्रं द्वेशते पञ्चाशदधिके योजनानां २५० उपपत्तिस्तु अमूनि योजनाष्टमभागप्रमाणत्वाद्योजने चतुःषष्टिर्मांतीति चतुःषष्ट्या १६००० प्रमाणः पद्मराशिर्भज्यते उपतिष्ठते चायंराशिः । अत्रच पंक्तयः समवृत्ता एवनिवेशनीयाः यथेष्टं चतुर्दिक्षु पद्मानां निवेशनादिति । अथ चतुर्थःपरिक्षेपो द्वात्रिंशल्लक्षपद्मानां तदवगाहक्षेत्रं द्वादशसहस्राणि पंचशताधिकानि योजनानां १२५०० आनयनोपायस्तु एषां योजनषोऽशभागप्रमाणत्वाद्योजने २५६ मांतीति षट्पंचाशदधिकशतद्वयेन ३२००००० इत्ययं पद्मराशिर्भज्यते ततो यथोक्तो राशिरायातीति । तथा पञ्चमपरिक्षेपश्चत्वारिंशल्लक्षपद्मानां तदवगाहक्षेत्रं त्रीणि सहस्राणि नवशतानिच षऽधिकानि योजनानां चत्वारश्च षोऽशभागा योजनस्य ३९०६ ४ उपपत्तिस्तु एषां योजनद्वात्रिंशत्भांशप्रमाणत्वादमूनि योजने १०२४ मांतीति चतुर्विंशत्यधिकसहस्रेण ४०००००० रूपस्य १६ पद्मराशे र्भागहरणेन आप्यते । यथोक्तराशिरिति । अथषष्ठपरिक्षेपो ऽष्टचत्वारिंशल्लक्षपद्मानां तदवगाहक्षेत्रं एकादशएकादशशतानि एकसप्तत्यधिकानि योजनानां चतुर्दशषोडशभागाः योजनस्य ११७१ १४ उपपत्तिश्चात्राऽमीषां योजनचतुःषष्टितमांशप्रमाणत्वा द्योजने ४०९६ मांतीति षञ्चवत्यधिकचतुःसहस्रै ४८००००० १६ रित्यस्य पद्मराशेर्भागहरणात् यथोक्तो राशिरुपपद्यतेइति । पूर्वापरपद्मक्षेत्रयोजनमीलनेनच पूर्वोक्तं सर्वाग्रंसंपद्यते । परिक्षेपाश्चात्र वृत्ताकारेषूद्धाः क्षेत्रस्य बहुत्वात् संभवंतीति पंक्तयश्चात्र दृढक्षेत्रस्यायतचतुरस्रत्वेन आयामविस्तारयो र्विषमत्वेपि पञ्चशतयोजनमर्यादयैव कर्तव्याः ततः परं व्यासस्तत्कपञ्चशतयोजनानां पर्यवसितत्वात् शोभमानाश्चोक्तरीत्यैव भवन्तीति । किञ्च इमानि पद्मानि शाश्वतानि पार्थिवपरिणामरूपत्वात् वातस्यतान्यपि बहूनि तत्रोत्पद्यंते, यदाहुः श्रीउमास्वातिवाचकपादाः, स्वोपज्ञजंबूद्वीपसमासप्रकरणे नीलोत्पलपुंडरीकशतपत्रसौगन्धिकादिपुष्पचितइति । अन्यथा श्रीवज्रस्वामिपादाः । श्रीदेवतास्तसर्पितानुयमे महापद्मा

नयनेन पुरिकापुर्य्यां कथं जिनप्रवचनप्रभावनाभकार्षुरिति । एतानिच शाश्वतानि तत्रत्यश्रीदेवतादिभि रवबोध्यमानत्वात् । यदूचुः । श्रीहेमचन्द्र सूरयः । स्वोपज्ञपरिशिष्टपर्वणि । तदाच देवपूजार्थमवचित्यैकमंबुजं ॥ श्रीदेव्यादेवतागारं यांत्यावज्जैरदेवत १ इति । नन्वत्र मनन्तरोक्तोर्थः कथंप्रने तव्यः उच्यते । इदमेव द्वितीयपरिक्षेपसूत्रं प्रत्यायकं । तथाहि । अत्रैकादशाधिकचतुस्त्रिंशत्सहस्रकमलानि उक्तदिशिमापयितव्यानि तानिच क्रोश-मानानि एकपंक्त्याच तदाऽवकाशं लभेरन्„ यदा द्वितीयपद्मपरिधिरेकादशाधिकचतस्त्रिंशत्सहस्रक्रोशप्रमाणःस्यात्„ सच तदास्याद्यदामूलक्षेत्रा-यामव्यासौ साधिकषड्विंशतिशतप्रमाणौ स्यातां तौ प्रस्तुतेनस्त स्तेन यथासंभवं पंक्तिभिर्द्वितीयपरिक्षेपपद्मजातिः पूरणीयेति तात्पर्यं, एवमन्यपरि-क्षेपेष्वपि यथासंभवं भावनाकार्येति । अथकथमयमर्थः सिद्धांततां प्रापितइति उच्यते । अन्यथानुपपत्त्या नहि यथाश्रुतमात्रसंनिवेशं सूरयः सूत्रव्या ख्यानपरा भवन्ति, किंतु प्राक्परार्थाऽवरोधेन । यदुक्तं । जंजहसुत्तेभणिअं तहेव तंजइविआलणानत्थि । किड्डालिआणुगो दिट्ठोदिट्ठप्पहाणेहिं ति १ अलंप्रसंगेनेति । अथपद्मद्रहप्रतिनिरुक्तं पृच्छन्नाह । सेकेणट्ठेणमित्यादि । अथ केनार्थेन भदन्त! एवमुच्यते पद्मद्रहः पद्मद्रहइति । गौतम! प-द्मद्रहे तत्रतत्रदेशे तस्मिन् २ देशे २ बहूनिउत्पलानि यावत्शतसहस्राणि पद्मद्रहप्रभाणि पद्मद्रहाकाराणि आयतचतुरस्राकाराणीत्यर्थः । एतेन तत्र वानस्यतानि पद्मद्रहाकाराणि पद्मानि बहूनिसन्ति । ननु केवल पार्थिवानिवृत्ताकाराणि महापद्मादीन्येव तत्रसन्तीति ज्ञापित, तथा पद्मा द्रहवर्णसंवाज्ञाप्रतिभासोयेषातानि तथा ततस्तानि सदाकारत्वात्तद्वर्णत्वाच्च पदमद्रहाणीति प्रसिद्धानि ततस्तद्योगादयं जलाशयोपि पद्मद्रहः । उ भयेषामपि च नाम्नामनादिकालप्रवृत्तत्वेन नेतरेतराश्रयदोषः । अथपार्थिवपद्मतोप्यस्य नामप्रवृत्तिर्जातास्तीति ज्ञापयितुं प्रकारांतरेण नामनिबंध

कोडी वीसंच पउमसयसहस्सीउ भवंतित्तिमक्खाय ॥ सकेणट्ठेणं भंत! एवंवुच्चइ पउमद्दहे २ गो०! पउमद्द

सपूर्वापरं„ तैःपद्मपरिक्षेपैः एकापद्मकोटी विंशतिश्च पद्मशतसहस्राणि भवन्तीत्याख्यातं ॥ अथ केनार्थेन भदन्त! एवमुच्यते„ पद्मद्रहो गौ०! पद्म

पृथ्वी काय रूपपद्मद्रहनें विषेंछ एकेकथी अहंमान जाणवा ॥ तं किणिअर्थ हेंभगवान! इम कहीइ छे, पद्मद्रह एहवूनाम हेंगौतम! पद्मद्रहनें विषे

नमाह । श्रीश्चदेवीपद्मवासाऽत्रपरिवसति ततश्च श्रीनिवासयोग्यपद्माश्रयत्वात् व्योपलक्षितो द्रहइति पद्मद्रहइति पद्मद्रहआख्यायतेमध्यपद लोपिसमासात्समाधानं शेषंप्राग्वत् । अथ गङ्गामहानदीस्वरूपमाह । तस्यपद्मद्रहस्य पौरस्त्येन तोरणेन गङ्गानाम्नी महानदी स्वपरिवारभूतचतु र्दशसहस्रनदीसंपरिवृतेत्वेन स्वतंत्रतया समुद्रगामित्वेनच प्रकृष्टानदी एवंसिंध्वादिष्वपिज्ञेयो प्रव्यूढानिर्गतासती पूर्वाभिमुखी पञ्चयोजनशतानि पर्व तेन पर्वतोपरीत्यर्थः । अथवाणमितिप्राग्वत् । पर्वतेगत्वागङ्गावर्त्तननाम्निकूटे अत्र सामीप्येसप्तमी वटेगावःसुशेरते इत्यादिवत् । गङ्गावर्त्तनकूटस्या

हेणं तत्थ २ देसे २ तहिं २ बहवे उप्पलाइं जाव सयसहस्सपत्ताइं पउमद्दहप्पमाइं पउमद्दहवण्णाइं सिरीए इत्थ देवी महिड्ढीया जाव पलिओवमठिईया परिवसइ । सेएणट्ठेणं जाव अदुत्तरंचणं गो० ! पउम द्दहस्स सासए णामधेज्जे पं० ? जंणकयाइणासि, तस्सणंपउमद्दहस्स पुरत्थिमिल्लेणं तोरणेणं गंगामहाणई पव्वू ढासमाणी पुरत्थाभिमुही पंचजोअणसयाइं पव्वएणंगंता गंगावत्तए कूडे आवत्तासमाणी पंचतेवीसे जोअण

ह्रदः,, गौतम ? पद्मह्रदे तत्र तत्र देशे २ तानि २ बहून्युत्पलानि यावच्छतसहस्रपत्राणि पद्मह्रदप्रभाणि पद्मह्रदवर्णाभानि,, श्रीश्चात्रदेवी महर्द्धिका यावत्पल्योपमस्थितिकापरिवसति,, अथैतेनार्थेन,, अनन्तरञ्च गौतम ! पद्मह्रदस्य शाश्वतं नामधेयं प्रज्ञप्तम् ? यन्नकदाचिदस्ति तस्यपद्मह्रदस्य पौ- रस्त्येन तोरणेन गङ्गामहानदी प्रव्यूढासती पूर्वाभिमुखी पञ्चयोजनशतानि पर्वतेगत्वा गङ्गावर्तनकूटे आवृत्तासती पञ्चत्रयोविंशद्योजनशतानि

तेते देशें स्थानिकें तिहां २ घणां उत्पलकमल यावत् सहस्रपत्र कमल पद्मद्रहनें आकारे पद्मद्रह सरीषांछे, श्रीनामे इहादेवी महाऋद्धिवंत यावत् एकपल्योपमनें आउषावंत वसइ छइ । तेणें अर्थे इमकहीए छइ, यावत् निरंतरपणें हेगौतम! पद्मद्रहनुं साश्वतुं नामछइ । ते पद्मद्रहनें पूर्व दिशिनें तोरणथी गंगानामें मोटीनदी नीकलीयकी पूर्वदिशि साहमी पांचसें योजन पर्वत उपरि जाईनें गंगावर्त्तनामा कूटेकूटहेठें फिरिनइ

॥ टीका॥
॥ मूल ॥
॥ अनु० ॥
॥ भाषा ॥

क्तं योजन ५ ३ कला ३ यद्यप्यत्र कला त्रिकंकिञ्चित् समधिकार्द्धयुक्तमायाति । तथाप्यल्पत्वान्नविवक्षितमिति । अथजिह्विकाया अवसरः । गङ्गामहा णईजत्थपवडइ इत्यणमित्यादि । गङ्गामहानदी यतःस्थानात्प्रपतति । अत्रान्तरे महतीएकाजिह्विका प्रणालापरपर्याया प्रज्ञप्ता ? सायंइत्यादि । साजि ह्विका अर्द्धयोजनमायामेन षट्सक्रोशानि योजनानि विष्कंभेन गङ्गामूलव्यासस्य मानत्वात् । अर्द्धक्रोशं बाहल्येन पिंडेन विवृतंप्रसारितं यन्मकर मुखं जलधरविशेषमुखं तत्संस्थानसंस्थिता विशेषवज्रस्य परनिपातः प्राग्वत्, सर्वात्मनावज्रमयी इत्यादिकत्वं । अथ प्रपातकुंडस्वरूपमाह । गङ्गाम- हाणइं इत्यादि । गङ्गामहानदी यत्रप्रपतति । अत्रान्तरे महदेकं गङ्गाप्रपातकुंडं नाम यथार्थनामकंकुंडं प्रज्ञप्तं ? षष्टियोजनान्यायामविष्कंभाभ्यां । अ- त्र किरणविभावनायां मूलेपञ्चासं जोअणविच्छारो ५० उवरिंसट्ठी ६० इति विशेषोस्ति । श्रीउमास्वातिवाचककृतजंबूद्वीपसमाससूत्रादावपि तथैव । इ- त्थंच कुंडस्य यथार्थनामतोपपत्तिरपि भवति । एवमन्येष्वपि यथायोगं ज्ञेयमिति । तथानवतं नवत्यधिकं योजनशतं किञ्चिद्विशेषाधिकं परिक्षेपेण । श्री

॥ टीका ॥

मगरमुहविउहसंठाणसंठिआ सव्ववइरामइ अच्छा सण्हा, गंगामहाणई जत्थ पवहइ । एत्थणं महंएगे गंगाप्प वायकुंडेणामं कुंडे पं० ? सट्ठिंजोअणाइं आयामविक्कंभेणं णउअं जोअणसयं किंचिविसेसाहियं परिक्खे वेणं दसजोअणाइं उव्वेहेणं अच्छे सण्हे रययामयकूलें समतीरे वइरामयपासाणे वइरतले सुवण्णसुद्ध

॥ मूल ॥

॥ अनु० ॥

अर्द्धक्रोशं बाहुल्येन, मकरमुखविवृतसंस्थानसंस्थिता सर्ववज्रमयी अच्छा श्लक्ष्णा, गङ्गामहानदीयत्र पतति । अत्र महदेकं गङ्गाप्रपातकुण्डं नाम्ना कुण्डं प्रज्ञप्तं ? षष्टियोजनानि आयामविष्कम्भाभ्याम्, नवतियोजनशतानि किंचिद्विशेषाधिकानि परिक्षेपेण, दशयोजनान्युद्वेधेन, अच्छंश्लक्ष्णं

॥ भाषा ॥

पछे, गंगामहानदी जिहांथी पडइ, तिहां मोटो एकजोभी प्रणालिछें, ते जिभी प्रणालि अर्द्धयोजन लांबपणे सवाछ ६। योजन पोहलपणें अर्द्धकोस जाडपणें मगरमछनुं मुख विवृत पसार्युं ते संस्थान संस्थितछे, सर्ववज्ररत्नमय निर्मल सुकोमलछें, गंगामहानदी जिहां पडेछइ, तिहां मोटो एक गंगा

क्तं योजन ५ ३ कला ३ यद्यप्यत्र कला त्रिकंकिञ्चित् समधिकार्द्धयुक्तमायाति । तथाप्यल्पत्वान्नाविवक्षितमिति । अथजिह्विकाया अवसरः । गङ्गामहा णईजत्थपवडइ इत्यणमित्यादि । गङ्गामहानदी यतःस्थानात्प्रपतति । अत्रान्तरे महतीएकाजिह्विका प्रणालापरपर्याया प्रज्ञप्ता ? सायंइत्यादि । साजि ह्विका अर्द्धयोजनमायामेन षट्सक्रोशानि योजनानि विष्कंभेन गङ्गामूलव्यासस्य मातव्यत्वात् । अर्द्धक्रोशं बाहल्येन पिंडेन विवृतंप्रसारितं यन्मकर मुखं जलचरविशेषमुखं तत्संस्थानसंस्थिता विशेषस्य परनिपातः प्राग्वत्, सर्वात्मनावज्रमयी इत्यादिकत्वं । अथ प्रपातकुंडस्वरूपमाह । गङ्गाम- हाणई इत्यादि । गङ्गामहानदी यत्रप्रपतति । अत्रान्तरे महदेकं गङ्गाप्रपातकुंडं नाम यथार्थनामकंकुंडं प्रज्ञप्तं ? षष्टियोजनान्यायामविष्कंभाभ्यां । अ- त्र किरणविभावनायां मूलेपञ्चासं जोअणविच्छारो ५० उवरिंसट्ठी ६० इति विशेषोस्ति । श्रीउमास्वातिवाचककृतजंबूद्वीपसमाससूत्रादावपि तथैव । इ- त्थंच कुंडस्य यथार्थनामतोपपत्तिरपि भवति । एवमन्येष्वपि यथायोगं ज्ञेयमिति । तथानवतं नवत्यधिकं योजनशतं किञ्चिद्विशेषाधिकं परिक्षेपेण । श्री

मगरमुहविउहसंठाणसंठिआ सव्ववइरामइ अच्छा सण्हा, गंगामहाणइ जत्थ पवडइ । एत्थणं महंएगे गंगाप्प वायकुंडेणामं कुंडे पं० ? सट्ठिंजोअणाइं आयामविक्खंभेणं णउअं जोअणसयं किंचिविसेसाहियं परिरए बेणं दसजोअणाइं उव्वेहेणं अच्छे सण्हे रययामयकूले समतीरे वइरामयपासाणे वइरतले सुवण्णसुद्ध

अर्द्धक्रोश बाहुल्येन, मकरमुखविवृतसंस्थानसंस्थिता सर्ववज्रमयी अच्छा श्लक्ष्णा, गङ्गामहानदीयत्र पतति । अत्र महदेकं गङ्गाप्रपातकुण्डं नाम्ना कुण्डं प्रज्ञप्तं ? षष्टियोजनानि आयामविष्कम्भाभ्याम्, नवतियोजनशतानि किञ्चिद्विशेषाधिकानि परिक्षेपेण, दशयोजनान्युद्वेधेन, अच्छंश्लक्ष्णं

पछे, गंगामाहानदी जिहांथी पडछे, तिहां मोटी एकजीभी प्रणालिछें, ते जिभी प्रणालि अर्द्धयोजन लांबपणे सवाछ ६। योजन पोहलपणें अर्द्धकोस जाडपणें मगरमछनुं मुख विवृत पसार्युं ते संस्थान संस्थितछे, सर्ववज्ररत्नमय निर्मल चुकोमलछें, गंगामहानदी जिहां पडेछछ, तिहां मोटो एक गंगा

जिनभद्रगणिक्षमाश्रमणपादाः स्वोपज्ञक्षेत्रविचारसूत्रे, आयामोविरकंभो सट्ठिं कुंडस्स जोअणाहुंति । नउअसयंकिंचूणं परिहीदसजोअणोगाहो ॥ १ ॥ इत्युक्तं तद्वृत्तावपि श्रीमलयगिरिपादास्तथैव करणरीत्यापि तथैवागच्छति । तेन प्रस्तुतसूत्रगंभीरार्थंबहुश्रुतैर्विचार्यं । नास्मादृशां मन्दमेधसां मतिप्रवेशइति । यद्वा प्रस्तुतसूत्रं पद्मवरवेदिकासहितकुंडपरिधिविवक्षया प्रवृत्तमिति संभाव्यते, तेना दोष स्तत्त्वंतु केवलिगम्यमिति, दशयोजनान्युद्वेधोनोंडत्वेन अच्छंस्फटिकवद्बहिर्निर्मलप्रदेशं श्लक्ष्णश्लक्ष्णपुद्गलनिष्पादितबहिःप्रदेशं रजतमयंरूप्यमयं कूलं यस्य तत्तथा समानगर्त्तासद्भावतो विषमन्तीरं तीरवर्त्तिजलापूरितंस्थानं यस्मिन् तत्तथा वज्रमयाः पाषाणाः भित्तिबंधना यस्य तत् तथा वज्रमयंतलं यस्य तत्तथा सुवर्णंपीतहेमसुष्ठुरूप्यविशेषः रजतंप्रतीतं तन्मय्यो वालुका यस्मिन् तत्तथा वैडूर्यमणिमयानि स्फटिकरत्नसंबंधिपटलमयानि प्रत्यवतटानि तटसमीपवर्त्त्यभ्युन्नतप्रदेशा यस्य तत्तत्तथा सुखेनावतारो जलमध्यप्रवेशनं यस्मिन् तत्तथा सुखेनोत्तारो जलमध्यात्बहिर्निर्गमनं यस्मिन् तत्तथा ततः पूर्वपदेन विशेषणसमासः तथा नानामणिभिःसुबद्धं तीर्थं यत्र तत्तथा, अत्र बहुव्रीहावपि क्तांतस्यपरनिपातो भार्यादिदर्शनात् प्राकृतशैलीवशाद्वा, तथावृत्तं वर्त्तुलं आनुपूर्व्येणक्रमेण नीचैर्नीचैस्तरत्नावरूपेण सुष्ठुअतिशयेन योजातोवप्रः केदारो जलस्थानं तत्रगंभीरमलब्धस्ताद्यं जलं यस्मिन् तत्तथा, संछन्नानि जलेनांतरितानि पत्रबि

रययामयवालुआए वेरुलिअमणिफालिअपडलपच्चोअडे सुहोआरे सुहोत्तारे णाणामणितित्थसुबद्धे वट्टे आणुपुव्वसुजायवप्पगंभीरसीअलजले संछण्णपत्तभिसमुणाले बहुउप्पलकुमुअणलिणसुभगसोगंधिअ

रजतमयकूलं समतीरं वज्रमयपाषाणं वज्रतलं सुवर्णशुभ्ररजतमयवालुकं वैडूर्यमणिस्फाटिकपटलप्रत्यवतटं सुखावतारं सुखोत्तारं नानामणितीर्थं

प्रपात कुंडएहवें नामेंठे, साठि योजन लाबपणें पोहल पणें एक सोनेऊ १८० योजन काहिक अधिकेरा परिधिपणइ दशयोजन उंडपणें निर्मल सुहालो रूपामय कूलतटइं तीरां जेहनुं वज्ररत्नमयछें पाषाणजिंत्ति बांधबाना जिहां वज्ररत्नमयछे तलु जेहनु पीलांसोनुं सुष्ठ ते सुष्ठते रूपविसेष र जततेमयछे बेलू जिहां वैडूर्यरत्न मणिफटिकरत्न समूहमयछइ प्रत्यवतट ऊपरना तटजिहां एहयो सुखेजलमांहि पैसवो सुखें बाहिर नीकलवोछें अनेक

समृणालानि यस्मिन् तत्तथा । अत्रबिसमृणालसाहचर्यात् पत्राणि पद्मिनीपत्राणि द्रष्टव्यानि बिसानिकन्दाः मृणालानि पद्मनालानि बहूनामुत्पलकुमुदनलिनसुभगसौगन्धिक पुंडरीकमहापुंडरीकशतपत्रसहस्रपत्रशतसहस्रपत्राणां प्रफुल्लानां विकस्वराणां केसरैः किञ्जल्कैरुपशोभितं मृतं विशेषणस्य व्यस्ततया निपातः प्राकृतत्वात् षट्पदैर्भ्रमरैः परिभुज्यमानानि कमलानि उपलक्षणमेतत् कुमुदादीनि यस्मिन् तत्तथा अच्छेन स्वरूपतः स्फटिकवत् शुद्धेन विमलेनागंतुकमलरहितेन पथ्येनारोग्यकरणेन सलिलेन पूर्णं तथा पडिहत्थाअतिप्रभूताः देशीशब्दोयं भ्रमन्तो मत्स्यकच्छपा यत्र तत्तथा अनेकशकुनिमिथुनकानां पूर्वविचरितमितस्ततोगमनं यत्र तत्तथा ततःपूर्वपदेन विशेषणसमासः । तथाशब्दोत्रतिकं उन्नतशब्दकं सारसादिजलचररुतापेक्षया मधुरस्वरंच हंसभ्रमरादिकूजितापेक्षया एवंविधं नादितं पलितं यत्र तत्तथा । अत्रच यत्कानिचिद्विशेषणानि पुस्तुतसूत्रदृश्यमानादर्शापेक्षया व्यस्ततया लिखितानिसंति तज्जीवाभिगमवाप्यादिवर्णकसूत्रस्य बहुसमानगमकतया तदनुसारेणेति बोध्यं। एवमन्यत्रापि । पासाईएति । अनेन पासाईए दरिसणिज्जे अभिरूवे पडिरूवे इति पदचतुष्टयं ग्राह्यं । तत्प्राग्वत् । अथात्र पद्मवरवेदिकादिवर्णनायाह ॥ सेणंइत्यादिव्यक्तं । अत्र

॥ मूल ॥

पोक्खरीणीमहापोक्खरीणीसयपत्तसहस्सपत्तसयसहस्सपत्तपफुल्लकेसरोवचिए छप्पयपरिभुज्जमाणकमले अच्छ विमलपच्चूसलिलपडिपुण्णे पडिहत्थभमंतमच्छकच्छभअणेगसउणगणमिहुणपविचरिए सद्दुन्नइअमहुरसर

॥ अनु० ॥

सुबद्धं वृत्तं आनुपूर्व्यसुजातवप्रगम्भीरशीतलजलं सछन्नपत्रबिसमृणालबहूत्पलकुमुदनलिनसुभगसौगन्धिक पुंडरीक महापुंडरीक शतपत्र सहस्रपत्रशतसहस्रपत्रप्रफुल्लकेसरोपचितं षट्पदपरिभुज्यमानकमलं अच्छविमलपथ्यसलीलप्रतिपूर्णं प्रतिहत्तभ्रमन्मत्स्यकच्छपं अनेकशकुनिगणमिथुनप्रविचरितं

॥ भाषा ॥

मणिरत्नेकरी सुबद्धछें तीथ जहनो एहवा बाटलोछइ अनुक्रमे भलो वप्र केआरो जलस्थानके तिहां गभीर ऊंडो सीतल जलछे ढाक्या एहवा पत्र कमलिनीना पानछइ जिहां घणा उत्पत कुमुद नलिन सुभग सौगंधिक पुंडरीक माहापुंडरीक सतपत्र सहस्रपत्र लक्षपत्र एहवां कमल प्रफुल्लविकस्वर केशराइं करीनें उपचित सहित छइ षट्पदभमरो भोगवीताछे कमल जिहां आछो निर्मल पथ्यरोग रहित एहवो पाणीइंकरी प्रतिपूर्ण छें पछिछ

॥ टीका ॥

मुखावतारोद्धारौ कथंभवत इत्याह । तस्मणमित्यादि । तस्य गङ्गाप्रपातकुंडस्य त्रिदिशि दिक्त्रये वक्ष्यमाणलक्षणे त्रीणित्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि, एतद्व्याख्याप्राग्वत् । शेषंव्यक्तं । तेसिणमित्यादि । व्यक्तं, जगतीवर्णकतुल्यत्वात् नवरं, अवलंबनाः अवतारोद्धारयो रालंबनहेतुभूताः अवलम्बनबाह्यावयवाः अवलम्बनबाह्यानां द्वयोःपार्श्वयोरवलम्बमाश्रयभूताभित्तयः । तेसिणमित्यादि तेषां त्रिसोपानप्रतिरूपकाणां पुरतःप्रत्येकं २

॥ मूल ॥

णाईए पासाईए ॥ ४ ॥ सेणंएगाए पउमवरवेइआए एगेणय वणसंडेणं सव्वओसमंता संपरिक्खित्ते । वेईआवणसंडाणं पमाणं वण्णओ जाणिअव्वो ॥ तस्सणं गंगप्पवायकुंडस्स तिदिसि तओ तिसोवाणपडिरूवगा पं० ? तं०—पुरत्थिमेणं दाहिणेणं,, पच्चत्थिमेणं तेसिणं तिसोवाणपडिरूवगाणं अयमेआरूवे वण्णावासे पं० ? तं०—वइरामयणेमा रिट्ठामयापइट्ठाणा वेरुलिआमयाखंभा सुवण्णरूप्पमया फलया लोहिअक्ख

॥ अनु० ॥

शब्दोन्नतिकं मधुरस्वरनादितं प्रासादीयं,, तत् एकया पद्मवरवेदिकया एकेनच वनखण्डेन सर्वतः समन्तात्संपरिक्षिप्तम्,, वेदिकावनखंडयोः पद्मानांच वर्णको भणितव्यइति । तस्य गङ्गाप्रपातकुण्डस्य त्रिदिशित्रीणित्रिसोपानकप्रतिरूपकाणि प्रज्ञप्तानि ? तद्यथा । पौरस्त्ये दाक्षिणात्ये पाश्चात्ये,, तेषांत्रिसोपानकप्रतिरूपकाणां अयमेतद्रूपोवर्णावासः प्रज्ञप्तः ? तद्यथा वज्रमयानेमाः रिष्टमयानिप्रतिष्ठानानि वैदूर्यमयाः स्तम्भाः सुवर्णरूप्यमयाः

॥ भाषा॥

स्तघणा भमता मास कल्पजडे जिहां अनेक पंखीना समुदाय तेहना जोडलानुं प्रविचरित विचरछइ मोटा शब्द तथा मधुरस्वरपंखी प्रमुखना तेणइ करी नादवंतछइ चित्तनें प्रसन्नकारी जोवायोग्यछइ तेकुंड एकपद्मवरवेदिकाइं अनें एकें वनखंडेकरी चोफखेर वीटयोछइ। वेदिका वनषंडनो प्रमाणने वर्णक पूर्वलीपरी जाणवो, ते गंगाप्रपातकुंडनें त्रिदिशिदिशि त्रिण्य त्रिसोपान पगथालियाछइ । तेकेहा पूर्वदिशि दक्षिणदिशि पश्चिमदिशि ते त्रिसोपान पगथालिआनो एहवो वर्णव्यासछें। तेकेहवो वज्ररत्नमय नियमछइ अरिष्टरत्नमय प्रतिस्थान स्थानकछइ वैडूर्यरत्नमय थालाछें सोनारूपामय पाटियाछें

२ तोरणानि प्रज्ञप्तानि ? तानि तोरणानि नानामणिमयानि नानामणिमयेषु स्तंभेषु उपनिविष्टानि सामीप्येनस्थितानि तानिच कदाचि च्चलानि स्यानत्राष्टानीत्यर्थः,, अथवा अपदूपतितानिनवेयुरिति सन्निविष्टानि सम्यग्निश्चलतया अपदूपरिहारेणच निविष्टानि ततोविशेषण- समासः विविधा नानाविच्छित्तिकलिता मुक्तामुक्ताफलानि अन्तराशब्दोऽगृहीतवीप्सोपि सामर्थ्याद्वीप्सांगमयति अन्तरांतराले अधिआधारोपिता यत्र तानि तथाविविधैस्तारारूपैस्तारिकारूपैरूपचितानि तोरणेषुहि शोभार्थंतारिकानिबध्यंतेइति प्रतीतं, लोकेपि ईहामृगाःवृकाः ऋषभावृषभाः व्यालाभुजगाः रुरवोमृगविशेषाः शरभाअष्टापदाः चमराश्चाटव्यागावः वनलताअशोकादिलताः प्रतीताः पद्मलताःपद्मिन्यः शेषंप्रतीतं एतासां भ-

॥ टीका॥

मईए सूईए वइरामयासंधी णाणामणिमया आलंबणा आलंबणबाहाए ॥ तेसिणं तिसोवाणपडिरूवगाणं पुरओ पत्तेयं २ तोरणा पं० ? तेणं तोरणा णाणामणिमया णाणामणिमएसु खंभेसु उवणिविठ्ठसंणिविठ्ठा विविह मुत्तंतरोवइया विविहतारारूवोवचिया ईहामिउसभतुरगणरमगरविहगवालगकिंनररुरुसरभचमरकुंजरव

॥ मूल ॥

फलकाः लोहिताक्षमय्यः सूचयः वज्रमय्यःसंधयः नानामणिमयान्यालम्बनानि आलम्बनबाहाइति । तेषां त्रिसोपानकप्रतिरूपकाणां पुरतः प्रत्येकंप्रत्येकं तोरणानि प्रज्ञप्तानि ? तानि तोरणानि नानामणिमयानि नानामणिमयेषु स्तम्भेषु उपनिविष्टसन्निविष्टानि विविधमुक्तान्तरोपचितानि विविधतारारूपोपचितानि ईहामृगर्षभतुरगनरमकरविहगव्यालककिन्नररुरुशरभचमरकुञ्जरवनलतापद्मलताभक्तिचित्राणि स्तम्भोद्गतवज्रवेदि

॥ अनु० ॥

लोहिताक्षरत्नमय सूईषीलाळे वज्ररत्नमय संधिआंतरालइ अनेक मणिमय आलंबना बाहा चढता ऊतरता आलंबननी निंतळे जिहां तेहत्रिसोपान पगथालिआनइं आगलि प्रत्येक २ तोरणछइ । तेतोरण केहवाळें अनेक मणिमयळें अनेक प्रकारना मणिमय खंभनें विषे उपनिविष्टळें सम्यग् प्रकारे रह्याछइ विविध प्रकारनां मुक्ताफल तेहने आंतरेकरी पुष्टछइ विविध प्रकारने तारिका एकरी उपचित पुष्टछइ ईहा मृगते वृक वलद् घोडा

॥ भाषा ॥

रूपोवि ञ्जिसय स्ताञ्जिश्चित्राणि स्तंभोद्गतया स्तंभोपरिवर्त्तिन्या वज्रवेदिकया परिगतानि परिकरितानि सन्ति यानि अञ्जिरमणीयानि तानि तथावि द्याधरयोर्विशिष्टशक्तिमत्पुरुषविशेषयो र्यमलं समश्रेणीकं युगलं द्वंद्वं तेनैवयंत्रेण संचरिष्णुपुरुषप्रतिमाद्वयरूपेण युक्तानि, आर्षत्वाच्चैवंविधसमासः, अथवा प्राकृतत्वेन तृतीयालोपात् विद्याधरयमलयगुलेनैवेति शेषपूर्ववत् अर्च्चिषांमणिरत्नप्रभाणां सहस्रैर्मालनीयानि परिवारणीयानि रूपकसह-

॥टीका॥

णलयपउमलयभत्तिचित्ता खंभुग्गयवइरवेइआपरिगयाभिरामा विज्जाहरजमलजुअलजंतजुत्ता विव अ र्च्चीसहस्समालणीआ रूवगसहस्सकलिआ भिसमाणा भिब्भिसमाणा चक्खूलोअणलेसा सुहफासा सस्सि रीयरूवा घंटावलिचलिअमहुरमणहरस्सरा पासाईआ ॥ ४ ॥ तेसिणं तोरणाणं उवरिंवहवे अट्ठमंगलगा पं० ? तं० सोत्थिअ सिरिवच्छ जाव पडिरूवा । तेसिणं तोरणाणं उवरिं वहवे किण्हाचामरद्धया जाव

॥ मूल॥

कापरिकगतारभिरामानि विद्याधरयमलयुगलय·त्रयुक्तानि अर्च्चिःसहस्रमालनीयानि रूपकसहस्रकलितदृशमानभासमानानि चक्षुर्लोकनलेश्यानि शुभ स्पर्शानि सश्रीकरूपाणि घण्टावलिचलितमधुरमनोहरस्वरानि,, तेषां तोरणानामुपरि बहूनि अष्टाष्टमाङ्गलिकानि प्रज्ञप्तानि,, तद्यथास्वस्तिक श्रीव त्सयावत्प्रतिरूपाणिप्रासादीयानि तेषां तोरणानां उपरि बहवः कृष्णचामरध्वजाः यावच्छुक्लचामरध्वजाः अच्छाः श्लक्ष्णाः रूप्यमयाःपटाः वज्रमय

॥ अनु० ॥

मनुष्य मगर मत्स्य पंषी सर्प्प किनरदेवता मृगविसेष अष्टापदे चमरीगाइ हाथी वनलताबेलि पद्मलता कमलीनी तेहनी भांतिकरी चीत्र्याछे स्यंत्रा ऊपरिगत वज्ररत्नमी बेदिका तेणेकरी सहित मनोहर विद्याधरना जमल युगल पुरुषस्त्रीना जोडला जंत्रयुक्त प्रतिमा प्रतिमाजुग रूपयुक्त किरण सह अगमें तेणें करी मालती सोभावंतछइ सहअगमे रूपेकरी सहितछे भृशं अत्यंत मानोपेतछइ अत्यंत देदीपमानछइ आषिने जोबाजोग्यछे सुषकारी स्पर्शछइ सश्रीक भलु रूपछे जेहनो घंटानी श्रेणिनो बायुवशेकरी कंपायमान मधुरो मनोहर स्वरछे जिहा मनप्रसंनकरें देषवायोग्य । तेहतोरणनइं

॥ भाषा॥

स्वकलितानीति स्पष्टं, भृशमत्यर्थं भानंप्रभाणं येषांतानि तथा भिस्भिसमाणाति । भासेर्जिसइत्यनेन भिसादेशे प्रकृष्टार्थप्रत्ययेच रूपसिद्धिः । अत्यर्थं देदीप्यमानानि लोकनेसतिचक्षुषोलेशः श्रेयो यत्र तानि त्रिपदोबहुव्रीहिः पदविपर्यासः प्राकृतत्वात् शेषं सुबोधं नवरं । घंटावलेर्वातवशेन चलिता या मधुरोमनोहरश्चस्वरो येषु तानि तथा । तेसिणमित्यादि । अस्यव्याख्याप्राग्वत् । तेसिणमित्यादि । तेषां तोरणाना मुपरि बहवःकृष्णचामरयुक्त चामरध्वजाः एवं नीलचामरध्वजादयोपि वाच्याः, तेच सर्वेपि कथंभूताइत्याह । अच्छाआकाशस्फटिकवदतिनिर्मलाः श्लक्ष्णाःश्लक्ष्णपुद्गलस्कन्धनिर्मापिताः रूप्यमयो वज्रमयस्य दंडस्योपरिपट्टो येषां ते तथा । वज्रमयो दंडो रूप्यपट्टमध्यवर्ती येषांते तथा जलजानामिव जलजकुसुमानां पद्मादी-

॥ टीका ॥

सुक्किलचामरज्झया अच्छा सण्हा रुप्पमयापट्टा वइरामयादंडा जलयामलगंधिआ सुरम्मा पासाईआ ॥४॥
तेसिणं तोरणाणं उप्पिं बहवे छत्ताइछत्ता पडागाइपडागा घंटाजुअलाचामरजुअलाबहवे उप्पलहत्थगा
पउमहत्थगा जाव सयसहस्सपत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा । तस्सणं गंगाप्पवायकुंडस्स

॥ मूल ॥

दण्डा जलजामलगन्धिकाः सुरम्याः प्रासादीयाः, तेषां तोरणानामुपरिबहूनि छत्रातिछत्रपताका तिपताकाः घण्टायुगलानि चामरयुगलानि बहूनि उ
त्पलहस्तकानिपद्महस्तकानि यावत् शतसहस्रपत्रहस्तकानि सर्वरजतमयान्यच्छानि यावत्प्रतिरूपाणि तस्य गङ्गाप्रपातकुण्डस्य बहुसमध्यदेशभागे अत्र

॥ अनु० ॥

ऊपरि घणा आठमंगलीकळे। तेकेहां साथीनें १ श्रीवत्स २ यावत् प्रतिरूपळें तेह तोरणनें ऊपरि घणी काली चामर सहित ध्वजाळे यावत् धोला चामर युक्त ध्वजाळे आछी नीर्मल सुकोमल रूपामय दंडउपरि पट्टछइ जेहने वज्ररत्नमयळें दंडजेहनो कमलिनीपरि उत्तमळें गंधजेहनो अत्यंत मनोहर प्रसन्नकारी जोवायोग्य। तेह तोरणनें ऊपरि घणां नाहनां छत्र तेहथी मोटाछत्र नाहनी मोटी पताका ध्वजा घंटाना युगल जोडला चामरनां जोडला घणा उत्पल कमल हाथमांळें इहवारूप पद्महाथमाळे जेहने एहांरूप यावत् लक्षपत्र कमल हाथमांळें एहवारूप सर्वरत्नमय निर्मल

॥ भाषा ॥

नामिधामलो मतु कुट्रश्यगन्धसन्निश्रोयो गन्धः सविद्यते येषांते जलजामलगन्धिकाः अतोऽनेकस्वरादितीकप्रत्ययः, अतएव सुरम्याः पासाईआइत्यादिप्राग्वत् । तेसिणमित्यादि । अस्यव्याख्याप्राग्वत् । अथगङ्गाद्वीपवक्तव्यमाह । तस्सगङ्गापवायइत्यादि । तस्य गङ्गाप्रपातकुंडस्य बहुमध्यदेशभागे ऽत्रमहानेको गङ्गादेव्यावासभूतोद्वीपो गङ्गाद्वीपइति नाम्ना द्वीपः प्रज्ञप्तः ? मध्यलोपीसमासात्साधुः अष्टौयोजना न्यायामविष्कंभेन सातिरेकाणिपञ्च विंशतियोजनानि परिक्षेपेण द्वौक्रोशौ यावदुच्छ्रितो जलांतात् जलपर्यंतात् सर्वतोवर्त्तिजलस्य जलान्तावृत्तस्य क्षेत्रस्य द्वीपव्यवहारात् शेषंव्यक्तं । सेणमित्यादि । सगङ्गाद्वीप एकयापद्मवरवेदिकया एकेनवनखंडेन सर्वतःसमन्तात् संपरिक्षिप्तः । वर्णकश्च भणितव्यो जगतीपद्मवरवेदिकावदिति । अथतत्रयद्यदस्तितदाह । गङ्गादीवस्सणमित्यादि । गङ्गाद्वीपस्योपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः ? तस्य बहुमध्यदेशभागे अत्रांतरे गङ्गायादे-

॥ टीका ॥

वज्जमएहदेसभाए एत्थणं महंएगे गंगादीवेणामं दीवे पं० ? अठजोअणाइं आयामविक्खंभेणं, साईरेगाइं पणवीसं जोअणाइं परिक्खेवेणं, दोकोसे ऊसिए जलंताओ, सव्ववइरामए अच्छे सण्हे सेणं एगाए पउमवर वेइआए एगेणय वणसंडेणं सव्वओसमंता संपरिक्खित्ते । वण्णओ भाणिअव्वो, गंगादीवस्स २ उप्पिं बहुसमर

॥ मूल ॥

महानेको गङ्गाद्वीपोनाम्ना द्वीपः प्रज्ञप्तः, अष्टौ योजनान्यायामविष्कम्भाभ्याम्, सातिरेकाणि पञ्चविंशति योजनानिपरिक्षेपेण, द्वौक्रोशावुच्छ्रितो जलान्तात् सर्ववज्रमयः अच्छःश्लक्ष्णः, सचैकया पद्मवरवेदिकया एकेनच वनखण्डेन सर्वतःसमन्तात् संपरिक्षिप्तः, वर्णको भणितव्यः,

॥ अनु० ॥

यावत् प्रतिरूपछे । तेह गंगा प्रपात कूडने घणुं मध्य देशे समेविषि इहां मोटो एक गंगाद्वीपनामें दीपछें । आर्द्ध योजन लांबपणें पोहल पणइ काईक अधिक पंचवीस योजन परिधि पणें वेक्रोश ऊंचो पाणीथकी सर्वबज्ररत्नमय निर्मल सुकोमल । तेद्वीप एक पद्मवर वेदिकाइं करी एके वनखंडें करीने चोपखेर वीठ्योछे, वेदिका वनषंडनो वर्णन जाणिवो । ते गंगाद्वीपने ऊपरि घणु समो रमणिक भूमिभाग धरतीछे, तेहनें मध्यभागें समेविषि इहां

॥ भाषा ॥

व्या महदेकं भवनं प्रज्ञप्तं, आयामादिविज्ञानादिकं श्रव्यावर्णकपर्यंतं सूत्रं सव्याख्यानं श्रीजवनानुसारेण ज्ञेयं। अथनामान्वर्थंपृच्छति। सेकेणट्ठेणमि-त्यादि। व्यक्तं। अथगङ्गायथायत्रसमुपसर्पति। तथाह। तस्सणमित्यादि। तस्य गङ्गाप्रपातकुंडस्य दाक्षिणात्येन तोरणेन प्रव्यूढानिर्गतासती ग-ङ्गामहानदी उत्तरार्द्धभरतवर्षं इज्जती २ गच्छन्ती २ सप्तभिः सलिलानां नदीनां सहस्रैरापूर्यमाणा २ त्रियमाणा २ अधःखंडप्रपातगुहाया वैताढ्यपर्व तंदारयित्वा भित्त्वा दक्षिणार्द्धभरतंवर्षं इयूती २ दक्षिणार्द्धभरतवर्षस्य बहुमध्यदेशभागंगत्वा पूर्वाभिमुखी आवृत्तासती चतुर्दशभिः सलिलासहस्रैः समग्रासंपूर्णा आपूर्यमाणाइत्यर्थः। अधोभागेजगतीं जंबूद्वीपप्राकारं दारयित्वा पूर्वेणलवणसमुद्रं समुपसर्पति अवतरतीत्यर्थः। अथास्याएवप्रवाहमु

मणिज्जे भूमिभागे पं० ? तस्सणं बहुमज्झदेसभाए एत्थणं महंएगे गंगाए देवीए भवणे पं० ? कोसंआया मेणं अद्धकोसं विक्कंभेणं, देसूणगं कोसं उद्धं उच्चत्तेणं, अणेगखंभसयसन्निविट्ठे जाव मज्झदेसन्नाए मणिपे ढिआए सयणिज्जे। सेकेणट्ठेणं जाव सासए णामधेज्जे पं० ? तस्सणं गंगाप्पवाहकुंडस्स दाहिणिल्लेणं तोर

गङ्गा द्वीपस्योपरिबहुसमरमणीयो भूमिभागः प्रज्ञप्तः ? तस्य बहुमध्यदेशभागे अत्र महद्गङ्गाया देव्याएकं भवनं प्रज्ञप्तम् ? क्रोशमायामेनार्द्धक्रोशं विष्कम्भेन, देशोनकञ्चक्रोशऊर्ध्वमुच्चैस्त्वेन अनेकस्तम्भशतसन्निविष्टं यावन्मध्यदेशभागे मणिपीठिकायाः० शयनीयं, तत्रैनार्थेन० यावच्छाश्वतं नामधेयं प्रज्ञप्तम् ? तस्य गङ्गाप्रपातकुण्डस्य दाक्षिणात्येनतोरणेन गङ्गा महानदी प्रव्यूढासती उत्तरार्द्धभरतंवर्षं इज्जंती २ सप्तभिः सलिलासह-

मांटुं एक गंगादेवीनो भवन घरछे, एक कोस लांबपणें अर्द्धकोस पोहलपणइ कणाकोश ऊर्द्ध ऊंचपणइछें अनेक सोगमें थांभेंकरी संनिविष्टित सहित छइ यावत् तेहने भध्यदेस भागइ मणिपीठिका ऊपरि सय्याछे, पूर्वलीपरि। ते कुणअर्थे यावत् शाश्वतुं नामछे सदाकालछे, ते गंगाप्रपात कुंडनें दक्षिणदिशिने तोर्णे थईने गंगामहानदी नीकलीयकी उत्तरार्द्ध भरतक्षेत्र माहि आवतीयकी सातहजार नदीए पूरती भरातीयकी हेठें खंडप्रपात

खयोः पृथुत्वोद्वेधौदर्शयति । गङ्गाप्रभृतीत्यादि । गङ्गामहानदी प्रवहे यतःस्थानात् नदीवोढुं प्रवर्त्तते सप्रवहः पद्मद्रहोत्तोरणान्निर्गम इत्यर्थः, तत्रषट्सक्रोशानि योजनानि विष्कम्भेन तथाक्रोशार्द्धमुद्वेधेन महानदीनां सर्वत्रोद्वेधस्य स्वव्यासषष्ठांशतनभागरूपत्वात् अस्तीतिशेषः । तदनन्तरमिति पद्मद्रहतोरणीयव्यासादनन्तरं एतेन यावत्क्षेत्रं सव्यासो ऽनुवृत्तस्तावत् क्षेत्रादनंतरं गङ्गाप्रपातकुंडनिर्गमादनन्तरमित्यर्थः । एतेनच योन्यत्रप्रवहशब्देन मकरमुखप्रणालनिर्गमः प्रपातकुंडनिर्गमोवाऽभिहितः सनेति श्रीअभयदेवसूरिपादैः, समवायांगवृत्तौ श्रीमलयगिरिपादैश्च, बृहत्क्षेत्रसमासवृत्तौ पद्मद्रहतोरणनिर्गमपरत्वेनैव व्याख्यानात् एवमुद्वेधेविज्ञेयं । मात्रया २ क्रमेण २ प्रतियोजनं समुदितयो रुभयोः पार्श्वयो र्धनुर्दशकवृद्ध्या प्रतिपार्श्वं

॥ टीका ॥

णेणं गंगामहाणई पवूढासमाणी उत्तरद्धभरहवासं एज्जमाणी २ सत्तहिं सलिलासहस्साहि आऊरेमाणी २ अहेखंडप्पवायगुहाए वेयद्धं पव्वयं दालइत्ता २ तओ दाहिणद्धभरहवासं एज्जमाणी २ दाहिणद्धभरहवासस्स बहुमज्झदेसभागंगंता पुरत्थाभिमुही आवत्तासमाणी चउद्दसहिं सलिलासहस्सेहिं समग्गा अहेजगइं दालइत्ता पुरत्थिमेणं लवणसमुद्दं समप्पेइ । गंगाणं महाणईं पवहे छसकोसाइं जोअणाइं विक्कंभेणं, अद्धकोसं उव्वे

॥ मूल ॥

स्रैरापूर्यमाणा २ अधः खण्डप्रपातगुहाया वैताढ्यपर्वतं दारयित्वादक्षिणार्द्धभरतवर्षक्षयुत्तीदक्षिणार्द्धभरतवर्षस्य बहुमध्यदेशभागमागत्वा पूर्वाभिमुखी आवृतासती चतुर्दशभिः सलिलासहस्रैः समग्रा अधोजगतींदारयित्वा पौरस्त्यं लवणसमुद्रं समुपसर्पति गङ्गामहानदीप्रवाहे षट्सक्रोशानि

॥ अनु० ॥

गुफाने वैताढ्य पर्वतप्रति भेदीने दक्षिणाई उत्तरार्द्ध भरतक्षेत्रमे आवती २ थकी दक्षिणार्द्ध भरतक्षेत्रने मध्यभागइं जईने पूर्वदिशि साहमी चली थकी चउदह हजार नदीसहित पूरालीथकी हेठें जंबूद्वीपनी जगती प्रति भेदीने पूर्वदिशि लवण समुद्र माहि जमइ, गंगामहानदी जिहां वहेछे तिहा मूलइ सवा ६ जोजन पोहलपणें अर्द्धकोश उंडपणें । तिवारपछी मात्राइ २ अनुक्रमे योजन २ प्रति बेपासे पांच इम दश २ धनुष वधताथकी

॥ भाषा॥